ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ /1220/583/ છ, તા. 29/08/2020 - થી મંજૂર

# साहित्यम् २

## मध्यमा २

## (ધોરણ 12)

**प्रतिज्ञापत्रम्**

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि ।
प्रत्येकेन सह शिष्टव्यवहारं च करिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां च कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

**मूल्यम् : ₹ 18.00**

तमसो मा ज्योतिर्गमय
गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्
'विद्यायनम्', सेक्टर 10-ए, गान्धीनगरम्-382 010

© गुजरात राज्य शाला पाठ्यपुस्तक मण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यशालापाठ्यपुस्तकमण्डलाधीनाः सन्ति।
अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रूपेण गुजरातराज्य-शालापाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्**

डॉ. अमृतलाल भोगायता

**लेखनम्**

डॉ. भावप्रकाश गांधी (कन्वीनर)

डॉ. गोपालभाई उपाध्याय

श्री इन्दुशेखर भट्टः

**समीक्षणम्**

श्री हार्दिक जोषी

श्री श्रीधर व्यास

श्री विरलभाई दवे

श्री नम्रताबहन पटेल

**भाषाशुद्धि**

डॉ. अमृतलाल भोगायता

**संयोजनम्**

डॉ. क्रिष्णा दवे

(विषयसंयोजक : अंग्रेजी)

**निर्माणायोजनम्**

श्री हरेन शाह

(उपनियामक : शैक्षणिकः)

**मुद्रणायोजनम्**

श्री हरेश एस. लीम्बाचीया

(उपनियामक : उत्पादनम्)

## प्रस्तावना

प्राच्यगुरुकुल-परम्परानुसारम् अभ्यासं कुर्वतः संस्कृतपाठशालीय-विद्यार्थिनः लक्षीकृतयप्राचीनार्वाचीनोभयपद्धत्योः सरस-सरलसमन्वयपूर्वकं गुजरातराज्यमाध्यमिकोच्चतरमाध्यमिकशिक्षणबोर्डद्वारा अभ्यासक्रमसंरचना जाताऽस्ति, एते अभ्यासक्रमाः गुजरातसर्वकारद्वारा मानिताः प्रमाणीकृताश्च सन्ति।

गुजरातसर्वकारप्रमाणितस्य **साहित्यम् २ : मध्यमा २ (धो२ण 12)** इति विषयस्य संवर्द्धिताभ्यासक्रमानुसारं सज्जीभूतस्य पाठ्यपुस्तकस्य संवर्द्धितामावृत्तिं विद्यार्थिसमक्षं प्रस्तुवन्मण्डलमे आनन्दमनुभवति। अस्याः पाठ्यपुस्तकसंवर्द्धितावृत्तेः प्रकाशनात्प्राक् हस्तलिपीनां शिक्षणकार्यं कुर्वद्भिः शिक्षकैः तज्ज्ञैश्च सर्वाङ्गिसमीक्षणं कृतमस्ति। शिक्षकतज्ज्ञानानां सूचनानुसारं हस्तलिपिषु योग्यां शुद्धिं कृत्वा पाठ्यपुस्तकमिदं प्राकाश्यं नीतमस्ति।

प्रस्तुतं पाठ्यपुस्तकं सरसम् उपयोगि क्षतिरहितं कर्तुं मण्डलं सश्रद्धं प्रायतत। तथापि शिक्षणरसिकेभ्यः पाठ्यपुस्तकस्य गुणवत्तावहाः सूचनाः स्वीकार्याः सन्ति।

**पी. भारती (IAS)**
नियामकः | कार्यवाहकप्रमुखः
ता. 26-10-2020 | गान्धीनगरम्

प्रथमावृत्ति : 2020

**प्रकाशकः** – गुजरात राज्य शाला पाठ्यपुस्तक मण्डल, ‘विद्यायन’, सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन, पी. भारती, नियामकः

**मुद्रकः** –

# मूलभूतकर्तव्यानि

प्रत्येकस्य भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः।*

(क) संविधानं प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रगीतस्य चादरः।

(ख) स्वातन्त्र्याय अस्मदीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनं, अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं तद्रक्षणं च।

(घ) देशस्य रक्षणं राष्ट्रीयसेवायै उद्घोषणायां जातायां तदनुसरणं च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः पृथक् स्थित्वा, समस्तभारतीयेषु सम्मनस्य-समानबन्धुत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धिदायस्य मूल्यं ज्ञात्वा तद्रक्षणम्।

(ज) वनानां तडागानां नदीनाम् रक्षणम् अन्यवन्यपशुपक्षिसहितं प्राकृतिक-पर्यावरणरक्षणं तत्संशोधनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानिकमानसस्य मानवतावादस्य जिज्ञासयाः संशोधनस्य च भावनाबोधः।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावुकेन षट्वर्षतः चतुर्दशवर्षं यावत् (6 तः 14) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

* भारतीयं संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| १. | अश्वघोषः | 1 |
| २. | सौन्दरनन्दम् | 5 |
| ३. | सुबन्धुः | 10 |
| ४. | वासवदत्ता | 13 |
| ५. | विश्वनाथः | 17 |
| ६. | साहित्यदर्पणः | 20 |
| ७. | पण्डितप्रवरः जगन्नाथः | 26 |
| ८. | लहरीपञ्चकम् | 32 |
| ९. | चम्पूकाव्यपरिचयः | 38 |
| १०. | नलचम्पूः | 42 |
| ११. | प्रतिज्ञायौगन्धरायणम् | 47 |
| १२. | भीष्मविजयम् | 52 |
| १३. | विक्रमोर्वशीयम् | 59 |
| १४. | दोषनिरूपणम् | 62 |
| १५. | ध्वनिविचारः | 69 |

# १

# अश्वघोषः

**प्रस्तावना**

**काव्यं चारुणि बुद्धवृत्तमहिते यस्य प्रशस्यं यशः**
**सुन्दर्यां सुरसुन्दरीश्रितसृतौ नन्दान्वितायां महत्।**
**वैदुष्यं परिलक्ष्य यस्य विशदं सद्दर्शनानां श्रुतेः**
**लोकः स्तौत्यथ पाटवेऽस्य सुधियस्तन्तन्यते संस्तवम्॥**

संस्कृतसाहित्ये कतिपयमहाकविषु प्राचीनोऽन्यतमः सुप्रसिद्धश्च महाकविः अश्वघोषः परिगण्यते। अश्वघोषस्य व्यक्तित्वं द्विधा संलक्ष्यते – प्रथमं महाकविरसौ वाल्मीकिकालिदासप्रभृतिभिः कविभिः सदृशः प्रसादगुणोपेतानि महाकाव्यानि रचयामास, द्वितीयमसौ स्वग्रन्थैः बौद्धधर्मस्य सिद्धान्तानां प्रचारप्रसारकर्मणि संलग्नः दृश्यते। इत्थं महाकविरूपेण बौद्धधर्माचार्यरूपेण च अश्वघोषस्य द्विविधा ख्यातिः वर्तते। प्रायः समस्तं बौद्धसाहित्यं पालिभाषायां निबद्धं वर्तते तथापि लोकप्रचलिता भाषा संस्कृतमिति दृष्ट्वा सामान्यजनानभिमुखीकर्तुं सः संस्कृतभाषायामेव काव्यं लिलेख। बौद्धसिद्धान्तानां प्रतिपादनाय सः संस्कृतभाषामाश्रित्य सुप्रसिद्धं महाकाव्यं बुद्धचरितं सौन्दरनन्दं चेति रचितवान्।

**महाकवेः अश्वघोषस्य जीवनवृत्तम्**

संस्कृतमहाकवीनामिव अश्वघोषस्य जीवनविषये प्रामाणिकं विवरणं नोपलभ्यते तथापि बौद्धग्रन्थेषु प्राप्तविवरणानुसारं तस्य सामान्येन परिचयः प्राप्यते। तथैव अश्वघोषः ग्रन्थान्ते वाक्यमेकं लिखति – '**आर्यासुवर्णाक्षीपुत्रस्य साकेतकस्य भिक्षोराचार्यस्य भदन्ताश्वघोषस्य महाकवेर्महावादिनः कृतिरियम्**' इति। अनेनाधारेण महाकविरयं मूलतः साकेतनिवासी आसीत्। महाराज्ञः कनिष्कस्य सम्पर्केण कविरसौ पश्चात् पेशावर (पुष्पपुर) इति नगरे अवसत्। अश्वघोषस्य पितुर्नाम नोपलभ्यते। अस्य मातुर्नाम सुवर्णाक्षी आसीत्। अयं बौद्धभिक्षुः आसीत्, तेन सह महाकविरसौ महावादी – महापण्डित–भदन्त इत्यादिभिः नामभिः सम्बोध्यते स्म। अयं महाकविः मूलतः ब्राह्मणः आसीदिति विद्वन्मतम्। डॉ. विश्वनाथभट्टाचार्यस्य मतमिदं यत् महाकविरयं बौद्धदीक्षातः प्राक् शैव आसीत्। अयं ब्राह्मण इति बहुषु कृतिषु बहुषु स्थलेषु वर्णनं वर्तते। यज्ञभूमिनिर्माणम्, मन्त्रपाठपुरस्सरं यज्ञे हव्यदानम् इत्यादिविषयाः महाकविना अश्वघोषेण सूक्ष्मतया वर्णिताः सन्ति। राष्ट्रपालचरितम् इति अश्वघोषग्रन्थस्य चीनदेशीयेन संस्करणेन ज्ञायते यत् महाकविरयं साधारणजनस्य वेषं धारयन् वाद्ययन्त्रमेकं प्रयुज्य नास्तिकजनान् बौद्धधर्मे दीक्षितान् अकरोत्। जनान् बौद्धधर्मं प्रति आकर्षितुम् अश्वघोषः तर्कस्य प्रचुरोपयोगमकरोत्। अस्य व्यापकं ज्ञानं ह्युएनत्सांग–इत्सिंग चेति चीनीयात्रिभ्यां भृशं प्रशंसितम्।

अश्वघोषसम्बद्धा एका किंवदन्ती श्रूयते यथा – अयं कविः एकदा मध्यप्रदेशं गतवान्। तत्र तेनानुभूतं यद् बौद्धपण्डिताः अन्यैः सह धार्मिकविवादात् बिभ्यति। तस्य प्रमुखो हेतुः अश्वघोषस्य प्रकाण्डपाण्डित्यम्। तत्र एकत्र पार्श्वाचार्येण सह तस्य शास्त्रार्थः अभवत्। आचार्यपार्श्वस्य तर्कैः सः प्रभावितः सन् तस्य शिष्यत्वं स्वीकृतवान्। बौद्धधर्मे दीक्षां प्राप्य पूर्वं हीनयानसम्प्रदायस्य गहनं चिन्तनं मननं कृतवान् ततश्च निजविचारान् प्रगतिशीलान् कृत्वा अयं महायानसम्प्रदायस्य प्रवर्तने बहुमूल्यं योगदानमकरोत्। तस्मिन् काले एव कनिष्कः मगधदेशम् आक्रम्य विजित्य च उपहाररूपेण बुद्धस्य भिक्षापात्रं महाकविम् अश्वघोषं च प्राप्तवान्। कनिष्कः अश्वघोषस्य पाण्डित्येन प्रभावितः सन् तं गुरुं कृत्वा बौद्धः अभवत्। अश्वघोषः महान् संगीतज्ञः अपि आसीत्, संगीतज्ञगणेन सह बहुत्र भ्रमणं कृत्वा बहुभ्यो जनेभ्यः सः बौद्धदीक्षां दत्तवान्।

पुनः तस्य जीवनविषये अन्यदपि वृत्तमुपलभ्यते यथा – काश्मीरेषु कुण्डनवनविहारे कुषाणनरेशकनिष्कस्य संरक्षणे संजातायाः चतुर्थ्याः बौद्धसंगीतेरयम् उपाध्यक्षो बभूव। इयं संगीतिः बौद्धधर्मे अतीव महत्त्वं विभर्ति। यतोऽस्याः पश्चादेव महायानसम्प्रदायस्य प्रचारः वेगेन अभवत्। '**आर्यमञ्जुश्रीमूलकल्प**' इति बौद्धग्रन्थानुसारमयं महाकविः अशीतिवर्षाणि यावदजीवत्।

तस्य कण्ठमाधुर्येण मोहिता अश्वा अपि शष्पचरणाद् उपरम्य तद्वचोदत्तकर्णा भवन्ति स्म, तेन हि असौ 'अश्वघोष' इति पदवीं प्राप्तवान्, तेन 'अश्वघोषः' इति कथ्यते इयमपि जनश्रुतिः वर्तते।

**महाकवेः अश्वघोषस्य समयः**

बुद्धचरितस्य अष्टाविंशे सर्गे महाराजस्य अशोकस्य उल्लेखो वर्तते, अनेनाधारेण अश्वघोषस्य समयः अशोकस्य पश्चात् स्वीक्रियते। अशोकस्य समयः 273 ई. पूर्वतः 232 ई. पूर्वमिति मन्यते। अपि च कालिदासग्रन्थानां प्रभावः बहुत्र अस्य ग्रन्थेषु दृश्यते अतः 57 ई. पू. कालिदाससमयात् परवर्ती अयं महाकविः। केचन विद्वांसः कालिदासात् पूर्ववर्ती अश्वघोषः इत्यपि मन्यन्ते। चीनीपरम्परायाः शारिपुत्रप्रकरणस्य पाण्डुलिप्या ज्ञायते यदसौ कनिष्कसमकालीनः आसीत्। कनिष्कस्य समयः 78 ई. वर्षमिति विद्वांसः अङ्गीकुर्वन्ति। इत्थं प्रायः सर्वेऽपि भारतीयाः पाश्चात्याश्च विद्वांसः महाकवेः अश्वघोषस्य समयः प्रायः 100 ई. वर्षमिति स्वीकुर्वन्ति।

**महाकवेः अश्वघोषस्य कृतयः**

अश्वघोषस्य कृतीनां विषये विदुषां मतभेदाः दृश्यन्ते। तिब्बतीपरम्परावादिनः अश्वघोषस्य 11 ग्रन्थाः सन्तीति स्वीकुर्वन्ति, सुजुकीमहोदयः अश्वघोषं षट्कृतीनां प्रणेतृरूपेण मन्यते। तथापि प्राप्तकृतीनामाधारेण अष्टकृतयः अश्वघोषस्य इति भारतीयानां विदुषां मतम्। अस्य रचनासु काव्यविषयाणां दर्शनविषयाणां धर्मप्रचारविषयाणाञ्च ग्रन्थानां संग्रहो दृश्यते।

(1) बुद्धचरितम्–मूलतः अष्टाविंशति (28) सर्गाणां महाकाव्यमिदं वर्तते। महात्मनः बुद्धस्य जीवनमधिकृत्य लिखितमहाकाव्येऽस्मिन् जन्मनः आरभ्य महानिर्वाणं यावत् कथा वर्णिता। बौद्धसिद्धान्ताः अत्र विशदतया प्रतिपादिताः। चीनीभाषायां तिब्बतीभाषायामपि महाकाव्यस्यास्य अष्टाविंशति (28) सर्गाणाम् अनुवादः प्राप्यते।

(2) सौन्दरनन्दम्– महाकाव्यमिदं परमप्रथितं 'सौन्दरनन्दम्' अष्टादश (18) सर्गेषु निबद्धं समुपलभ्यते। महात्मनः बुद्धस्य नन्दनाम्नः अनुजस्य सुन्दरीनाम्न्या देव्या सह प्रणयकथा ततश्च बौद्धधर्मदीक्षाग्रहणवृत्तान्तं महाकाव्येऽस्मिन् मर्मभेदिन्या गिरा अश्वघोषः लिखितवान्।

(3) शारिपुत्रप्रकरणम्– अस्मिन् प्रकरणाख्ये रूपके नवाङ्काः सन्ति, ये अंशत एव लभ्यन्ते। प्रकरणप्रकारकमिदं रूपकं बहुत्र नाम्नैव ज्ञायते।

(4) राष्ट्रपालनाटकम्– केवलं चीनीभाषायामुपलब्धम् अनुवादमात्रं गेयं नाटकमिदं वर्तते। तरुणमौद्गल्यायनशारिपुत्रौ च भगवतः बुद्धस्य सकाशात् बौद्धधर्मदीक्षां गृहीतवन्तौ इत्यस्य प्रकरणस्य प्रतिपाद्यविषयः।

(5) सूत्रालङ्कारः– सूत्रालङ्कारे पाली–जातककथानां संग्रहो वर्तते। अत्र विनेयानां सुखं बौद्धधर्मसिद्धान्तशिक्षार्थं कथा काचित् वर्णिता। अस्य केवलं त्रिविष्टप (तिब्बती) भाषानुवादमात्रमुपलभ्यते।

(6) महायानश्रद्धोत्पाद– अत्र हि ग्रन्थे महायानसम्प्रदायस्य पूर्वतरविदुषां सिद्धान्ताः उपवर्णिताः। परम्परया ग्रन्थोऽयम् अश्वघोषकृतिरूपेण प्रसिद्धः वर्तते। अनेन आधारेण अश्वघोषः दर्शनशास्त्रपारङ्गतः आसीदिति मन्यते।

(7) वज्रसूची– 'राजन्यपुत्रेण ब्राह्मणा ननु अनुशासनीयाः' इति वाक्यमपाकर्तुं ये ब्राह्मणाः बौद्धधर्मावमाननं कृतवन्तः तेषां प्रतिवादं कर्तुं ग्रन्थोऽयं महाकविना लिखितः। अत्र चातुर्वर्ण्यव्यवस्थायाः कठोरनिन्दा विहिता दृश्यते।

(8) गण्डीस्तोत्रगाथा– खण्डकाव्यसदृशं किमपि गेयं सङ्गीतकाव्यमिदं प्रतिभाति। अत्र विविधवृत्तनिबद्धानां नानाविध-काव्यानां समाहारो वर्तते, येन कवेः सङ्गीतशास्त्रे छन्दःशास्त्रे च नैपुण्यं प्रकाश्यते। अस्य ग्रन्थस्य प्रयोजनं तु बौद्धधर्मप्रचार एव।

**महाकवेः अश्वघोषस्य वैशिष्ट्यम्**

अश्वघोषस्य काव्यैः सुस्पष्टं ज्ञायते यदसौ महाकविः वेद-वेदाङ्ग-षड्दर्शन-रामायण-महाभारत-पुराण-धर्मशास्त्र-राजनीति-काव्यशास्त्र-व्याकरणादिनानाविधशास्त्राणाम् उत्तमः ज्ञाताऽसीत्। सौन्दरनन्दे नन्दस्य सोमरसपानस्य उल्लेखः तस्य वैदिकं ज्ञानम् अभिव्यनक्ति। बुद्धचरितस्य निम्नलिखितः श्लोकः तस्य दर्शनप्रागल्भ्यं प्रकटयति। यथा-

**तत्र तु प्रकृतिं नाम विद्धि प्रकृतिकोविद!।**
**पञ्चभूतान्यहङ्कारं बुद्धिमव्यक्तमेव च॥**

**( बुद्धचरितम् 12.18 )**

सौन्दरानन्दमहाकाव्यस्य उपरि श्रीमद्भगवद्गीतायाः प्रभूतः प्रभावः दृश्यते। अपि च अश्वघोषः रामायणात् भाषां भावान् छन्दांसि शैलीं प्रकृतिवर्णनानि च उदाहृतवान्।

अश्वघोषः वैदर्भीरीतेः महाकविः। प्रसाद-माधुर्यगुणयोः सुभगः समन्वयः अश्वघोषप्रणीतेषु महाकाव्येषु बाहुल्येन दृश्यते। भाषा सरला, सुबोधा, सरसा च वर्तते। आवश्यकतानुरूपं यमक-अनुप्रास-उपमा-अर्थान्तरन्यासाद्यलङ्काराः प्रयुक्ताः लक्ष्यन्ते। शान्तरसनिरूपणे अश्वघोषस्य अप्रतिहता गतिः वर्तते। उपसर्गस्य प्रयोगेण ग्रह् धातोः चत्वारः अर्थाः पद्येऽस्मिन् प्रतिपादिताः ये कवेः व्याकरणवैशारद्यं सूचयन्ति।

**प्रणताननुजग्राह विजग्राह कुलद्विषः।**
**आपन्नान् परिजग्राह निजग्राहास्थितान् पथि॥**

अनुजग्राह = अनुगृहीतवान्, विजग्राह = युद्धं कृतवान्, परिजग्राह = स्वीकृतवान्, निजग्राह = नियन्त्रितवान् इत्यर्थः।

इत्थं महाकविः अश्वघोषः संस्कृतसाहित्ये उत्कृष्टं पदमलङ्करोति। बौद्धसिद्धान्तानां सरलया मधुरया गिरा प्रतिपादनं कृत्वा अश्वघोषः बौद्धमतावलम्बिष्वपि आदरस्थानं भजते।

## स्वाध्यायः

**1. रिक्तस्थानपूर्तिं कुरुत।**

(1) महाकविः अश्वघोषः ...... अनुयायी आसीत्। (हिन्दुधर्मस्य, बौद्धधर्मस्य, जैनधर्मस्य)

(2) अश्वघोषस्य जन्मस्थानं ...... आसीत्। (साकेतम्, काशी, मथुरा)

(3) अश्वघोषस्य मातुः नाम ...... आसीत्। (पद्माक्षी, सुवर्णाक्षी, कात्यायनी)

(4) अश्वघोषः ...... आश्रितः कविरासीत्। (चन्द्रगुप्तस्य, अशोकस्य, कनिष्कस्य)

(5) अश्वघोषः काव्यकलां विहाय ...... निपुण आसीत्। (चित्रकलायाम्, सङ्गीतकलायाम्, अभिनयकलायाम्)

(6) महाकवेः अश्वघोषस्य प्रायः ...... समयः मन्यते। (100 ई. वर्षम्, 200 ई. वर्षम्, 300 ई. वर्षम्)

(7) भारतीयानां विदुषां मतानुसारेण अश्वघोषस्य ...... कृतयः सन्ति। (सप्त, दश, अष्ट)

(8) ...... कृतिः अश्वघोषस्य नास्ति। (राष्ट्रपालनाटकम्, सूत्रालङ्कारः, काव्यालङ्कारः)

(9) बुद्धचरिते ...... सर्गाः सन्ति। (विंशतिः, अष्टाविंशतिः, अष्टादश)

(10) सौन्दरनन्दस्य उपरि ...... प्रभूतः प्रभावः दृश्यते। (रामायणस्य, श्रीमद्भगवद्गीतायाः, उपनिषदाम्)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) महाकवेः अश्वघोषस्य के द्वे महाकाव्ये सुप्रसिद्धे स्तः?

(2) कस्य मतेन अश्वघोषः बौद्धदीक्षातः प्राक् शैव आसीत्?

(3) अश्वघोषः बौद्धधर्मं प्रति जनान् आकर्षितुं कस्य प्रचुरोपयोगम् अकरोत्?

(4) केन यात्रिणा अश्वघोषस्य व्यापकज्ञानस्य प्रशंसा कृता?

(5) मध्यप्रदेशे अश्वघोषस्य शास्त्रार्थः केन सह अभवत्?

(6) कस्य ग्रन्थस्यानुसारम् अश्वघोषः अशीतिवर्षाणि यावदजीवत्?

(7) कस्मिन् ग्रन्थे महाराजस्य अशोकस्य उल्लेखो लभ्यते?

(8) 'अश्वघोषः' षट्कृतीनां प्रणेता इति कः मन्यते?

(9) कस्मिन् ग्रन्थे महायानसम्प्रदायस्य सिद्धान्ताः वर्णिताः?

(10) अश्वघोषः कस्या रीतेः महाकविः आसीत्?

**3. टिप्पणीं लिखत।**

(1) महाकवेः अश्वघोषस्य जीवनवृत्तम्।

(2) अश्वघोषस्य समयः।

(3) अश्वघोषस्य वैशिष्ट्यम्।

**4. सविस्तरमुत्तरं लिखत।**

(1) अश्वघोषस्य व्यक्तित्त्वं कीदृशम् आसीत्?

(2) 'अश्वघोषः' इति नामकरणं कथं जातम्?

(3) अश्वघोषस्य अष्टकृतीनां नामानि लिखत।

(4) बुद्धचरितस्य किं कथावस्तु वर्तते?

(5) कनिष्क-अश्वघोषयोः विषये का किंवन्दती वर्तते?

**5. 'अ' विभागं 'ब' विभागेन सह योजयत।**

| 'अ' | 'ब' |
|---|---|
| (1) सौन्दरनन्दम् | - नव-अङ्काः |
| (2) शारिपुत्रप्रकरणम् | - गेयं खण्डकाव्यम् |
| (3) बुद्धचरितम् | - अष्टादशसर्गाः |
| (4) गण्डीस्तोत्रगाथा | - पालीजातककथा |
| (5) सूत्रालङ्कारः | - अष्टाविंशतिसर्गाः |

●

# २

# सौन्दरनन्दम्

**प्रस्तावना**

महाकवेः अश्वघोषस्य अष्टकृतीषु द्वे महाकाव्ये स्तः - बुद्धचरितं सौनदरनन्दं चेति। तत्रापि बुद्धचरिते बौद्धधर्मस्य सिद्धान्ताः प्रतिपादिताः, तेन महाकवेः अश्वघोषस्य कवित्वं सुस्पष्टं न भवति। महाकाव्यस्य समस्तलक्षणैः भूषितं सौन्दरनन्दमहाकाव्यम् अश्वघोषस्य अप्रतिमा कृतिः यत्र अश्वघोषस्य महाकवित्वं प्रकटितं भवति। केचन विद्वांसः बुद्धचरितात् प्राचीनकृतित्वेन सौन्दरनन्दं परिगणयन्ति किन्तु सौन्दरनन्दस्य अनुशीलनेन काव्यशैल्याः अवलोकनेन च निर्विवादं वक्तुं शक्यते - इयं अश्वघोषस्य द्वितीया कृतिः या बुद्धचरितस्य अनन्तरं कविनानेन प्रणीता। प्रस्तुते पाठेऽस्मिन् सौन्दरनन्दस्य परिचयो दीयते।

**सौन्दरनन्दस्य कथावस्तु**

अश्वघोषस्य सुप्रसिद्धे महाकाव्येऽस्मिन् अष्टादश (18) सर्गास्सन्ति। महामहोपाध्यायः श्रीहरप्रसादशास्त्री नेपाल-महाराजपुस्तकालयात् जीर्णां भ्रष्टां पाण्डुलिपिद्वयं प्राप्य तदाधारेन संपाद्य 1910 ई. वर्षे प्रकाशनं कृतवान्। ततः डॉ. जान्स्टन 1928 ई. वर्षे आंग्लभाषानुवादेन सह सुन्दरं संस्करणं प्रकाशितवान्। श्रीलाहा बांग्लानुवादं, श्रीसूर्यनारायण चौधरी च हिन्द्यामनुवादं कृत्वा 1948 ई. वर्षे प्रकाशितवान्। उपर्युक्तानां विदुषां महता प्रयत्नेन अद्य सौन्दरनन्दमहाकाव्यं वयमध्येतुं प्रभवामः, नूनम् इमे धन्यवादार्हाः।

सौन्दरनन्दे प्रमुखतः नन्दस्य सुन्दर्याश्च प्रणयकथा वर्णिता। गौतमबुद्धस्य अनुजः नन्दः अतिसुन्दरः भोग-विलासे च निमग्नः आसीत्। स स्वभार्यायां सुन्दर्यामत्यस्निह्यत्। चक्रवाकपक्षिणौ इव तौ परस्परं सहैव तिष्ठतः स्म, नन्दस्य सुन्दर्यां विशेषः अनुरागः अवर्तत। गौतमबुद्धः बलात् नन्दमाकृष्य बौद्धधर्मस्य दीक्षामददात्। इयं कथा काव्यात्मकरूपेण अत्र विलसिता वर्तते। यथासर्गं सौन्दरनन्दस्य संक्षिप्ता कथा अत्र प्रस्तूयते-

प्रथमे सर्गे गौतमबुद्धस्य जन्मभूमेः कपिलवस्तुनगरस्य विशदं वर्णनं वर्तते। 'कपिलवस्तुनामधेयः' अयं सर्गः।

द्वितीये सर्गे राज्ञः शुद्धोदनस्य वर्णनमस्ति, गौतमनन्दयोः जन्मनः उल्लेखोऽत्र दृश्यते। 'राजवर्णनम्' द्वितीयसर्गस्य नामधेयम्।

'तथागतवर्णन' नामधेये तृतीये सर्गे गौतमस्य बुद्धत्वप्राप्तेः विवरणं लभते।

चतुर्थे सर्गे नन्दस्य स्वपत्न्या सुन्दर्या सह निवासः, बुद्धस्य भिक्षायै नन्दगृहं प्रति आगमनम्, भिक्षाम् अप्राप्य बुद्धस्य प्रत्यावर्तनम्, नन्दस्य अपराधबोधः, सुन्दर्याः अनुमतिं प्राप्य क्षमायाचनायै प्रस्थानं वर्णितम् अस्ति। अयं सर्गः 'भार्यायाचितक'नाम्ना प्रसिद्धः।

'नन्ददीक्षा' नामधेये पञ्चमे सर्गे बुद्धस्य नन्दाय बौद्धदीक्षाप्रदानं, नन्दस्य च काषायवस्त्रग्रहणं मुख्यविषयः।

'भार्याविलापः' षष्ठसर्गस्य शीर्षकं वर्तते। अस्मिन् सर्गे सुन्दर्याः करुणविलापः वर्णितः।

सप्तमे सर्गे सुन्दर्याः वियोगे नन्दः विलपति अत एव सर्गोऽयं 'नन्दविलाप'नाम्ना प्रसिद्धः।

'स्त्रिविघ्न'नामके अष्टमे सर्गे श्रमणस्य नन्दाय उपदेशः, स्त्री-निन्दा, स्त्रीप्रसङ्गनिवृत्तेश्च उपदेशः सविस्तरं वर्णितः।

'अभिमाननिन्दा' नामधेये नवमे सर्गे अभिमानस्य निन्दायाः संयमशिक्षायाश्च चित्रणं वर्तते।

दशमः सर्गः 'स्वर्गदर्शन' नामधेयोऽस्ति। अत्र मुनिः नन्दं स्वर्गदर्शनं कारयति। अत्र कवेः कल्पनाकाम्यत्वं विशेषेण दृश्यते।

एकादशः सर्गः 'स्वर्गनिन्दा' नाम्ना ज्ञायते। अस्मिन् सर्गे अस्थायि स्वर्गसुखं निन्द्य शाश्वतं परमं पदं मोक्षमधिगन्तुं निर्देशः वर्तते।

'विवेक' नामके द्वादशे सर्गे बुद्धः नन्दाय विवेकस्य उपदेशं दत्त्वा श्रद्धायाः संयमस्य च महत्त्वं बोधयति।

त्रयोदशे सर्गे शीलस्य इन्द्रियसंयमस्य च महत्त्वं बुद्धः नन्दाय निवेदयति। कायेन वचसा मनसा च शुद्धो भूत्वा अप्रमादं शुभकर्माणि कर्तुं प्रेरयति। अयं सर्गः 'शीलेन्द्रियसंयम' नाम्ना सभाजितः।

चतुर्दशे सर्गे इन्द्रियजयाय आवश्यककर्तव्यानि सूचितानि सन्ति। 'प्रस्थान' नाम्ना प्रथिते सर्गेऽस्मिन् आदर्शदिनचरी निर्दिष्टा वर्तते।

'वितर्कप्रहाण' नामके पञ्चदशे सर्गे मानसिकशुद्धेः विधिः प्रदत्तोऽस्ति।

षोडशः सर्गः चत्वारि आर्यसत्यानि निर्दिशति। अस्मिन् सर्गे सर्वाधिकाः श्लोकाः सन्ति। 'आर्यसत्यव्याख्यान' नामकः सर्गोऽयम्।

सप्तदशः सर्गः नन्दस्य अमृतत्वप्राप्तेः विषयकं वर्णनं प्रस्तौति। 'अमृतप्राप्तिः' शीर्षकमस्य सर्गस्य वर्तते।

अन्तिमे अष्टादशे सर्गे 'आज्ञाव्याकरणाख्ये' उत्तमगुणानाम् उपदेशः निर्दिष्टः।

इत्थं सौन्दरनन्दस्य कथानकम् अश्वघोषेन सुन्दररीत्या प्रतिपादितमस्ति।

**1. सा पद्मरागं वसनं वसाना पद्मानना पद्मदलायताक्षी।**
**पद्मा विपद्मा पतितेव लक्ष्मीः शुशोष पद्मस्त्रगिवातपेन॥ (सौ.नं.6.26)**

**अन्वयः** - पद्मरागं वसनं वसाना पद्मानना पद्मदलायताक्षी सा विपद्मा पद्मा लक्ष्मीः इव पतिता, आतपेन पद्मस्रक् इव शुशोष।

**भावार्थः** - कमलरागं वस्त्रं दधाना कमलवदना कलमपत्रायतनयना सा सुन्दरी पद्मायुक्ता श्रीः इव भ्रष्टा संजाता अपि च सा सुन्दरी घर्मेण कमलमालेव (प्रियविरहेण) अशुषत्।

**विशेषः** - अत्र अनुप्रासालङ्कारस्य सुन्दरप्रयोगः, विप्रलम्भश्रृङ्गारस्य उत्कृष्टम् उदाहरणमयं श्लोकः।

**2. रुरोद मम्लौ विरुराव जग्लौ बभ्राम तस्थौ विललाप दध्यौ।**
**चकार रोषं विचकार माल्यं चकर्त वक्त्रं विचकर्ष वस्त्रम्॥ (सौ.नं.6.34)**

**अन्वयः** -रुरोद मम्लौ विरुराव जग्लौ बभ्राम तस्थौ विललाप दध्यौ, रोषं चकार, माल्यं विचकार वक्त्रं चकर्त, वस्त्रं विचकर्ष।

**भावार्थः** - सा सुन्दरी अरोदत्, जग्लौ, अरावीत्, अग्लासीत्, अभ्रमत्, अतिष्ठत्, व्यलपत्, चिन्तयामास, क्रोधम् अकरोत्, पुष्पमाल्यं व्यकरोत् मुखम् (दन्तैः) अकर्तीत्, वसनं च व्यकृषत्।

**विशेषः** - भट्टिकाव्य इव अत्र व्याकरणच्छटा दृश्यते। लिट्लकारस्य द्वादशरूपाणि अस्मिन् श्लोके तेषां प्रकाण्डवैदुष्यं प्रकटयन्ति। रुद्, म्लै, रु, ग्लै, भ्रम्, स्था, लप्, ध्यै, कृञ्, कृती, कृष् इत्येते धातवः अत्र प्रदर्शिताः। अत्र विप्रलम्भश्रृङ्गारेण सह स्वभावोक्त्यलङ्कारः।

**3. तं गौरवं बुद्धगतं चकर्ष भार्यानुरागः पुनराचकर्ष।**
**सोऽनिश्चयन्नापि ययौ न तस्थौ तुरंस्तरंगेष्विव राजहंसः॥ (सौ.नं.4.42)**

**अन्वयः** -बुद्धगतं गौरवं तं चकर्ष, भार्यानुरागः पुनः आचकर्ष। सः अनिश्चयन् तरंगेषु तुरन् राजहंसः इव नापि ययौ न तस्थौ।

**भावार्थः** - बुद्धसम्बन्धिनी भक्तिः तं नन्दम् आकर्षयत्, पुनः पत्न्याः प्रणयः अपि तं नन्दम् आकृष्टवान्। इत्थं निश्चयमकुर्वन् सः नन्दः ऊर्मिषु गच्छन् राजहंस इव न तु अगच्छत् न हि अतिष्ठत्।

**विशेषः** - कालिदास-अश्वघोषयोः पौर्वापर्यनिर्णये एनं श्लोकम् उद्धरन्ति विद्वांसः। एतादृशः श्लोकः कुमारसम्भवे 5.85 तमे श्लोके अपि लभते, यत्र 'न ययौ न तस्थौ' इति पदं प्रयुज्यते। उत्तमा भावाभिव्यक्तिः अत्र दृश्यते। उपमालङ्कारः अत्र निर्दिष्टः।

**4. तां सुन्दरीं चेन्न लभेत नन्दः सा वा निषेवेत न तं नतभ्रुः।**

**द्वन्द्वं ध्रुवं तद् विकलं न शोभेतान्योऽन्यहीनाविव रात्रिचन्द्रौ॥** **( सौ.नं.4.7 )**

**अन्वयः** –नन्दः तां सुन्दरीं चेत् न लभेत सा वा तं वा न निषेवेत ध्रुवं विकलं तद् द्वन्द्वम् अन्योन्यहीनौ रात्रिचन्द्रौ इव न शोभेत।

**भावार्थः** – सः राजा नन्दः तां निजपत्नीं सुन्दरीं यदि न प्राप्नुयात् अथवा सा सुन्दरी तं नन्दं न प्राप्नुयात् चेत् निश्चयेन अर्धांशहीनं तत् युगलं परस्परहीनौ निशारजनीकरौ इव न राजेत।

**विशेषः** – अत्र उपमालङ्कारमाध्यमेन नन्दसुन्दर्योः उत्कृष्टप्रेमभावना प्रदर्शिता। कुमारसम्भवे (7.66) अपि एतादृशः भावः प्रकटितः।

**5. यथा च कुष्ठव्यसनेन दुःखितः प्रतापनान्नैव शमं निगच्छति।**

**तथेन्द्रियार्थेष्वजितेन्द्रियश्चरन्न कामभोगैरूपशान्तिमृच्छति॥** **( सौ.नं.9.44 )**

**अन्वयः** –यथा च कुष्ठव्यसनेन दुःखितः प्रतापनात् शमं नैव निगच्छति तथा अजितेन्द्रियः इन्द्रियार्थेषु चरन् कामभोगैः शान्तिं न ऋच्छति॥

**भावार्थः** – येन प्रकारेण कुष्ठरोगेण पीडितः शरीरसंतापनात् शान्तिं नैव प्रयाति तेन प्रकारेण अवशः विषयेषु निवसन् विषयभोगैः शमं न गच्छति।

**विशेषः** – अत्र न जातु कामः कामानामुपभोगेन शाम्यति।

हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते॥

इति प्रसिद्धश्लोकस्य भावः अत्र दृश्यते। अर्थान्तरन्यासालङ्कारस्य उदाहरणं पद्यमिदम्॥

**6. बाधात्मकं दुःखमिदं प्रसक्तं दुःखस्य हेतुः प्रभवात्मकोऽयम्।**

**दुःखक्षयो निःसरणात्मकोऽयं त्राणात्मकोऽयं प्रशमाय मार्गः॥** **( सौ.नं.16.4 )**

**अन्वयः** – इदं प्रसक्तं दुःखं बाधात्मकं, दुःखस्य अयं हेतुः प्रभवात्मकः अयं दुःखक्षयः निःसरणात्मकः प्रशमाय अयं मार्गः त्राणात्मकः।

**भावार्थः** – एतत् सततं कष्टं पीडात्मकमस्ति, कष्टस्य एतत् कारणं जननात्मकमस्ति, एषः दुःखविनाशः प्रवाहात्मकः अस्ति, दुःखस्य शान्तये एषः पन्थाः रक्षात्मकः अस्ति।

**विशेषः** – अस्मिन् श्लोके बौद्धधर्मस्य चत्वारि आर्यसत्यानि कथितानि। 1. दुःखम् 2. दुःखस्य हेतुः 3. दुःखविनाशः 4. दुःखविनाशाय मार्गः।

**7. चलत्कदम्बे हिमवन्नितम्बे तरौ प्रलम्बे चमरो ललम्बे।**

**छेत्तुं विलग्नं न शशाक बालं कुलोद्गतां प्रीतिमिवार्यवृत्तः॥** **( सौ.नं.10.11 )**

**अन्वयः** –चलत्कदम्बे हिमवन्नितम्बे प्रलम्बे तरौ चमरः ललम्बे, (स.) विलग्नं बालम् आर्यवृत्तः कुलोद्गतां प्रीतिम् इव छेत्तुं न शशाक॥

**भावार्थः** – प्रकम्पमानकदम्बे हिमगिरिशिखरे विशाले वृक्षे एकः चमरः अलम्बत, सः शाखायां संसक्तं पुच्छं सदाचारी जन इव परम्परागतां मैत्रीम् इव कर्तयितुं न शक्तवान्।

**विशेषः** – अत्र उपमालङ्कारस्य अनुप्रासस्य च छटा दृश्यते। अयं प्रकृतिवर्णने वाल्मीकिकालिदासौ न अनुसरति तथापि सः सौन्दर्यं न, अपितु वैराग्यमीक्षते।

**8. स चक्रवाक्येव हि चक्रवाकस्तया समेतः प्रियया प्रियार्हः।**

**नाचिन्तयत् वैश्रवणं न शक्रं तत्स्थानहेतोः कुत एव धर्मः॥** **( सौ.नं.4.2 )**

**अन्वयः** –स चक्रवाक्या चक्रवाक इव तया प्रियया समेतः प्रियार्हः तत्स्थानहेतोः वैश्रवणं शक्रं च न अचिन्तयत् हि कुत एव धर्मः?

**भावार्थः** - सः नन्दःचक्रवाक्या पक्षिणा चक्रवाकपक्षी इव निजपत्या सहितः प्रियायोग्यः आसीत्, प्रियायाः उपस्थितिकारणात् सः कुबेरम् इन्द्रं च न चिन्तितवान् चेत् धर्मः कुतः चिन्त्यः ?

**विशेषः** - अत्र निषेधरूपा व्यञ्जना वर्तते। प्रेम्णः सुन्दरी भावाभिव्यक्तिः सरसया भाषया निरूपिता।

**9. एवं कृती निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्।**
**दिशं न कांचिद्विदिशं न कांचित्क्लेशक्षयात्केवलमेति शान्तिम्॥** **(सौ.नं.16.29)**

**अन्वयः** -एवं निर्वृतिम् अभ्युपेतः कृती नैव अवनिं गच्छति न अन्तरिक्षं न कांचिद् दिशं न कांचिद् विदिशं क्लेशक्षयात् केवलं शान्तिम् एति।

**भावार्थः** - इत्थं शान्तिं प्राप्तः पुण्यात्मा न पृथिवीं याति नापि आकाशं न कांचित् दिशां नापि उपदिशां गच्छति दुःखनाशात् केवलं निर्वाणं गच्छति।

**विशेषः** - एतौ उभौ श्लोकौ परस्परान्वितौ स्तः। कर्मणां नाशे जीवनं नश्यतीति बौद्धानां मतम्। यथा स्नेहक्षयात् दीपस्य शान्तिः तथा गुणकर्मणां नाशे जन्मनः नाशः भवतीति मत्वा मोक्षस्य व्याख्या प्रस्तुता।

## स्वाध्यायः

**1. रिक्तस्थानापूर्तिं कुरुत।**

(1) सौन्दरनन्दे ........ सर्गाः सन्ति। (पंचदश, अष्टादश, एकविंशतिः)

(2) 1928 ई. वर्षे ........ सौन्दरनन्दस्य आंग्लभाषानुवादेन सह प्रकाशनमकरोत्। (डा. विलियम जोन्स, डा. याकोबी, डा. जान्स्टन)

(3) ........ गौतमबुद्धस्य अनुजः आसीत्। (नन्दः, परीक्षितः, शुद्धोदनः)

(4) षष्ठसर्गस्य शीर्षकं ........ वर्तते। (स्वर्गदर्शनम्, नन्दविलापः, भार्याविलापः)

(5) 'स्रक्' शब्दस्य अर्थः ........ । (चन्दनम्, माला, तिलकम्)

(6) षोडशः सर्गः ........ आर्यसत्यानि निर्दिशति। (त्रीणि, षट्, चत्वारि)

(7) 'रुरोद' 'मम्लौ' 'जग्लौ' इत्यत्र ........ लकारः। (लुट्, लिट्, लुङ्)

(8) नन्दः ........ चेत् न लभेत। (सुन्दरीम्, गुणवतीम्, पद्मावतीम्)

(9) गौतमबुद्धस्य जन्मभूमिः ........। (गया, काशी, कपिलवस्तु)

(10) बौद्धधर्ममतेन दुःखं ........ भवति। (बाधात्मकम्, प्रभवात्मकम्, त्राणात्मकम्)

**2. एकवाक्येन उत्तरं लिखत।**

(1) अश्वघोषस्य 'सौन्दरनन्दनम्' कीदृशं काव्यं वर्तते ?

(2) कः सौन्दरनन्दस्य हिन्द्यामनुवादं चकार ?

(3) सौन्दरनन्दे कस्य प्रणयकथा वर्णिता ?

(4) पञ्चमसर्गस्य किं नाम वर्तते ?

(5) 'वितर्कप्रहाण' नामधेये पञ्चदशे सर्गे कस्य विधिः प्रदत्तः ?

(6) 'सा पद्मरागं वसनम्' इति श्लोके कः अलङ्कारः ?

(7) सौन्दरनन्दस्य श्लोकः कालिदासस्य केन ग्रन्थेन सह साम्यं भजते ?

(8) सुन्दरीनन्दौ अन्योन्यहीनौ किम् इव न शोभेते ?

(9) सः नन्दः कः पक्षी इव तया प्रियया समेतः आसीत्?

(10) पुण्यात्मा कस्य नाशात् निर्वाणं गच्छति?

**3. टिप्पणीं लिखत।**

(1) सौन्दरनन्दस्य कथासारः।

(2) सुन्दरीनन्दयोः प्रणयः।

(3) चत्वारि आर्यसत्यानि।

**4. द्वित्रिवाक्यैः उत्तराणि लिखत।**

(1) सौन्दरनन्दमहाकाव्यं कथं प्रकाशितम्?

(2) शान्तिं प्राप्तस्य दीपस्य का गतिः भवति?

(3) नन्दस्य विरहे सा सुन्दरी किं किमकरोत्?

(4) केन आधारेण कालिदासाश्वघोषयोः पौर्वापर्यनिर्णयं विद्वांसः कुर्वन्ति?

(5) कः जनः शमं न गच्छति?

**5. 'अ' विभागं 'ब' विभागेन सह योजयत।**

| 'अ' | 'ब' |
|---|---|
| (1) सप्तदशसर्गः | भार्यायाचितकः |
| (2) प्रथमसर्गः | अभिमाननिन्दा |
| (3) चतुर्थसर्गः | विवेकः |
| (4) अष्टमसर्गः | अमृतप्राप्तिः |
| (5) द्वादशसर्गः | कपिलवस्तु |

●

# ३

# सुबन्धुः

**प्रस्तावना**

अन्यसुप्रसिद्धसंस्कृतकवय इव सुबन्धुः अपि स्वविषये मौनम् आचरितवान्। स्वकीयायाम् एकस्याम् एव कृतौ अपि कविना स्वजीवनविषये किमपि न निर्दिष्टम् यतः यस्य आधारेण वयं महाकवेः सुबन्धोः स्थितिकालस्य पूर्णतः वास्तविकं निर्धारणं कर्तुं शक्नुयाम। परं तेन कृतस्य विक्रमादित्यस्य उल्लेखेन उपमानरूपेण केषाञ्चन आचार्याणां कृतीनां च आधारेण तस्य कालस्य विषये किञ्चन अनुमानमवश्यमेव कर्तुं शक्यते। यदि बाह्यसाक्ष्याणाम् अवलोकनं कुर्मः तर्हि महाकवेः सुबन्धोः विषये परवर्तिकाव्येषु लक्षणग्रन्थेषु च केचन ईदृशाः प्रसङ्गाः प्राप्यन्ते येषाम् आधारेण वयं महाकवेः कालस्य निर्धारणं कर्तुं शक्नुमः। कवेः वास्तविको कालः अद्यावधि इतिहासकाराणां कृते गवेषणस्य विषयो वर्तते। केषाञ्चित् अन्तःसाक्ष्याणां बाह्यसाक्ष्याणां च आधारेण वयं तस्यां दिशि ईषत् विचारयामः।

**विक्रमादित्यस्य नामोल्लेखस्य आधारेण -**

**सा रसवत्त विहता नवका**
**विलसन्ति चरन्ति नो कङ्कः।**
**सरसीव कीर्तिशेषं गतवति**
**भुवि विक्रमादित्ये॥ वासवदत्ता - 10**

इत्युपर्युक्तपद्यानुसारं प्रास्ताविकेऽस्मिन् पद्ये विक्रमादित्यस्य नामोल्लेखः कृतः, एवञ्च विक्रमादित्यस्य स्थितिकालं यावत् कवीनां काव्यानां च स्थितिः उत्कृष्टा आसीत् इत्यपि सुबन्धोः मन्तव्यम् अस्ति। भारतीयेतिहासे विक्रमादित्यनाम्ना द्वौ राजानौ उपलक्ष्येते।

चन्द्रगुप्त द्वितीय विक्रमादित्य : 375 - 424 ई.

स्कन्द गुप्त विक्रमादित्य : 455 - 467 ई.

अवश्यमेव तस्मिन् काले भारतस्य सांस्कृतिकी स्थितिः उन्नता आसीत्। अत एव इदं तावत् निश्चितमेव यत् सुबन्धोः कालः 467 ई. वर्षस्य अनन्तरकालीनः एव।

**बृहत्कथायाः नामोल्लेखस्य आधारेण-**

वासवदत्तायां कुसुमपुरस्य वर्णनावसरे गुणाढ्येन विरचितायाः बृहत्कथायाः समुल्लेखः सुबन्धुना कृतः।

'बृहत्कथालम्बैरिव सालभञ्जिकोपशोभितैः' इति पाश्चात्यविदुषां मतानुसारम् अस्याः बृहत्कथायाः रचनाकालः प्रथमशताब्दं द्वितीयशताब्दं वा विद्यते। अतः सुबन्धोः काले बृहत्कथा पर्याप्तं प्रसिद्धा आसीत्।

**बौद्धसङ्गत्यलङ्कारस्य नामोल्लेखस्य आधारेण-**

वामनेन काव्यालङ्कारसूत्रे अर्थस्य प्रौढत्वम् ओजोगुणः इत्युक्तम्। इयम् अर्थप्रौढिः पञ्चप्रकारात्मिका भवति। तत्रान्तिमप्रकारः 'साभिप्रायत्वम्'। साभिप्रायत्वस्य उदाहरणरूपेण वामनः निम्नाङ्कितं पद्यं प्रस्तौति-

**सोऽयं सम्प्रति चन्द्रगुप्ततनयश्चन्द्रप्रकाशो युवा**
**जातो भूपतिराश्रयः कृतधियां दिष्टया कृतार्थश्रमः।**

अस्य वृत्तिभागे वामनः स्वयं लिखति - 'आश्रयःकृतधियाम् इत्यस्य च सुबन्धुसाचिव्योपक्षेपपरत्वात् साभिप्रायत्वम्।' अत्र गद्यांशेऽस्मिन् 'चन्द्रगुप्ततनयः' इत्यनेन अभिप्रायः अस्ति यत् चन्द्रगुप्त द्वितीयस्य पुत्रः कुमारगुप्तः प्रथमः। 415 ई. यावत् कुमारगुप्तस्य शासनकालः वर्तते। अथ तेन च सुबन्धुः मन्त्रित्वेन नियुक्तः। निश्चितरूपेण सुबन्धुः अपि

प्राप्तयौवनः स्यात्। तेन चन्द्रगुप्तद्वितीयविक्रमादित्यशासनमपि दृष्टं स्यात् यस्य च वर्णनं वासवदत्तयाः प्रास्ताविकपद्ये कृतम्। अतः सुबन्धोः कालः अनेनाधारेण पञ्चमं शताब्दं सिद्ध्यति। एतदतिरिच्य उत्कलिका प्रायस्य गद्यस्य उदाहरणरूपेणापि वामनः वासवदत्तायाः वनमार्गवर्णनस्य प्रसङ्गम् उल्लिखति। अत एव ज्ञायते यत् वामनकाले सुबन्धुः एकः प्रसिद्धः गद्यकविः इति ख्यातः आसीत्। वामनकालः 800 ई. वर्षस्य समीपवर्ती विद्यते।

**हर्षचरिताधारेण -**

बाणभट्टेन हर्षचरिते 'कवीनामगलद्दर्पो नूनं वासवदत्तया' इत्थं विलिख्य वासवदत्तायाः उल्लेखः विहितः तत्रैव बृहत्कथावासवदत्तयोः अपेक्षया अपि कादम्बरी उत्कृष्टा इति प्रदर्शितम्। बाणः हर्षवर्धनराज्याश्रितः कविः आसीत्। हर्षवर्धनस्य कालः सप्तमशताब्दस्य पूर्वार्द्धः मन्यते।

**अभिनवभारत्याः आधारेण -**

अभिवनगुप्तेन नाट्यशास्त्रटीकायाम् अभिनवभारत्यां 'नाट्यायित' इत्यस्य दृष्टान्तस्य रूपे 'वासवदत्त नाट्यधारा' नामकस्य रूपकस्य उल्लेखः कृतः, अस्य कविः सुबन्धुः इत्यपि तत्र दर्शितम्। निश्चितरूपेण अभिनवुप्तकाले सुबन्धुः पर्याप्तां प्रसिद्धिं गतः स्यात्। अभिनवगुप्तस्य कालः 180-1010 ई. वर्षम् इति अनुमीयते।

**नाट्यदर्पणाधारेण -**

रामचन्द्रगुणचन्द्रकृते नाट्यदर्पणे अपि 'वासवदत्तनाट्यधारा' नामकस्य रूपकस्योल्लेखः प्राप्यते। रामचन्द्रस्य कालः 1110-1175 ई. वर्षमिति अनुमीयते।

**'राघवपाण्डवीयम्' इत्यस्य आधारेण -**

राघवपाण्डवीये कविराजेन सुबन्धोः उल्लेखः इत्थं-

**कृतः** -

सुबन्धुर्बाणभट्टश्च कविराज इति त्रयः।
वक्रोक्तिमार्गनिपुणाः चतुर्थो विद्यते न वा॥

इति कथ्यते।

कविराजस्य कालः द्वादशशताब्दं वर्तते अत्रापि सुबन्धोः नाम बाणात् पूर्वं प्राप्यते। येन सुबन्धुः बाणस्य पूर्ववर्ती इति सिद्ध्यति।

उपर्युक्तानां विवेचनानाम् आधारेण सिद्ध्यति यत् सुबन्धोः कालस्य इदमित्थं निर्धारणं न सम्भवति परं तस्य कालस्य पूर्वसीमा पञ्चमशताब्दस्य उत्तरार्द्धः, अपरसीमा षष्ठशताब्दस्य पूर्वार्द्धः विद्यते।

**जीवनवृत्तम्**

सुबन्धोः स्थानविषये निश्चितरूपेण किमपि वक्तुं न शक्नुमः। पूर्ववृत्तानुसारं यदि सुबन्धुना कुमारगुप्तप्रथमस्य राजसभायां मन्त्रिपदम् अलङ्कृतं तर्हि अस्य स्थानं मध्यभारतं भवितुम् अर्हति। सुमेरुः मन्दारपर्वतः रेवा, यमुना, विन्ध्यः, मालवप्रदेश स्त्रियः इत्यादीनां वर्णनाधारेण अपि अस्य स्थानं मध्यभारतमेव भवितुमर्हति। डा. भोलाशङ्करः व्यासः अपि सुबन्धुं मध्यभारतीयं मन्यते। श्रीमान् मनमोहनः घोषवर्यः सुबन्धुं बङ्गदेशीयं मन्यते यतः ग्रन्थे नैकेषु स्थानेषु सुबन्धुना मत्स्यानां सुन्दरीवृक्षाणां च वर्णने गौडीशैली प्रयुक्ताऽस्ति। केचन विद्वांसस्तु महाभागमेनं कश्मीरदेशीयमपि मन्यन्ते।

वस्तुतस्तु उपर्युक्तानि सर्वाण्यपि मतानि अनुमानाधारितानि वर्तन्ते। सुबन्धुः को देशीयः स्यात् इत्यपि अनुसन्धानस्य विषयः अस्ति।

**धर्मः, परिवारः, वंशपरम्परा च**

सुबन्धुना वासवदत्तायाः प्रास्ताविकपद्ययोः क्वचित् श्रीकृष्णः स्मृतः, क्वचिदेकस्मिन् पद्ये शिवः। परन्तु वासवदत्तायाः कथानके तेन सर्वाधिकः विष्णुः स्मृतः, विष्णोः अवताराणाम् उपमानरूपेण वर्णनं च कृतम्। अनेन आधारेण सिद्ध्यति यत् सुबन्धुः वैष्णवः आसीत्।

**कर्तृत्वम्**

सुबन्धोः 'वासवदत्ता' इति एका कृतिरेव उपलभ्यते। अनया कृत्या एव संस्कृतगद्यसाहित्ये सुबन्धुना महत्त्वपूर्णं स्थानं प्राप्तम्। अत्र नेदं महत्त्वपूर्णं चेत् सुबन्धोः कति कृतयः प्राप्यन्ते, अपितु महत्त्वपूर्णम् एतदस्ति यत् तेन गद्यसाहित्ये कथाविधायां नवीनानि प्रतिमानानि प्रस्थापितानि। उपलब्धसंस्कृतकथाकारेषु सुबन्धुः सर्वप्रथमः। तेन प्रयुक्ता श्लेषानुप्रणीतायाः उपमायाः तथा उत्प्रेक्षायाः शैली संस्कृतसाहित्याकाशे निःसन्देहम् अनुपमा विद्यते। प्रायः दृश्यते यत् श्लेषकारणात् कवित्वं कृत्रिमं भारयुक्तं च प्रतिभाति परन्तु वासवदत्तायां स्वाभाविकता, रसपेशलता, वर्णननैपुण्यम्, कथानकस्य अविच्छिन्नता, सर्वमेतत् मनः आहलादयति। तेनैव सुबन्धुना परवर्तिकवीनां दण्डिबाणभट्टादीनां गद्यकाव्यस्य मार्गः प्रशस्तः कृतः। दण्डिबाणयोः रचनायां सुबन्धोः पर्याप्तः प्रभावः दृष्टुं शक्यते। विशेषतः बाणस्योपरि कथानकस्य दृष्ट्यापि सुबन्धोः पर्याप्तः प्रभावः दृश्यते।

**स्वाध्यायः**

**1. रिक्तस्थानपूर्तिं कुरुत।**

(1) सुबन्धुना विरचितग्रन्थाः ........ सन्ति। (चत्वारः, पञ्च, त्रयः)

(2) सुबन्धोः मतानुसारं ........ शासने कवेः काव्यानां च स्थितिः उत्तमा आसीत्। (भोजस्य, भतृहरेः विक्रमादित्यस्य)

(3) पाश्चात्यविदुषां मतानुसारं बृहत्कथायाः रचनाकालः ........ । (तृतीयशताब्दं चतुर्थशताब्दं वा, प्रथमशताब्दं तृतीयशताब्दं वा)

(4) अर्थप्रौढिः ........ प्रकारात्मिका भवति। (पञ्च, षड्, सप्त)

(5) सुबन्धुः ........ शासनेमन्त्रित्वेन नियुक्तः। (विक्रमादित्यस्य, कुमारगुप्तस्य, हर्षस्य)

(6) 'वासवदत्तनाट्यधारा' नामकस्य रूपकस्योलेखः ........ प्राप्यते। (साहित्यदर्पणे, हर्षचरिते, नाट्यदर्पणे)

(7) विदुषां मतानुसारं सुबन्धुः प्रायः ........ । (कश्मीरीयः, बङ्गदेशीयः, मतमतान्तरम्)

**2. एकवाक्येन उत्तरं यच्छत।**

(1) भारतीयेतिहासे विक्रमादित्यनाम्ना कति राजानः उपलभ्यन्ते?

(2) सुबन्धुना वासवदत्तायां कस्य बौद्धविदुषः उल्लेखः कृतः?

(3) पाश्चात्यविदुषां मतानुसारं बृहत्कथायाः रचनाकालः कः?

(4) 'वासवदत्तानाट्यधारा' नामकस्य रूपकस्योल्लेखः कुत्र लभ्यते?

(5) सुबन्धुना वासवदत्ताकथानके को देवः आधिक्येन स्मृतः?

(6) सुबन्धुना का शैली प्रयुक्ता अस्ति?

(7) सुबन्धुः मध्यभारतीयः आसीदिति कः मन्यते?

**3. टिप्पणीं लिखत।**

(1) सुबन्धुः।

(2) सुबन्धोः जीवनवृत्तम् कालश्च।

(3) सुबन्धोः कर्तृत्वम्।

●

# ४

# वासवदत्ता

**प्रस्तावना**

संस्कृतसाहित्ये 'वासवदत्ता' कथाप्रकारकं गद्यकाव्यं वर्तते। कथायाम् आर्या-वक्त्र - अपवक्त्राणां छन्दसां प्रयोगः प्रारम्भे भवति। वासवदत्तायाः आहत्य त्रयोदशप्रास्ताविकपद्येषु द्वादशपद्यानि आर्या छन्दसि विद्यन्ते। एतदतिरिक्तम् उपजाति-शार्दूलविक्रीडित - शिखरिणी - स्रग्धरादीनां छन्दसामपि प्रयोगः काव्ये विहितः। कथायाः प्रारम्भिकपद्येषु सज्जनप्रशंसा दुर्जननिन्दा कवेः वंशस्य च वर्णनं भवति। सुबन्धुना वासवदत्तायाः प्रास्ताविकेषु पञ्चसु पद्येषु सज्जनानां प्रशंसा दुर्जनानां निन्दा च कृता। सुबन्धुः वासवदत्तायां न क्वापि स्ववंशस्य उत आत्मनः विषये चर्चाम् अकरोत्। सः केवलम् अन्तिमे पद्ये आत्मानं 'सुजनैकबन्धुः' अर्थात् सज्जनानां बन्धुरिति भावयति।

कथायां मुख्यकथायाः अवतरणाय अवान्तरकथायाः सन्निवेशो भवति। वासवदत्तायां कविना रामायणमहाभारत-पुराणसाहित्येभ्यः उपमानानि प्रस्तूय बह्वीनाम् अवान्तरकथानां निर्देशः श्लेषमाध्यमेन कृतः।

कथायां कथावस्तु सरसं भवति। वासवदत्ता विशुद्धरूपेण प्रणयकथा विद्यते। अस्याः अङ्गीरसः विप्रलम्भशृङ्गारः वर्तते। मध्ये मध्ये वीर-रौद्रीदीनां रसानामपि समाहारः कविना अतीव नैपुण्येन कृतः, अन्ते च संयोगशृङ्गारसेन सह काव्यस्य सुखदा परिसमाप्तिः भवति। महाकविना सुबन्धुना कथाप्रस्तुतिः अतीव रुचिपूर्णशैल्या कृता अत एव कुत्रापि रसस्य विच्छेदो न भवति। अस्याः कथायाः सम्पूर्णमपि वृत्तं कविना वर्णितम्। कथा कविकल्पिता भवति। सुबन्धुना विरचितं वासवदत्तायाः कथानकमपि पूर्णतः कविकल्पितमेव। अत एव तस्याः कथायाः स्रोतः भारतीयवाङ्मये न क्वापि उपलभ्यते। न केवलं कथानकम् अपितु अस्याः सर्वेषां पात्राणां नामान्यपि यथार्थानि साभिप्रायाणि च सन्ति।

**कथावस्तु**

चिन्तामणिर्नामकः कश्चन अभूतपूर्वः नृपः बभूव। तस्य पुत्रः कन्दर्पकेतुः अस्याः कथायाः नायकः अस्ति। सः स्वाश्रितजनानाम् आनन्ददाता, राजसुखभोक्ता, अनेकासां युवतीनाम् आनन्दकर्ता, मतिमान्, निर्मलहृदयः, विष्णुचरणावलम्बकः कुवलयनिर्मिताभूषणानां धारणकर्ता, अद्वितीयखड्गधारी, राज्ञां समूहे भयोत्पादनकर्ता च आसीत्।

कस्मिंश्चित् दिवसे उषःकाले स्वप्नावस्थायां कन्दर्पकेतुः अष्टादशवर्षीयां कन्यामेकामपश्यत्। प्रीत्या विस्फारितनयनाभ्यां तस्याः सौन्दर्यस्य पानं कुर्वतः कन्दर्पकेतोः चिरकालसेव्यमाना निद्रा ईर्ष्यावशात् भग्ना। जागरणा-नन्तरम् अस्वस्थः इव जातः सः। स्वप्ने तां सुन्दरीं दृष्ट्वा तस्मादेव कालात् सः निर्निद्रः सञ्जातः। आकाशदिशि बाहू प्रसार्य 'आगच्छ, आगच्छ, प्रिये। मा गच्छ' इति वदन् दिक्षु उपदिक्षु च चित्रितामिव, नेत्रयोः उत्कीर्णाम् इव, हृदये स्थापिताम् इव तां प्रियतमाम् आह्वयति स्म। तदुत्तरं तस्यामेव शय्यायां निलीनो भूत्वा सर्वेषां परिजनानाम् आगमनं निषिद्ध्य, कपाटौ कीलयित्वा, ताम्बूलादीनि उपभोगवस्तूनि त्यक्त्वा दिनं यापितवान्।

कन्दर्पकेतोः प्रियवयस्यः मकरन्दः आसीत्। यदा कन्दर्पकेतुः कामदेवस्य बाणप्रहारेण परवशः जातः तदा केनापि प्रकारेण असौ मकरन्दः तस्य प्रासादं प्रविश्य कन्दर्पकेतुम् अवदत् - 'हे सुहृद्। कथं त्वया ईदृशः अनुचितः असाधुजनैः सेव्यमानः मार्गः आश्रितः ?' तव ईदृशाचरणम् अवलोक्य सज्जनाः संशयान्विताः सन्ति। यदनुचितस्य अनिष्टस्य च मार्गस्य आचरणं त्वमधुना कुर्वन् असि, तदाचरणं दुष्टाः एव कुर्वन्ति। तदनु सः विस्तरेण दुष्टानां हृदयस्य सज्जनानां चरितस्य च वर्णनं करोति। मकरन्दस्य विस्तृतम् उपदेशं श्रुत्वा कन्दर्पकेतुः कथयति यत् 'हे मित्र! मादृशानां जनानां चित्तवृत्तिरपि शतशः शोकैः व्याकुला भवति। नायमुपदेशस्य कालः। ममाङ्गानि ज्वलन्ति इव, इन्द्रियाणि दहन्तीव, स्मृतिः नश्यमानेवास्ति।

अतः अधुना अनया कथया को लाभः? यदि त्वं मम बालसखा, मम सुखदुःखयोः सहभागी असि चेत् मया सह चल।' इत्थं कन्दर्पकेतुः सानुनयं मकरन्दं विनिवेदयति। तौ उभावपि परिजनेभ्यः आत्मानं गोपायन्तौ तां सुन्दरीम् अन्वेष्टुं नगरात् जग्मतुः।

अन्वेषन्तौ तौ एकदा विन्ध्यपर्वतं प्राप्तवन्तौ। तत्र रात्रौ निर्निद्रः कन्दर्पकेतुः एकस्याः सारिकायाः वचांसि अश्रौषीत्। या च सारिका स्वपतिं प्रति रुष्टा आसीत्। तस्मात् कारणात् सा स्वपतिं निर्भर्त्सयामास। पत्युः स्वगृहं प्रति अतिविलम्बेन रात्रौ आगमनकारणात् सा क्रुद्धा आसीत्। सारिकायाः क्रोधम् अवलोक्य शुकः अवदत् 'हे कल्याणि! क्रोधं त्यज। अद्य मया अपूर्वा काचित् कथा श्रुता प्रत्यक्षीकृता च। तत्कारणेन अद्य एतावान् विलम्बः जातः।' इदं श्रुत्वा सारिकायाः कुतूहलम् उद्भूतम् ततश्च पुनः पुनः आग्रहेण शुकः कथाकथनं प्रारभत। शुकः सविस्तरं कुसुमपुरस्य वर्णनं कुर्वन् अवोचत् यत् 'कुसुमपुरे शृङ्गारशेखरो नाम कश्चन नृपः निवसति। तस्यान्तःपुरे अनङ्गवती नामिका प्रधाना राज्ञी वर्तते। यौवनस्य अन्तिमावस्थायां द्वयोः सौभाग्यवशात् अद्वितीयायाः सुन्दर्याः पुत्र्याः जन्म अभवत्। सा कन्या ''वासवदत्ता'' इति।

प्राप्तयौवना सा कन्या विवाहोचिते कालेऽपि विवाहपराङ्मुखा आसीत्। तदनन्तरं कन्यायाः सखिभ्यः स्वपुत्र्याः वासवदत्तयाः अभिप्रायं ज्ञात्वा श्रृङ्गारशेखरः स्वयंवरमायोजयत्। तत्र समस्तभूमण्डलस्य राजपुत्राः आहूताः। बहवः राजकुमाराः तत्र भागम् अग्रहणान्। विरलहृदया वासवदत्ता प्रतिक्षणमपि एकैकं कुमारं निराकुर्वती ''कर्णी'' इत्याख्यात् स्थात् अवतीर्णा। तदनन्तरं वासवदत्ता तस्यामेव रात्रौ कञ्चन अतीव सुन्दरं राजोचितैः सद्गुणैः समन्वितम् एकं राजकुमारम् अद्राक्षीत्। इत्थं स्वप्नेऽपि विलोक्य सा बाला सर्वगुणसमन्वितं तं प्रति आसक्ता बभूव। तमेव युवकं कामयमाना सा मूर्च्छिता अभूत्। सखीनां प्रयत्नेन प्राप्तचेतना सा स्वकीयां विश्वस्तां दूतीं सारिकां तमालिकां तस्य युवकस्य पार्श्वे स्वप्रगाढं स्नेहं प्रख्यापयितुं प्रेषितवती। सा तमालिका मया सहैव ततः प्रस्थिता, अस्मिन्नेव वृक्षे उपविष्टा अस्ति इत्युक्त्वा सः शुकः तूष्णीम् अतिष्ठत्।

शुकस्य सर्वविधं कथनं श्रुत्वा मकरन्दः सानन्दम् उत्थाय तमालिकाम् अन्विष्य आहूय च वृत्तं सर्वम् अवोचत्। तमालिकया प्रणम्य तस्मै पत्रिका प्रदत्ता। मकरन्दः तामुद्घाट्य स्वयमेव अपठत्। पत्रिकावचनानि श्रुत्वा कृतामृतपानः इव कन्दर्पकेतुः प्रसन्नो बभूव। तदनन्तरं विना कञ्चित् प्रत्यवायं कन्दर्पकेतोः वासवदत्तयाश्च पाटलिपुत्रनाम्नि नगरे समागमो भवति। किन्तु कन्दर्पकेतुः तदा अतीव दुःखी जातः यदा सः ज्ञातवान्, तस्याः वासवदत्तायाः कौमार्येण उद्विग्नचित्तः तस्याः पिता वासवदत्तायाः विवाहं विद्याधराणां राज्ञा पुष्पकेतुना साकं कर्तुं निर्णीतवानस्ति। अस्मादेव कारणात् वासवदत्ता - कन्दर्पकेतू उभावपि एकं तन्त्रमयम् 'मनोजवम्' अश्वमारूह्य गुप्तरूपेण विन्ध्याचलपर्वतं जग्मतुः। तत्र द्वावपि सुप्तौ, रात्रिः व्यतीता।

ततश्च निद्रायाः जागरितः कन्दर्पकेतुः लतागृहे स्वप्रियां न पश्यति। इतस्ततः दृष्टिपातं कुर्वन् वृक्ष-लता-शिखर-आकाश-दिक्-पर्णसमूहादिषु पश्यन् परिभ्रमन् च विरहाग्निना दह्यमानः सन्तप्तहृदयः विलापं करोति स्म। वासवदत्ता तं कन्दर्पकेतुं परित्यज्य क्वचित् गता इति मत्वा अतीव दुःखाक्रान्तः कन्दर्पकेतुः समुद्रे निमज्य आत्मघातं चिकीर्षति स्म। तं कन्दर्पकेतुं तथा व्यथितम् आत्मघातं च कर्तुम् उद्यतं दृष्ट्वा एका आकाशवाणी अभूत् येन कन्दर्पकेतुः आश्वस्तः बभूव यत् 'सः समयान्तरे स्वप्रेयसीं वासवदतां पुनरपि प्राप्स्यति' इति। आकाशवाणीं श्रुत्वा आत्मघातविचारं त्यक्त्वा सः प्रियासमागमोत्सुकः सञ्जातः। तदर्थं शरीरं पोषयितुं कांश्चन भोज्यपदार्थान् अन्विषन् सः कच्छप्रदेशनिकटवर्तिनं वनं जगाम। ततश्च फलमूलादीनि भक्षयन् सः कञ्चन कालं यापितवान्। व्यतीते वर्षाकाले शरत्कालः सन्निहितः। अस्मिन् कालावधौ अटन् कन्दर्पकेतुः काञ्चित् शिलापुत्तलिकां ददर्श। दृष्टवा च तां शीलापुत्तलिकां सोऽचिन्तयत् यत् 'इयं मम प्रियायाः अनुकरणशीला इव प्रतिभाति' इति चिन्तयन्नसौ हस्तेन तां पस्पर्श, स्पर्शमात्रेणैव शिलाभावं परित्यज्य सा पुत्तलिका वासवदत्तारूपेण प्रकटिता। तां वीक्ष्य कन्दर्पकेतुः अमृतसागरे निमग्नः इव। कथमेवम् किं जातम्? कुत्र गता त्वम्? इति कन्दर्पकेतोः प्रश्नान् श्रुत्वा वासवदत्ता दीर्घं निःश्वस्य अवदत् 'आर्यपुत्र! मादृश्याः पुण्यहीनायाः मन्दभागिन्याः कृते भवान् राज्यं त्यक्त्वा साधारणमनुष्यः इव परिभ्रमन् दुःखानि कष्टानि च सहते, तदहं शब्दैः वक्तुं

न शक्नोमि, मनसा चिन्तयितुमपि न शक्नोमि। तस्मिन् काले उपवासकारणेन तृषया बुभुक्षया च व्याकुलः भवान् सुप्तः आसीत्, तदा अहं जागरिता अभवम्। भवत्कृते फलादीनि आनेष्यामीति विचिन्त्य फलान्यन्वेष्टुमहं वनं जगाम तदैव तत्र मया वृक्षेषु निगूढं सैन्यमवलोक्य चिन्तितम् 'किं ममान्वेषणाय पित्रा प्रेषितं सैन्यमिदं वा?' आर्यपुत्रस्य सैन्यं वा? इति चिन्तयन्ती आसम् तदा गुप्तचरद्वारा कथितं वृत्तान्तं श्रुत्वा दुरादेव किरातः मां प्रति धावन् आगच्छन् आसीत्। अपरश्च सेनापतिः तनैव प्रकारेण सेनया सह मृगयार्थं तत्र आगतः आसीत्, सोऽपि इदं श्रुत्वा मां प्रति अधावत्। तदा माया चिन्तितं यत् यदि वृत्तमिदं सम्पूर्णं भवतसमक्षम् आगत्य निवेदयिष्यामि तर्हि योद्धुमुद्युक्तं भवन्तम् एकाकिनम् एते सर्वे मारयिष्यन्ति, यदि न निवेदयिष्यामि चेत् एते मामेव मारयिष्यन्ति। इत्थं चिन्तनं कुर्वती आसं तदैव मासखण्डभोक्तुकामयोः गृध्रयोः युद्धम् इव द्वयोः सैन्ययोः मध्ये युद्धं प्रारब्धम्। अन्ततो गत्वा परस्परयुद्धेन द्वयोरपि सैन्ययोः विनाशः जातः। ततश्च यस्य मुनेः आश्रमे भीषणं युद्धमिदम् अभूत् सः मुनिवरः पुष्पादीनि सङ्गृह्य तत्रागतः सः योगदृष्ट्या समस्तं वृत्तं ज्ञात्वा 'तव कारणेनैव मम आश्रमोऽयं विनष्टः, तस्मात् त्वं शिलामयी पुत्तलिका भव' इति कुपितो भूत्वा मह्यं शापम् अददात्। ततश्च कोमलहृदयस्य अस्यानुग्रहेण आर्यपुत्रस्य भवतः कृपाप्रसादात् च मुनेः प्रार्थनायाः अनन्तरं सः मम शापविमोचनविधौ भवतः स्पर्शेण पुनश्चेतनां प्राप्स्यामि इति अवधिं दत्तवान्। अर्थात् शिलामय्यायाः मम स्पर्शं भवान् यदा कुर्यात् तदैवाहं स्वकीयं वास्तविकं स्वरूपं प्राप्स्यामीति।

इत्थं प्रकारेण वासवदत्तायाः समस्तं वृत्तं कन्दर्पकेतुः अश्रौषीत्। अनन्तरं च वासवदत्तां गृहीत्वा स्वमित्रेण मकरन्देन साकं कन्दर्पकेतुः स्वराजधानीं जगाम, यत्र च चिरकालं सुखपूर्वकं न्यूषतुः।

## स्वाध्यायः

**1. रिक्तस्थानापूर्तिं कुरुत।**

(1) वासवदत्तायाः शैली ......... विद्यते। (गद्यमयी, पद्यमयी, गद्यपद्यमयी)

(2) सुबन्धुः आत्मानं भावयति .........। (परपीडाहरः, कथाकारः, सुजनैकबन्धुः)

(3) वासवदत्ताकथानकं ......... वर्तते। (खण्डकाव्यम्, प्रणयकथा, कविकलिप्तम्)

(4) कन्दर्पकेतुः ......... पुत्रः। (चिन्तामणेः, मकरन्दस्य, शृङ्गारशेखरस्य)

(5) कन्दर्पकेतुः .........। (शिवानुयायी, शक्तिपूजकः, विष्णुभक्तः)

(6) कन्दर्पकेतुमकरन्दयोः ......... सम्बन्धः। (स्वामीसेवकयोः, गुरू-शिष्ययोः, मैत्री)

(7) वासवदत्ताम् अन्विषन् कन्दर्पकेतुः ......... प्राप्नोति। (उज्जयिनीम्, कच्छप्रदेशं, विन्ध्याटवीम्)

(8) वासवदत्तायाः विश्वासभूता दती ......... । (अनङ्गवती, प्रियंवदा, तमालिका)

(9) वासवदत्ता कन्दर्पकेतवे ......... आनेतुं गता। (अश्वम्, खड्गम्, मुकुटम्, फलानि)

(10) ......... स्पर्शेण शीलापुत्रिका पुनश्चैतन्यं गता वासवदत्ता बभूव। (मकरन्दस्य, कन्दर्पकेतोः, शृङ्गारशेखरस्य, तमालिकायाः)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) वासवदत्तायां मुख्यो नायकः कः?

(2) स्वप्नजागरणानन्तरं कन्दर्पकेतोः स्थितिः कीदृशी जाता?

(3) निर्निद्रः कन्दर्पकेतुः किं शृणोति?

(4) वासवदत्ता कस्य पुत्री अस्ति?

(5) कः स्वयंवरम् आयोजयति?

(6) कुसुमपुरस्य वर्णनं कः करोति?

(7) कुसुमपुरस्य नृपस्य नाम किम्?

(8) वासवदत्तायाः स्वयंवरे राजकुमाराः कुतः आहूताः?

(9) वासवदत्तायाः विवाहः केन सह निर्धारितः?

(10) वासवदत्ता कस्मात् कारणात् शप्ता?

**3. पञ्चवाक्यैः टिप्पणीं लिखत।**

(1) कन्दर्पतुमकरन्दयोः मैत्री।

(2) वासवदत्ता

**4. सविस्तरम् उत्तरं देयम्।**

(1) कन्दर्पकेतुः कीदृशः आसीत्?

(2) कन्दर्पकेतुः केन कारणेन अस्वस्थः जातः?

(3) मकरन्दः मित्रं कथं बोधयति?

(4) वासवदत्ता किमर्थं वनं गता?

(5) मुनिवरः किमर्थं वासवदत्तायै शापम् अददात्?

●

# ५

# विश्वनाथः

**प्रस्तावना**

संस्कृतसाहित्यं द्विप्रकारकमस्ति तत् लक्ष्यग्रन्थाः (काव्यनाटकमहाकाव्यादीनि), लाक्षणिकग्रन्थाश्च। तत्र लाक्षणिकग्रन्थकर्तारः बहवः सन्ति, तेषु लाक्षणिकग्रन्थकर्तृषु अन्यतमः प्रमुखतमश्च वर्तते कविराजविश्वनाथः।

श्रीचन्द्रशेखरमहाकविचन्द्रसूनुः अष्टादशभाषावारविलासिनीभुजङ्गः, सहृदयगोष्ठिगरिष्ठानां श्रीमतां नारायण-दासानां पौत्रः, महाकविविश्वनाथः, आलङ्कारिकेष्वन्यतमः आसीत्। विश्वनाथस्य जीवनपरिचयः अन्यकवीनामिव प्रच्छन्नः वर्तते। तेन स्वस्य ग्रन्थे सङ्केतः प्रदत्तः तदनुसारं सः उत्कलदेश वासी (उडीशावासी) वैष्णवब्राह्मणः आसीत् इति ज्ञायते। अस्य जन्म पण्डितकुले अभवत्। 'महापात्रः' इति तस्य कुलोपाधिरासीत्। अयं न केवलं संस्कृतभाषायामेव विद्वान् आसीत्, अपि तु अष्टादशभाषासु निपुणः आसीदिति 'अष्टादशभाषावारविलासिनी' इत्यादिना स्वयमेव सूचयति। साहित्यदर्पणे विश्वनाथः उदाहरणरूपेणैकमेतादृशं स्वनिर्मितं पद्यमुद्धृतवान्, यस्य बह्वीषु भाषासु समान एवार्थो भवति। तच्च पद्यं यथा-

**''मञ्जुलमणिमञ्जीरे कलगम्भीरे विलाससरस्तीरे।**
**विरसासि केलिकीरे किमालि! धीरे च गन्धसमीरे॥''**

पद्यमिदं संस्कृतप्राकृतमागधशौरसेनीप्राच्यावन्त्यपभ्रंशेषु समानरूपमेव भवति। एवञ्च अनेकासु भाषासु यः निपुणः स 'कविराजः' इति काव्यमीमांसायां राजशेखरः वदति। अतः अयं कविराजविश्वनाथः इत्यपि प्रसिद्धः। यस्मात्कारणात् सन्धिविग्रहिकः प्रधानामात्य आसीत् तस्मात् एव कारणादस्य ब्राह्मणवंशावतंसता सूचिता भवति।

विश्वनाथस्य पितुः नाम चन्द्रशेखरः इति। साहित्यदर्पणे तस्योल्लेखं सः करोति यत्-

**श्रीचन्द्रशेखरमहाकविचन्द्रसूनु-**
**श्रीविश्वनाथकविराजकृतं प्रबन्धम्।**
**साहित्यदर्पणममुं सुधियो विलोक्य**
**साहित्यतत्त्वमखिलं सुखमेव वित्त॥**

**( सा.द. 10-99 )**

सोऽपि चन्द्रशेखरः चतुर्दशभाषाणां वेत्ता आसीत्। अपि च सः चन्द्रशेखरः पुष्पमाला एवं भाषार्णवः इति ग्रन्थरचनामकार्षीत्। विश्वनाथस्य पितामहस्य नाम श्रीनारायणः इति, सोऽपि महान् विद्वान् आसीत्। सः कलिङ्गमहाराजाधिराजस्य श्रीनरसिंहदेवस्य सभापण्डितः आसीत्। श्रीनारायणः शास्त्रार्थे विद्वांसं धर्मदत्तं जित्वा सकलसहृदयगोष्ठीगरिष्ठः बभूव, एवं श्रीनारायणः सर्वशास्त्रविशारदः सन्नपि रसशास्त्रस्य काव्यशास्त्रस्य मर्मज्ञः आसीत्। प्रसिद्धः विद्वान् दीपिकाकारः चण्डीदासः श्रीनारायणस्य अनुजः आसीत्। सोऽपि कवित्वे तथा काव्यालोचने सफलतां प्राप्य ''कविपण्डितमुख्यः'' सञ्जातः। रसप्रकरणे स्वयं विश्वनाथः वक्ति यत् -

**''इहास्मत्पितामहानुजकविपण्डितमुख्यचण्डीदासैरुक्तम्''**

पितामह इव विश्वनाथोऽपि राज्याश्रयं समवाप्तवान्। तस्य राज्याश्रयदाता श्रीनरसिंहस्य पुत्रः स्यात्। विश्वनाथस्य शिक्षा तथा दीक्षा श्रीनारायणद्वारा गृहे सम्पन्ना, अतः काव्यप्रकाशदर्पणे सः गौरवेण आत्मानं ''श्रीनारायणचरणारविन्दमधुकरः'' इति कथयति। एवञ्च विश्वनाथः आलङ्कारिकः, रससम्प्रदायसमर्थकाचार्यः, सङ्गीतविद्याधरः, कलाविद्यामालतीमधुकरः, सान्धिविग्रहिकः, नीतिशास्त्रविचक्षणः, कविराजः च आसीत्।

**समयः**

विश्वनाथः ''तददोषौ शब्दार्थौ......'' इति मम्मटाचार्यस्य काव्यलक्षणोल्लेखम् अकार्षीत्। पण्डितराजजगन्नाथः स्वग्रन्थे रसगङ्गाधरे विश्वनाथस्योल्लेखं करोति, अतः विश्वनाथस्य समयः मम्मटात् परम्, एवं जगन्नथात्पूर्वम् इति तु निश्चप्रचम्। मम्मटस्य समयः एकादशशताब्दौ एवं जगन्नाथस्य समयः षोडशशताब्दौ निश्चीयते। पुनश्च साहित्यदर्पणस्य चतुर्थे परिच्छेदे स्थितः अयं श्लोकः विश्वनाथस्य कालनिर्धारणे अस्मभ्यं साहाय्यमाचरति यथा-

**सन्धौ सर्वस्वहरणं विग्रहे प्राणनिग्रहः।**
**अल्लावदीननृपतौ न सन्धिर्न च विग्रहः॥**

**(सा.द. : 4)**

अल्लावदीनस्य मृत्युः ख्रिस्ताब्देः 1317 तमे वर्षे अभवत्, अतः अस्य विश्वनाथस्य समयः चतुर्दश्यां शताब्द्यां निश्चीयते।

**कृतयः**

आचार्यविश्वनाथस्य नवग्रन्थाः सन्ति-

| ग्रन्थः | प्रकारः |
|---|---|
| (1) राघवविलासः | महाकाव्यम् |
| (2) नरसिंहविजयः | महाकाव्यम् |
| (3) कंसवधम् | काव्यम् |
| (4) कुवलयाश्वचरितम् | प्राकृतकाव्यम् |
| (5) प्रभावतीपरिणयः | नाटकम् |
| (6) चन्द्रकला | नाटिका |
| (7) प्रशस्तिरत्नावली | षोडशभाषानिर्मितकरम्भकम् |
| (8) साहित्यदर्पणः | काव्यशास्त्रीयो ग्रन्थः |
| (9) काव्यप्रकाशदर्पणः | काव्यप्रकाशटीका |

**स्वाध्यायः**

**1. रिक्तस्थानपूर्तिं कुरुत।**

(1) संस्कृतसाहित्यं ......... प्रकारकमस्ति। (द्वि, त्रि, पञ्च)

(2) विश्वनाथस्य कुलोपाधिः ......... आसीत्। (महापात्रः, महामात्रः, महागात्रः)

(3) लाक्षणिकग्रन्थकर्तृषु ......... प्रमुखतमः विद्यते। (कालिदासः, विश्वनाथः, दयानाथः)

(4) विश्वनाथः ......... भाषासु निपुणः आसीत्। (चतुर्दश, सप्तदश, अष्टादश)

(5) विश्वनाथस्य पितुः नाम ......... आसीत्। (शशिशेखरः, चन्द्रशेखरः, सोमशेखरः)

(6) चन्द्रशेखरः ......... भाषाः जानाति स्म। (चतुर्दश, षोडश, अष्टादश)

(7) नारायणः ......... सभापण्डितः आसीत्। (नरसिंहदेवस्य, देवदत्तस्य, देवराजस्य)

(8) विश्वनाथस्य समयः ......... शताब्दिरिति निश्चीयते। (द्वादश, चतुर्दश, पञ्चदश)

(9) चन्द्रकला ......... । (लाक्षणिकग्रन्थः, स्तोत्रकाव्यम्, नाटिका)

(10) राघवविलासः ......... । (खण्डकाव्यम्, महाकाव्यम्, गीतिकाव्यम्)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) श्रीचन्द्रशेखरमहाकविचन्द्रसूनुः कः?

(2) विश्वनाथस्य राज्यस्य नाम किम्?

(3) राजशेखरः कस्मिन् ग्रन्थे 'कविराजः' इति वदति?

(4) विश्वनाथस्य पितामहस्य नाम किम्?

(5) दीपिकाकारः कः?

(6) श्रीनारायणस्य अनुजः कः?

(7) ''तददोषौ शब्दार्थौ........'' इति केनोक्तम् काव्यलक्षणम्?

(8) विश्वनाथेन कति ग्रन्थाः विरचिताः?

(9) ''कुवलयाश्वचरितम्'' कीदृशं काव्यम्?

(10) नरसिंहविजयः कीदृशं काव्यम्?

**3. टिप्पणीं लिखत।**

(1) विश्वनाथस्य समयः।

(2) विश्वनाथस्य रचनाः।

**4. सविस्तरमुत्तरं दत्त।**

(1) साहित्यदर्पणानुसारेण चन्द्रशेखरः कः? सोल्लेखं परिचयं दत्त।

(2) विश्वनाथस्य समयं युक्तियुक्तं निर्धारयत।

(3) विश्वनाथस्य परिचयं दत्त।

**5. 'अ' विभागं 'ब' विभागेन सह योजयत।**

| अ | ब |
|---|---|
| (1) विश्वनाथः | काव्यम्। |
| (2) चन्द्रशेखरः | अष्टादशभाषावित्। |
| (3) चण्डीदासः | काव्यप्रकाशटीका। |
| (4) कंसवधम् | चतुर्दशभाषावित्। |
| (5) काव्यप्रकाशदर्पणः | दीपिकाकारः। |

●

# ६

# साहित्यदर्पणः

**प्रस्तावना**

कविराजस्य विश्वनाथस्य रचनासु सर्वाधिकप्रसिद्धः ग्रन्थः साहित्यदर्पणः, यत्र च काव्यतत्त्वानां विशदं विवेचनं कृतमस्ति। अस्य साहित्यदर्पणस्य अनेकाः टीकाः सन्ति यासु तत्पुत्रस्य अनन्तदासस्य लोचनटीका, रामचरणतर्कवागीशस्य विवृतिटीका, गोपीनाथस्य प्रभाटीका, माहेश्वरभट्टस्य विज्ञप्रियटीका, आचार्यशेषराजरेग्मीमहोदयस्य चन्द्रकलाटीका, आचर्यकृष्णमोहनशास्त्रिमहोदयस्य लक्ष्मीटीका च प्रसिद्धाः सन्ति। विश्वनाथेन रचितेषु ग्रन्थेषु काव्यशास्त्रीयो ग्रन्थः साहित्यदर्पणः। यद्यपि कविराजविश्वनाथः काव्यलक्षणादिषु काव्यप्रकाशकारस्य मम्मटाचार्यस्य विरोधी वर्तते, तथापि ग्रन्थरचनाशैलीं पश्यामः चेत् अयं विश्वनाथः मम्मटाचार्यस्य अनुसरणं करोतीव भाति। अस्मिन् साहित्यदर्पणे दश परिच्छेदाः सन्ति।

**प्रथमः परिच्छेदः**

अस्य परिच्छेदस्य नाम **काव्यस्वरूपनिरूपणम्** इति। आदौ ग्रन्थस्य निर्विघ्नपूर्वकपरिसमाप्तये वाग्देवीमुद्दिश्य मङ्गलाचरणं करोति। तत्पश्चात् ग्रन्थोऽयम् काव्यस्याङ्गम् अस्ति अतः काव्यप्रयोजनम् अस्यापि प्रयोजनम् इति मत्वा एवं च ''प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते'' इति न्यायेन चतुर्वर्गफलप्राप्तिरूपकं काव्यप्रयोजनं वक्ति। तदनु मम्मटाचार्यादारभ्य प्राचीनैराचार्यैरुक्त-काव्यलक्षणानि खण्डयित्वा रससम्प्रदायपरकः अयमाचार्यः स्वाभिमतं काव्यलक्षणं प्रस्तौति - ''**वाक्यं रसात्मकं काव्यम्**'' इति। साररूपतया जीवनाधायकतत्त्वेन रसस्वरूपेण युक्तं वाक्यं काव्यमित्यर्थः। रस्यते आस्वाद्यते इति रसः, इति रसशब्दस्य व्युत्पत्तिः तेन आस्वादविषयत्वात् रसादीनामपि ग्रहणं भवति। रसादयः यथा- (रसः) भावः, रसाभासः, भावाभासः, भावोदयः, भावसन्धिः, भावप्रशमः (भावशान्तिः), भावशबलता च। तदनु रसभावरसाभासयुक्तस्य वाक्यस्य काव्यत्वं भवतीति दिङ्मात्रं त्रिभिः उदाहरणैः स्पष्टयति। तत्पश्चात् दोषलक्षणं कथयति ''दोषास्तस्यापकर्षकाः'' गुणलक्षणं गदति ''उत्कर्षहेतवः प्रोक्ताः गुणालङ्काररीतयः'' एतेषां विशदं विवरणं सप्तमाष्टमनवमदशमपरिच्छेदेषु क्रियते। एवं रूपेण प्रथमपरिच्छेदः समाप्तिमेति।

**द्वितीयः परिच्छेदः**

अस्य परिच्छेदस्य नाम **वाक्यस्वरूपनिरूपणम्** इति। पूर्वस्मिन् परिच्छेदे ''वाक्यं रसात्मकं काव्यम्'' इत्युक्तम्। प्रथमद्वितीयपरिच्छेदयोः सङ्गतिसम्पादनाय परिच्छेदस्यास्य आरम्भः वाक्यस्वरूपकथनेन भवति। वाक्यस्वरूपं यथा - ''वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः'' इति। तदनु वाक्यमहावाक्यत्वेन वाक्यं द्विविधमिति प्रतिपादयति। परिच्छेदेऽस्मिन् रसस्वरूपं तृतीयपरिच्छेदे निरूपयिष्यते इत्यप्युक्तम्।

तदनन्तरम् अर्थाः त्रिविधाः इति प्रतिपाद्य शब्दशक्तिविचारः प्रस्तूयते। तत्र अभिधा-लक्षणा-व्यञ्जना चेति तिस्रः शब्दशक्तयः। तत्तदर्थबोधकाः शब्दाः अपि वाचकलक्षकव्यञ्जकत्वेन त्रिविधाः। तद्यथा अत्र कोष्ठके साररूपेण-

| व्यापारः / शक्तिः | शब्दः | अर्थः |
|---|---|---|
| अभिधा | वाचकः | वाच्यः |
| लक्षणा | लक्षकः | लक्ष्यः |
| व्यञ्जना | व्यञ्जकः | व्यङ्ग्यः |

तत्रादौ सङ्केतग्रहः कुत्र भवति इति चर्चा कृतास्ति। तत्पश्चात् लक्षणा आरभ्यते। विश्वनाथेन आहत्य लक्षणायाः अशीतिः भेदाः प्रोक्ताः। तदनु सप्रभेदं व्यञ्जनां प्रतिपादयति तत्र शाब्द्यार्थीभेदेन व्यञ्जना आदौ द्विधा प्रोक्ता, पुनः शाब्दीव्यञ्जना अभिधामूलाव्यञ्जना लक्षणामूलाव्यञ्जना चेति च द्विधा प्रोक्ता, तस्यामभिधामूलाव्यञ्जना एवञ्च तस्यां संयोगादयः शब्दनियामकाः सोदाहरणं प्रोक्ताः, पश्चात् आर्थीव्यञ्जना सकारिका सोदाहरणम् उपवर्णिता, अन्ते तात्पर्याख्यां वृत्तिं केचन (अभिहितान्वयवादिनः) स्वीकुर्वन्तीति वचसा परिच्छेदोऽयं परिसमाप्तः।

**तृतीयः परिच्छेदः**

अस्य परिच्छेदस्य नाम **'रसादिनिरूपणम्'** इति। पूर्ववचः प्रमाणेन तृतीये परिच्छेदे रसस्वरूपनिरूपणमादौ क्रियते। तदनन्तरम् आलम्बनविभावान्यतरनायकसामान्यलक्षणमुच्यते यथा-

**त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।**
**दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यवान्नेता॥**

**(सा.द. 3/30)**

सामान्यलक्षणमिदं नायकस्य नायिकायाश्च। नायकस्य आदौ प्रधानाः चत्वारः भेदाः प्रतिपादिताः सन्ति। ते यथा-

**धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च।**
**धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः॥**

**(सा.द. 3/31)**

तत्र धीरोदात्तः महाभारते युधिष्ठिरः, धीरोद्धतः वेणीसंहारे भीमसेनः, धीरललितः रत्नावल्यां वत्सराजः, धीरप्रशान्तः मालतीमाधवे माधवः इति दिङ्मात्रमुदाहरणम्।

तत्पश्चात् तस्य नायकस्य अष्टचत्वारिंशत् (48) भेदाः विशदं वर्णिताः सन्ति। नायकसाहाय्यान्, दूतान् च प्रतिपाद्य सात्त्विकगुणाः प्रतिपादिताः। तत्पश्चात् नायिकाभेदाः यथा -

**अथ नायिका त्रिभेदा स्वान्या साधारणा स्त्रीति**
**नायकसामान्यगुणैर्भवति यथासम्भवैर्युक्ता॥**

**(सा.द. 3/56)**

अनया रीत्या आदौ नायिकायाः भेदत्रयं प्रतिपाद्य नायिकायाः आहत्य चतुरशीत्युत्तरत्रिशतं (384) भेदाः सम्प्रोक्ताः। तत्पश्चात् अष्टाविंशतिप्रकारकाः (28) नायिकालङ्काराः प्रोक्ताः। तदनु अनुरागेङ्गितानि च प्रोक्तानि। तत्पश्चात् (त्रयस्त्रिंशत्) व्यभिचारिभावाः सलक्षणं प्रतिपादिताः, त्रयस्त्रिंशत् व्यभिचारिभावानां नामानि यथा-

**निर्वेदावेगदैन्यश्रमदमजडता औग्र्यमोहौ विबोधः**
**स्वप्नापस्मारगर्वा मरणमलसतामर्षनिद्रावहित्थाः।**
**औत्सुक्योन्मादशङ्काः स्मृतिमतिसहिता व्याधिसत्रासलज्जा**
**हर्षासूयाविषादाः सधृतिचपलताग्लानिचिन्तावितर्काः॥**

**(सा.द. 3/141)**

तत्पश्चात् नवरसाः सप्रभेदं सोदाहरणं प्रतिपादिताः नवरसानां नामानि यथा-

**शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।**
**बीभत्साद्भुत इत्यष्टौ रसाःशान्तस्तथा मतः॥**

**(सा.द. 3/182)**

तदनन्तरं रसेषु विरोधः तत्परिहारश्च, रसादयः च सविशदं प्रतिपादिताः परिच्छेदेऽस्मिन्।

**चतुर्थः परिच्छेदः**

अस्य परिच्छेदस्य नाम **ध्वनिगुणीभूतव्यङ्ग्यकाव्यभेदनिरूपणम्** इति। काव्यलक्षणोक्तशब्देषु क्रमशः वाक्यस्य रसस्य च विवरणं कृतम्, सम्प्रति काव्यम् इति शब्दः अवशिष्टः, अतः काव्यं द्विधा इति काव्यभेदकथनेन परिच्छेदस्यास्य आरम्भः भवति। तत्र सर्वादौ ध्वनिप्रधानम् उत्तमकाव्यं निरूपयति यथा-

**वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्॥**

**(सा.द. 4/01)**

यत्र वाच्यात् व्यङ्ग्यं प्रधानं चमत्कारि भवति तत्र ध्वनिकाव्यं तदेवोत्तमकाव्यमित्यर्थः। स च ध्वनिः अविवक्षितवाच्यध्वनिः (लक्षणामूलध्वनिः) विवक्षितान्यपरवाच्यध्वनिः (अभिधामूलध्वनिः) इति द्विधा।

अर्थान्तरसङ्क्रमितवाच्यध्वनि: अत्यन्ततिरस्कृतवाच्यध्वनिरिति अविवक्षितवाच्यध्वनि: द्विधा। संलक्ष्यक्रमव्यङ्ग्य: असंलक्ष्यक्रमव्यङ्ग्य: इति विवक्षितान्यपरवाच्यध्वनिरपि द्विधा। एवमाहत्य पञ्चपञ्चाशदुत्तरत्रिपञ्चाशच्छतं (5355) भेदा: निरूपिता:। यदि तदेव व्यङ्ग्यं वाच्यात् उत्तमम् अर्थात् चमत्कारि नास्ति चेत् गुणीभूतव्यङ्ग्यं मध्यमं भवति तल्लक्षणं यथा-

**अपरं तु गुणीभूतव्यङ्ग्यं वाच्यादनुत्तमे व्यङ्ग्ये।**

**( सा.द. 4/13 )**

तस्यापि गुणीभूतव्यङ्ग्यकाव्यस्य अष्टभेदा: सोदाहरणं समुपवर्णिता:। परिच्छेदस्यान्ते काव्यस्य तृतीयभेदस्य अधमकाव्यस्य (चित्रकाव्यस्य) स्वीकारे चर्चा विहिता अस्ति।

**पञ्चम: परिच्छेद:**

अस्य परिच्छेदस्य नाम **व्यञ्जनाव्यापारनिरूपणम्** इति। अस्मिन् परिच्छेदे कविराजविश्वनाथ: व्यञ्जनावृत्ते: निरूपणं करोति यथा-

**वृत्तीनां विश्रान्तेरभिधातात्पर्यलक्षणाख्यानाम्।**
**अङ्गीकार्या तुर्या वृत्तिर्बोधे रसादीनाम्॥**

**( सा.द. 5/1 )**

स्वं स्वमर्थं बोधयित्वा विरतासु अभिधा-लक्षणा-तात्पर्यवृत्तिषु वस्तु-अलङ्कार-रसरूपव्यङ्ग्यार्थबोधनाय यस्या: चतुर्थवृत्ते: स्वीकार: भवति सा व्यञ्जनावृत्ति: इति व्यञ्जनावृत्ते: तदावश्यकतायाश्च निरूपणं विशदविवरणेन सार्धमकार्षीत्।

**षष्ठ: परिच्छेद:**

अस्य परिच्छेदस्य नाम दृश्यश्रव्यकाव्यनिरूपणम् इति। काव्यस्योत्तममध्यमादिभेदा: चतुर्थपरिच्छेदे प्रोक्ता:, ''दृश्यश्रव्यत्वभेदेन पुन: काव्यं द्विधा मतम्'' इति अस्मिन् परिच्छेदारम्भे प्रोच्यते। परिच्छेदेऽस्मिन् रूपकस्य दश प्रकारा: प्रोक्ता: यथा-

**नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमा:।**
**ईहामृगाङ्कवीथ्य: प्रहसनं रूपकाणि दश॥**

**( सा.द. 6/3 )**

उपरूपकाणाम् अष्टादश (18) प्रकारा: प्रोक्ता: यथा-

**नाटिका त्रोटकं गोष्ठी सट्टकं नाट्यरासकम्।**
**प्रस्थानोल्लाप्यकाव्यानि प्रेङ्खणं रासकं तथा॥**
**संलापकं श्रीगदितं शिल्पकं च विलासिका।**
**दुर्मल्लिका प्रकरणी हल्लीशो भाणिकेति च॥**
**अष्टादश प्राहुरूपरूपकाणि मनीषिण:।**
**विना विशेषं सर्वेषां लक्ष्म नाटकवन्मतम्॥**

**( सा.द. 4-6 )**

पञ्च अर्थोपक्षेपका: प्रतिपादिता: यथा-

**अर्थोपक्षेपका: पञ्च विष्कम्भकप्रवेशकौ।**
**चूलिकाङ्कवतारोत्थ स्यादङ्कमुखमित्यपि॥**

**( सा.द. 6/54 )**

पञ्च अर्थप्रकृतय: यथा-

**बीजं बिन्दु: पताका च प्रकरी कार्यमेव च।**
**अर्थप्रकृतय: पञ्च ज्ञात्वा योज्या यथाविधि॥**

**( सा.द. 6/64 )**

पञ्च सन्धयः यथा-

**मुखं प्रतिमुखं गर्भो विमर्श उपसंहृतिः।**
**इति पञ्चाऽस्य भेदाः स्युः क्रमाल्लक्षणमुच्यते॥**

**( सा.द. 6/75 )**

तेषां सन्धीनां चतुःषष्ट्यङ्गानि च उपपादितानि। तत्पश्चात् चतस्रः वृत्तयः प्रतिपादिताः। अष्टादशोपरूपकाणां सलक्षणं सोदाहरणं निरूपणं कृतमस्ति। गद्यपद्यचम्पूमहाकाव्यखण्डकाव्यानां लक्षणप्रतिपादनेन परिच्छेदोऽयं समाप्यते।

**सप्तमः परिच्छेदः**

अस्य परिच्छेदस्य नाम **दोषनिरूपणम्** इति। ''दोषास्तस्यापकर्षकाः'' इति प्रथमपरिच्छेदे एव अगदत्। तदनुसारमस्मिन् परिच्छेदे दोषान् प्रतिपादितवान्। काव्यप्रकाशवदत्रापि पद-पदांश-वाक्य-अर्थ-रसदोषाः पञ्चधैव दोषाः इत्युक्त्वा, सप्रभेदं सोदाहरणमुपावर्णयत्। दोषाणां विषये अग्रे वक्ष्यते।

**अष्टमः परिच्छेदः**

अस्य परिच्छेदस्य नाम **गुणविवेचनम्** इति। ''उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः'' इति पूर्वमेव उद्देशकथनत्वात् क्रमशः ते प्रतिपाद्यन्ते। तत्राष्टमे प्रधानाः त्रयः गुणाः प्रतिपादिताः। यथा-

**माधुर्यमोजोऽथ प्रसाद इति ते त्रिधा॥**

**( सा.द. 8/1 )**

तत्र प्रथमस्य माधुर्यगुणस्य लक्षणं यथा-

**चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते।**
**संभोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात्॥**

**( सा.द. 8/2 )**

द्वितीयस्य ओजोगुणस्य लक्षणं यथा-

**ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते।**
**वीरबीभत्सरौद्रेषु क्रमेणाधिक्यमस्य तु॥**

**( सा.द. 8/4 )**

तृतीयस्य प्रसादगुणस्य लक्षणं यथा-

**चित्तं व्याप्नोति यः क्षिप्रं शुष्केन्धनमिवानलः।**
**स प्रसादः समस्तेषु रसेषु रचनासु च॥**

**( सा.द. 8/7 )**

तत्पश्चात् प्राचीनैः वामनादिभिः उक्ताः दशशब्दगुणाः दशार्थगुणाश्च एष्वेव त्रिषु अन्तर्भवन्ति इति प्रतिपादितम्।

**नवमः परिच्छेदः**

अस्य परिच्छेदस्य नाम **रीतिविवेचनम्** इति। वस्तुतः उक्तक्रमेण गुणानामनन्तरम् अलङ्काराणां प्रतिपादनं कर्तव्यमासीत्, परन्तु अलङ्काराणां सङ्ख्यागौरवात्, आदौ चतस्रः रीतयः एव प्रोक्ताः। रीतिलक्षणम् आदौ प्रस्तौति। यथा-

**पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत्।**
**उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्विधा॥**

**( सा.द. 9/1 )**

**वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा।**

तासां रीतीनां नामानि यथा- वैदर्भी, गौडीया, पाञ्चाली, लाटी च। वैदर्भीरीतेः लक्षणं यथा-

**माधुर्यव्यञ्जकैर्वर्णै रचना ललितात्मिका।**
**अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते॥**

**( सा.द. 9/2 )**

गौडीरीतेः लक्षणं यथा–

**ओजः प्रकाशकैर्वर्णैर्बन्ध आडम्बरः पुनः॥**

**समासबहुला गौडी॥**

**( सा.द. 9/3 )**

पाञ्चालीरीतेः लक्षणं याथा–

**वर्णैः शेषैः पुनर्द्वयोः।**

**समस्तपञ्चषपदो बन्धः पाञ्चालिका मता॥**

**( सा.द. 9/4 )**

लाटीरीतेः लक्षणं यथा–

**लाटी तु रीतिर्वैदर्भीपाञ्चाल्योरन्तरे स्थिता।**

**( सा.द. 9/5 )**

एवमत्र चतस्रः रीतयः तदुदाहरणानि च प्रोक्तानि।

**दशमः परिच्छेदः**

अन्तिमेऽस्मिन् परिच्छेदे अलङ्काराणां प्रतिपादनं करोति। सर्वादौ अलङ्कारलक्षणं गदति। यथा–

**शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः**

**रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥**

यथा अङ्गदादयः शरीरशोभातिशायिनः शरीरिणमुपकुर्वन्ति, तथानुप्रासोपमादयः शब्दार्थशोभातिशायिनो रसादेरुपकारकाः। अलङ्काराः अस्थिराः इत्यस्य नैषां गुणवदाश्यकी स्थितिरित्यर्थः। तत्र क्रमशः शब्दालङ्कारान् (यमकानुप्रासादीनलङ्कारान्), उभयालङ्कारान् (श्लेषपुनरुक्तवदाभासादीनलङ्कारान्), अर्थालङ्कारान् (उपमारूपकादीनलङ्कारान्) च प्रतिपादयति। तत्रापि शब्दपरिवृत्त्यसहत्वं शब्दालङ्कारत्वं, शब्दपरिवृत्तिसहत्वं अर्थालङ्कारत्वमिति च तयोः शब्दार्थालङ्कारयोः भेदः इति स्पष्टतां कुरुते। अन्ते च सङ्करसंसृष्ट्यलङ्कारप्रतिपादनेन सार्धं परिच्छेदममुं परिसमापयति। एवं दशमपरिच्छेदेन सार्धं ग्रन्थोऽप्ययं समाप्तिमेति।

साहित्यदर्पणः साहित्यजगति विशिष्टं स्थानमवाप्नोति। तत्र केवलं हेतुः तत्कर्ता विश्वनाथः, तस्य अनुपमा ग्रन्थरचना शैली च। दशसु परिच्छेदेषु कुत्रापि व्यर्थरूपेण ग्रन्थगौरवं न कृतमस्ति। एतच्च तस्य अद्वितीयतायाः कारणम्। एवञ्च ग्रन्थोऽयम् विद्वद्वरेण्यैः सर्वैः विश्वसनीयः इति प्रमाणितः वर्तते। तस्य साहित्यदर्पणग्रन्थस्य ईषदेव सारः अत्र गदितः।

## स्वाध्यायः

**1. रिक्तस्थानपूर्तिं कुरुत।**

(1) अनन्तदासस्य ......... टीका। (लोचनम्, चन्द्रकला, प्रभा)

(2) ग्रन्थरचनाशैल्यां विश्वनाथः ......... अनुसरति। (जगन्नाथम्, मम्मटम्, कुन्तकम्)

(3) साहित्यदर्पणे ......... परिच्छेदाः सन्ति। (अष्टौ, नव, दश)

(4) प्रथमपरिच्छेदस्य ......... इति नाम। (काव्यस्वरूपनिरूपणम्, वाक्यस्वरूपनिरूपणम्, व्यञ्जनाव्यापारनिरूपणम्)

(5) ''वाक्यं रसात्मकं काव्यम्'' इति ......... परिच्छेदे उल्लिखितम्। (प्रथमे, द्वितीये, पञ्चमे)

(6) वाक्यस्वरूपनिरूपणम् ......... परिच्छेदे निरूपितमस्ति। (प्रथमे, द्वितीये, चतुर्थे)

(7) साहित्यदर्पणे आहत्य नायकभेदाः ......... प्रोक्ताः। (चत्वारिंशत्, चतुश्चत्वारिंशत्, अष्टचत्वारिंशत्)

(8) साहित्यदर्पणे प्रधानतया ......... दोषाः उक्ताः। (त्रयः, चत्वारः, पञ्च)

(9) साहित्यदर्पणस्याष्टमे परिच्छेदे ......... गुणाः प्रोक्ताः। (त्रयः, पञ्च, षड्)

(10) अलङ्काराः ......... परिच्छेदे उपवर्णिताः। (अष्टमे, नवमे, दशमे)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) लक्ष्मीटीका केन लिखिता?

(2) रसादयः इत्यत्र आदिशब्देन केषां ग्रहणं भवति?

(3) वाक्यस्वरूपं किम्?

(4) तात्पर्याख्यां वृत्तिं के स्वीकुर्वन्ति?

(5) आहत्य कति नायिकाभेदाः?

(6) कति सङ्ख्याकाः व्यभिचारिभावाः प्रतिपादिताः?

(7) चतुर्थपरिच्छेदस्य नाम किम्?

(8) व्यञ्जनावृत्तेः विशदविवेचनं कस्मिन् परिच्छेदे कृतमस्ति?

(9) रूपकोपरूपकाणि कस्मिन् परिच्छेदे उपवर्णितानि?

(10) साहित्यदर्पणे कति रीतयः प्रोक्ताः?

**3. टिप्पणीं लिखत।**

(1) शब्दशक्तयः।

(2) साहित्यदर्पणटीकाः।

(3) अलङ्काराः।

**4. सविस्तरमुत्तरं दत्त।**

(1) प्रथमपरिच्छेदे के के विषयाः प्रतिपादिताः?

(2) तृतीयपरिच्छेदस्य प्रतिपाद्यविषयः कः?

(3) द्वितीयपरिच्छेदे के के विषयाः प्रतिपादिताः?

(4) दशमपरिच्छेदे के के विषयाः प्रतिपादिताः?

**5. 'अ' विभागं 'ब' विभागेन सह योजयत।**

| अ | ब |
|---|---|
| (1) प्रथमपरिच्छेदः | व्यञ्जनाव्यापारनिरूपणम्। |
| (2) द्वितीयपरिच्छेदः | दोषनिरूपणम्। |
| (3) पञ्चमपरिच्छेदः | रीतिविवेचनम्। |
| (4) सप्तमपरिच्छेदः | वाक्यस्वरूपनिरूपणम्। |
| (5) नवमपरिच्छेदः | काव्यस्वरूपनिरूपणम्। |

●

७

# पण्डितप्रवरः जगन्नाथः

**प्रस्तावना**

संस्कृतसाहित्यस्य मूर्धन्येषु कविवरेण्येषु पण्डितराजः जगन्नाथः सादरं परिगण्यते। एषः महाकविः प्रखरपण्डितः काव्यशास्त्री समालोचकश्च आसीत्। विविधविषयकग्रन्थैः सः स्वीयां विलक्षणप्रतिभाम् असाधारणकवित्वं च प्रदर्शितवान्। अस्य जीवनम् अतीव विवादास्पदं चासीत्। मुगलसाम्राज्यकाले जातस्य अस्य महाकवेः जीवनवृत्तं प्रस्तूयते।

**जगन्नाथस्य जीवनवृत्तम्**

पण्डितराजः जगन्नाथः सप्तदशख्रिस्ताब्दस्य मध्यभागे तैलङ्गप्रदेशे आधुनिककर्णाटकप्रदेशे अजायत। अयम् आन्ध्रवेंगीनाडुजनपदनिवासी मुगुण्डग्रामवासी तैलङ्गो ब्राह्मणः आसीत्। अस्य पितुः नाम पेरुभट्टः अथवा पैरमभट्टः आसीत्। अस्य मातुः नाम लक्ष्मीदेवी आसीत्। जगन्नाथः स्वयं प्राणाभरणस्य अन्तिमश्लोके स्वीयपितुः स्वीयं च परिचयं प्रस्तुतवान्। यथा–

**तैलङ्गान्वय-मङ्गलालय-महालक्ष्मीदयालालितः**
**श्रीमद्पैरमभट्टसूनुरनिशं विद्वल्ललाटं तपः।**
**संतुष्टः कमलाधिपस्य कवितामाकर्ण्य तद्वर्णनम्**
**श्रीमत्पण्डितराजपण्डितजगन्नाथो व्यधासीदिदम्।**

तस्य पिता पेरमभट्टः वेदान्तशास्त्रस्याध्ययनं ज्ञानेन्द्रभिक्षोः सविधे, न्यायवैशेषिकयोरध्ययनं महेन्द्रपण्डितस्य समीपे, पूर्वमीमांसाध्ययनं खण्डदेवस्य पार्श्वे, व्याकरणस्याध्ययनं च शेषवीरस्य सविधे कृतवान्। जगन्नाथः एतेषां समेषां विषयाणामध्ययनं स्वपितुः पेरमभट्टात् स्वगुरोः वीरेश्वरस्य च समीपे अकार्षीत्। गङ्गाधरे प्रदत्तश्लोकेन एतत् ज्ञायते –

**श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसकलब्रह्मविद्याप्रपञ्चः**
**काणादीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत्।**
**देवादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयम्**
**शेषाङ्कप्राप्तशेषामलभणितिरभूत्सर्वविद्याधरो यः॥**

सः स्वपितुः महता आदरेण स्मरणं करोति। तस्य समीपे स्थित्वा विविधशास्त्राण्यधीतवान्। सः निजपितरं पाषाणादपि पीयूषं स्यन्दयितुं समर्थं महागुरुं मन्यते स्म।

**पाषाणादपि पीयूषं स्यन्दते यस्य लीलया।**
**तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम्॥**

एवं हि श्रूयते बाल्ये विद्याभ्यासं कृत्वा जगन्नाथः काश्चन श्लोकरचनाः आन्ध्रनरेशाय समर्पितवान् किन्तु राज्ञः पक्षतः प्रत्युत्तरं योग्यसम्मानं प्रतिभावं च न प्राप्तवान्, अतः क्रोधवशात् स्वनगरं परित्यज्य उत्तरभारतं प्रस्थितवान्। ततः पूर्वं सः बालायाः त्रिपुरसुन्दर्याः आराधनां कृत्वा वाग्देव्याः वरं लब्धवान्। यथा–

**आकुरुदेशं विचरेर्मा कुरु परवादनिर्जये शङ्काम्।**
**स्वीकुरु वरमेकं मे व्याकुरु भो वत्स शास्त्राणि॥**

इमं वरं स्वीकृत्य सः सर्वप्रथमं जयपुरे पाठशालां स्थापितवान् यत्र छात्रेभ्यः शास्त्राणि अध्यापयति स्म। एकदा कश्चित् काजी जयपुरे जयपुरनिवासिनः अखिलान् पण्डितान् शास्त्रार्थाय आहूतवान्। न कोऽपि पण्डितः काजीमहोदेयस्य आह्वानं स्वीकृतवान् तदा जगन्नाथेन मुस्लिमधर्मपुस्तकान्यधीत्य स काजी नितरां पराजितः। दिल्लीनृपः इमं वृत्तान्तम् आकर्ण्य जगन्नाथमाहूतवान् परं स तदुत्तरे नम्रं पद्यं प्रेषितवान् न स्वयम् अगच्छत्।

**शीतार्ता इव संकुचन्ति दिवसा नैवाम्बरं शर्वरी**
**शीघ्रं मुञ्चति किञ्च सोऽपि हुतभुक्कोणङ्गतो भास्करः।**
**त्वञ्चानङ्गहुताशभाजि हृदये सीमन्तनीनां गतः**
**नास्माकं वसनं न वा युवतयः कुत्र व्रजामो वयम्॥**

अनेन पद्येन तस्मिन् काले तस्य दारिद्र्यम् अविवाहितत्वं च ज्ञायते। कालान्तरे पुनः दिल्लीश्वरस्य पुनः पुनः आग्रहेण 'शाहजहां' नृपस्य राज्याश्रयं स्वीकृतवान्। ''शाहजहां'' महाराजेन स्वकीयज्येष्ठात्मजस्य दाराशिकोहस्य संस्कृताध्यापनाय जगन्नाथः नियुक्तः। अस्य प्रकर्षपाण्डित्येन प्रसन्नः सम्राट् एनं 'पण्डितराज' इत्युपाधिना व्यभूषयत्। जगन्नाथः तथ्यमिमं स्वयम् 'आसफविलास' नामधेयग्रन्थस्यान्ते लिखति-

**श्रीसार्वभौमशाहजहांप्रसादादधिगतपण्डितराजपदवीविराजितेन**
**तैलङ्गकुलावतंसेन पण्डितजगन्नाथेनासफविलासाख्येयमाख्यायिका निरमीयत।**

देहल्यां निवसन् स कस्याश्चित् मुस्लिमकन्यायाः लवङ्ग्याः प्रणयपाशे निबद्धः। अस्मिन् विषये दन्तकथा श्रूयते- यदेकदा पण्डितराजः शाहजहाराज्ञा सह चतुरङ्ग (शतरञ्ज) क्रीडारतः आसीत् तदा पिपासया जलं याचितवान्। तदा काचिल्लवङ्गी नाम्नी कन्या सलिलसभरं स्वर्णकलशं शिरसि न्यस्य आगता, नृपतिः तस्याः अनुपमसौन्दर्यं लावण्यं चोद्दिश्य पण्डितराजं श्लोकरचनायै निर्दिष्टवान्। जगन्नाथः तस्याः लावण्यतुलितां रूपसम्पत्तिं वर्णयन् आह-

**इयं सुस्तनी मस्तकन्यस्तकुम्भा कुसुम्भारुणं चारुचेलं वसाना।**
**समस्तस्य लोकस्य चेतःप्रवृत्तिं गृहीत्वा घटे न्यस्य यातीव भाति॥**

पद्यमिदं श्रुत्वा शाहजहां अतितरां प्रसीदन्नाह- कवे! वर्णनं नितरां हृदयाह्लादि तावद्, वृणु यथेच्छं पुरस्कारम्। पण्डितराजोऽपि पुरस्काररूपेण वृणन् आह-

**न याचे गजालिं न वा वाजिराजिं न वित्तेषु चित्तं मदीयं कदाचित्।**
**इयं सुस्तनी मस्तकन्यस्तकुम्भा लवङ्गी कुरङ्गीदृगङ्गीकरोतु॥**

अपि च-

**यवनी नवनीतकोमलाङ्गी शयनीये यदि लभ्यते कदाचित्।**
**अवनीतलमेव साधु मन्ये न वनी माघवनी विलासहेतुः॥**

अनेन दिल्लीश्वरेण सा लवङ्गी सहर्षं पण्डितराजाय प्रदत्ता।

तया सह विहरता दिल्लीनगरे नवीनं वयः यापितवान्।

**दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः।**

यदा लवङ्गिका दुर्दैववशात् सहसा रुग्णतां गता सती पण्डितराजं परित्यज्य यमसदनं अगमत्, तदा स्वर्गगतां लवङ्गीम् उपालम्भयन् स विलपति-

**सर्वेऽपि विस्मृतिपथं विषयाः प्रयाता**
**विद्यापि खेदगलिता विमुखीबभूव।**
**सा केवलं हरिणशावकलोचना मे**
**नैवापयाति हृदयादधिदेवतेव॥**

लवङ्गिकाजगन्नाथयोः एकः पुत्रः अपि आसीत् सोऽपि कालान्तरे कालकवलीभूतः इति श्रूयते।

पण्डितराजपदवीं प्राप्य सुखेन दिल्लीराजगृहे निवसन् जगन्नाथः दिनानि यापयति स्म। यदा कश्चन अन्यः राजा तस्मै स्वराज्ये आगन्तुं प्रार्थयति स्म तदा सः गर्वेण दिल्लीश्वरस्य जगदीश्वरेण सह तुलनां कृत्वा निमन्त्रणं न स्वीकरोति स्म-

**दिल्लीश्वरो वा जगदीश्वरो वा मनोरथान् पूरयितुं समर्थः।**
**अन्यैर्नृपालैः परिदीयमानं शाकाय वा स्याल्लवणाय वा स्यात्॥**

वार्द्धक्ये सः प्रथमं मथुरानगरीमुषितवान्। ततश्च वाराणसीङ्गतः यत्र पण्डितैः विशेषतः आचार्यभट्टोजिदीक्षितेन अप्पयदीक्षितेन सः तिरस्कृतः जात्याः बहिष्कारितश्च। फलतः उभावपि दीक्षितौ अस्य शत्रू सञ्जातौ अत एव सः भट्टोजिदीक्षितस्य प्रौढमनोरमाटीकायाः खण्डने 'मनोरमाकुचमर्दनम्' इति व्याकरणशास्त्रीयं तथा अप्पयदीक्षितस्य चित्रमीमांसायाः खण्डने 'चित्रमीमांसाखण्डनम्' इति अलङ्कारशास्त्रीयं ग्रन्थ अलिखत्।

अन्ते च कृष्णभक्तौ लीनः सन् गङ्गातटे उपविश्य गङ्गालहरीं रचितवान्। एवं हि श्रूयते गङ्गा प्रतिश्लोकमेकैकं सोपानं प्रवाहपूरेण आप्लावयन्ती द्विपञ्चाशन्मितां सोपानपरम्परामाप्लाव्य पण्डितराजमपि निजाङ्कमग्नम् अकरोत्। इत्थं पण्डितराजस्य जीवनवृत्तं ग्रन्थेषु दन्तकथासु च वर्णितमस्ति।

अयं महाकविः त्रिशूली, उपद्रष्टः, वेलनाटीयः इत्यादिभिः उपनामभिः अपि सादरं स्मर्यते।

**जगन्नाथस्य समयः**

भारतवर्षस्य मुगलसम्राजः जहांगीरस्य शाहजहां इत्यस्य तथा दाराशिकोहस्य च समसामयिकत्वात् जगन्नाथस्य समयोऽपि सम्यक् निश्चेतुं शक्यते। जहांगीरः 1605 ई. वर्षतः 1627 ई. वर्षं यावत्, शाहजहां 1628 ई. व. 1638 ई. वर्षपर्यन्तं राज्यमकरोत्। 1641 ई. वर्षे आसफखानः दिवंगतः तस्य पुण्यस्मृतौ स 'आसफविलासः' नामकं प्रशस्तिकाव्यं रचयामास। शाहजहां इत्यस्य अवसानानन्तरं सः असमनरेशस्य प्राणनारायणस्य आश्रितः अभवत्। तस्य कालः 1663 ई. वर्षमिति स्वीक्रियते। कवेः प्रौढावस्था मथुरायां वृद्धत्वं च काश्यां व्यतीतम्। एतैः सर्वैः आधारैः जगन्नाथस्य समयः 1580 ई.तः 1670 ई. वर्षमिति स्वीकर्तुं शक्यम्। तथापि सप्तदशशताब्देः मध्यभागः पण्डितराजस्य कालः सर्वैरपि अङ्गीक्रियते।

**जगन्नाथस्य कृतयः**

पण्डितप्रवरो जगन्नाथः महाकविः विवेचकश्च आसीत्। तस्य बहुमुखप्रतिभायाः परिचयः तस्य ग्रन्थैः सुस्पष्टं ज्ञायते। तद्विरचिताः द्वादशकृतयः साम्प्रतं समुपलभ्यन्ते। तदतिरिक्तं 'यमुना' गद्यात्मिका रचना अप्राप्या वर्तते। एतेषां परिचयः अधः प्रदीयते-

1. **गङ्गालहरी-** इयं पीयूषलहरी इति नाम्ना प्रसिद्धा। द्विपञ्चाशत्पद्यैर्निबद्धा अतिमाधुर्यसंभृता मनोहरा च गङ्गाप्रशस्तिमभिलक्ष्य प्रणीता इयं रचना।
2. **करुणालहरी-** अस्याः कृतेः अपरं नाम विष्णुलहरी अपि वर्तते। चतुःषष्टिपद्यैरलङ्कृता विष्णुदेवप्रशस्तौ विरचिता भावभरिता रचनेयम्।
3. **अमृतलहरी-** अस्मिन् लहरीकाव्ये एकादशश्लोकाः सन्ति यत्र महाकविना जगन्नाथेन यमुनाप्रशस्तिर्विहिता।
4. **सुधालहरी-** द्वात्रिंशत्पद्यपुष्पैः गुम्फिता सूर्यस्तुतौ विरचिता एषा रचना।
5. **लक्ष्मीलहरी-** लक्ष्मीप्रशंसायां शिखरिणीच्छन्दसि एकचत्वारिंशत्पद्यसमन्विन्तमिदं काव्यं वर्तते। दरिद्रावस्थायां कृता कृतिरियम्।
6. **भामिनीविलासः-** एतदन्तर्गताः चत्वारः विभागाः 'विलास' इति नाम्ना सन्ति - प्रास्ताविकविलासः, श्रृङ्गारविलासः, करुणविलासः शान्तविलासश्चेति। प्रथमे प्रास्ताविकविलासे नीतिविषयकानि सुभाषितानि, श्रृङ्गारविलासे विप्रलम्भश्रृङ्गारस्य अनुपमं वर्णनं दृश्यते। करुणविलासे स्त्रियः मृत्योः समुत्पन्नः विलापः वर्णितः। एषा जगन्नाथस्य भार्या आसीदिति केचन विद्वांसः मन्यन्ते। शान्तविलासे वैराग्यस्य वर्णनं विहितम्।

7. **प्राणाभरणम्**- आसामराजस्य प्राणनारायणस्य प्रशंसायां त्रिपञ्चाशत्पद्यसमन्वितं प्रशस्तिकाव्यं प्राणाभरणम्। यदा जगन्नाथः कामपुरे निवासं कृतवान् तदा प्राणनारायणाय इदं काव्यं समर्पितवान्।

8. **जगदाभरणम्**- उदयपुरस्य राज्ञः राणाकर्णसिंहस्य सूनोः राजकुमारजगत्सिंहस्य स्तुतौ अस्य काव्यस्य रचना जाता। केचन इदं काव्यं दाराशिकोहस्य प्रशस्तौ विरचितमिति मन्यन्ते। अत्र पञ्चाशत् श्लोकाः विद्यन्ते।

9. **आसफविलासः** गद्यात्मकः अयं ग्रन्थः शाहजहाराजस्य प्रसिद्धस्य सेनापतेः आसफखानस्य चरित्रं वर्णयति। आख्यायिकारूपस्य ग्रन्थलेखनस्य प्रेरणा कविमित्रेण रायमुकुन्दमाथुरेण कृता आसीत्।

10. **मनोरमाकुचमर्दनम्**- व्याकरणविषयकः ग्रन्थः भट्टोजिदीक्षितविरचितस्य सिद्धान्तकौमुदीग्रन्थस्य मनोरमाटीकाग्रन्थस्य खण्डनाय जगन्नाथेन विरचितः। भट्टोजिदीक्षितः मनोरमाटीकायां जगन्नाथगुरोः शेषवीरेश्वरस्य खण्डनं कृतवान् तस्मात् आवेशेण रुष्टः जगन्नाथः इमं ग्रन्थं लिखितवान्।

11. **चित्रमीमांसाखण्डनम्**- श्रीअप्पयदीक्षितप्रणीतस्य चित्रमीमांसायाः खण्डनाय अस्य ग्रन्थस्य रचना जाता। अलङ्कारविषयकमतानां खण्डनमत्र विशेषेण निरूपितम्।

12. **रसगङ्गाधरः** - श्रीजगन्नाथविरचितः अपूर्णः अयं ग्रन्थः, पण्डितप्रवरस्य साहित्यमार्मिकतायाः, तर्ककौशलस्य, विचारचारुतायाः अलङ्कारशास्त्रप्रावीण्यस्य परिचायकः। एषः साहित्यशास्त्रस्य ललामभूतः ग्रन्थः न्यायदर्शनशैल्यां विरचितः। पञ्चसु द्वे आनने एव महाकविना जगन्नाथेन लिखिते स्तः।

एतदितिरिच्य 'यमुनावर्णनम्' 'पण्डितराजशतकम्' इति काव्यद्वयं जगन्नाथविरचितं किन्तु साम्प्रतं न प्राप्यते। इतिमन्मथनम् वसुमतीपरिणयम् इति नाटकद्वयमपि जगन्नाथप्रणीतमिति केषाञ्चित् विदुषां मतम्।

**जगन्नाथस्य वैशिष्ट्यम्**

पण्डितराजः जगन्नाथः सकलशास्त्रविद् प्रकाण्डपण्डितः आसीत्। तस्य बहुविधविषयकाः ग्रन्थाः प्रत्यक्षं प्रमाणानि सन्ति। विशेषेण पण्डितराजस्योन्योक्तयः गर्वोक्तयश्च प्रसिद्धाः सहृदयहृदयाह्लादिकाः सन्ति। भामिनीविलासस्य मुक्तकपद्येषु चतुस्त्रिंशत् पदार्थान् स्वीकृत्य सः अतिमनोहराणि भावपूर्णानि अन्योक्तिपद्यानि रचितवान्। जगन्नाथस्य श्लोकेषु स्वाभाविकतया प्रसादमाधुर्यगुणयोः सुभगः समन्वयः दृश्यते। अन्योक्तिविलासे सः सिंहान्योक्तिमाध्यमेन स्वीयं पाण्डित्यं सगर्वमुद्घोषयति। यथा-

**दिगन्ते श्रूयन्ते मदमलिनगण्डाः करटिनः**
**करिण्यः कारुण्यास्पदमसमशीलाः खलु मृगाः।**
**इदानीं लोकेऽस्मिन्ननुपमशिखानां पुनरयं**
**नखानां पाण्डित्यं प्रकटयतु कस्मिन् मृगपतिः॥**

**( अन्यो. वि. 1.1 )**

अत्र अप्रस्तुतप्रशंसालंकारमाध्यमेन कविः सिंह इव नखानां पाण्डित्यं केषु प्रदर्शयेत् इति चिन्तां करोति। तेषां काव्येषु, लहरीषु, मुक्तकेषु, प्रशस्तिकाव्येषु, साहित्यशास्त्रीयग्रन्थेषु च तस्य बहुमुखी प्रतिभा दृग्गोचरीभवति।

तस्य श्लोकेषु आत्मप्रशंसां विलोक्य तम् अहंकारिणं मन्यन्ते बहवो विद्वांसः। कालिदास इव 'मन्दः कवियशः प्रार्थी' तादृशी नम्रता तस्मिन् न दृश्यते परन्तु स्वाभिमानेन सः निजजीवनं यापितवान्। बहुषु पद्येषु सः स्वीयां प्रशंसां करोति। यथा-

**धुर्यैरपि माधुर्यैर्द्राक्षाक्षीरेक्षुमाक्षिकसुधानम्।**
**वन्द्यैव माधुरीयं पण्डितराजस्य कवितायाः॥**

भाषायां भव्यत्वं, शब्देषु मृदुत्वं, श्रवणे माधुर्यं, भावेषु गाम्भीर्यं पण्डितराजस्य काव्यशैल्याः वैशिष्ट्यमस्ति। यथा प्रास्ताविकविलासे हंसं सम्बोध्य विवेकिनः सज्जनान् कुलव्रतं पालयितुं निर्दिशति-

**नीरक्षीरविवेके हंसालस्यं त्वमेव तनुषे चेत्।**
**विश्वस्मिन्नधुनाऽन्यः कुलव्रतं पालयिष्यति कः॥**

शान्तविलासे कविः संसारं शरीरं च नश्वरं मन्वन् वैराग्यभावं प्रदर्शयति। यथा-

**निखिलं जगदेव नश्वरं पुनरस्मिन् नितरां कलेवरम्।**
**अथ तस्य कृते कियानयं क्रियते हन्त जनैः परिश्रमः॥**

जगत् शरीरं च नश्वरं जानन्नपि मनुष्याः शरीरस्य कृते कियन्तं परिश्रमं कुर्वन्ति। इत्थं जगन्नाथस्य काव्येषु पदे पदे रमणीयत्वं, सरसत्वं, धाराप्रवाहित्वं च दरीदृश्यते। सः शिष्येभ्यः गुरूणां कठोरवचांसि हितकारीणि भवन्तीति रत्नानां दृष्टान्तेन बोधयति-

**गीर्भिर्गुरूणां परुषाक्षराभिस्तिरस्कृता यान्ति नरा महत्त्वम्।**
**अलब्धशाणोत्कषणा नृपाणां न जातु मौलौ मणयो वसन्ति॥**

यथा शाणोत्कषणात् मणयः नृपाणां मुकुटेषु सुशोभन्ते तथैव गुरूणां परुषाक्षरैः उपदेशैः नराः महत्त्वं योग्यत्वं प्राप्नुवन्तु।

**निष्कर्षः**

एतैः उपर्युक्तैः तथ्यैः सुस्पष्टं भवति यत् पण्डितराजः जगन्नाथः कालिदासादीनामिव काव्यैः यशः अर्जितवान्। तस्य कविता साक्षात् प्रियतमा इव समेषां सकलं मनः सदा रञ्जयति या दोषरहिता, गुणभरिता, रसार्द्रा, भावार्द्रा, अलङ्कारमण्डिता मंजुलपदावलीसुभूषिता चास्ति। कथितं च-

**निर्दूषणा गुणवती रसभावपूर्णा**
**सालंकृता श्रवणकोमलवर्णराजिः।**
**सा मामकीनकवितेव मनोऽभिरामा**
**रामा कदापि हृदयान्मम नापयाति।**

## स्वाध्यायः

**1. रिक्तस्थानपूर्तिं कुरुत।**

(1) जगन्नाथस्य जन्म ......... ख्रिस्ताब्दे अभवत्। (सप्तदश, पञ्चदश, द्वादश)

(2) जगन्नाथस्य पितुः नाम ......... आसीत्। (महिमभट्टः, पेरमभट्टः, उद्भटः)

(3) जगन्नाथः ......... पाषाणादपि पीयूषं स्यन्दयितुं समर्थं महागुरुं मन्यते स्म। (स्वमातरम्, स्वपितरम्, वीरेश्वरम्)

(4) जगन्नाथः ......... आराधनां कृत्वा वाग्देव्याः वरं लब्धवान्। (वेंकटेश्वरस्य, शिवस्य, त्रिपुरसुन्दर्याः)

(5) युवावस्थायां जगन्नाथः ......... मुगलराजस्य राज्याश्रयं प्राप्तवान्। (जहांगीर, शाहजहां, औरंगजेब)

(6) दिल्यां निवसन् पण्डितराजः ......... प्रणयपाशे निबद्धः। (कुरङ्ग्याः, लवङ्ग्याः, दृगङ्ग्याः)

(7) वार्द्धक्ये जगन्नाथः प्रथमं ......... नगरीमुषितवान्। (अयोध्या, उज्जयिनी, मथुरा)

(8) जगन्नाथस्य ......... कृतयः साम्प्रतमुपलभ्यन्ते। (दश, द्वादश, पञ्चदश)

(9) ......... साहित्यशास्त्रीयः ग्रन्थः। (करुणालहरी, जगदाभरणम्, रसगङ्गाधरः)

(10) ......... तटे जगन्नाथः प्राणान् अत्यजत्। (गङ्गायाः, यमुनायाः, कावेर्याः)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) पण्डितराजस्य जगन्नाथस्य जन्म कुत्र अभवत्?

(2) जगन्नाथस्य मातुः नाम किमासीत्?

(3) शाहजहांमहाराजेन कस्य संस्कृताध्यापनाय जगन्नाथः नियुक्तः?

(4) जगन्नाथस्य प्रकर्षपाण्डित्येन प्रसन्नः शाहजहां केन उपाधिना विभूषितवान्?

(5) जगन्नाथः कैः उपनामभिः सादरं स्मर्यते?

(6) गङ्गालहरी अन्येन केन नाम्ना प्रसिद्धा?

(7) 'चित्रमीमांसाखण्डनम्' इति ग्रन्थः कस्य आचार्यस्य कृते खण्डनाय जगन्नाथेन रचितः?

(8) कस्य ग्रन्थस्य मुक्तकपद्येषु चतुस्त्रिंशत् पदार्थान् स्वीकृत्य अन्योक्तिपद्यानि रचितानि सन्ति?

**3. टिप्पणीं लिखत।**

(1) जगन्नाथस्य वैशिष्टयम्।

(2) जगन्नाथस्य बाल्यावस्थायाः वृत्तम्।

(3) जगन्नाथविषयकाः किंवदन्त्यः।

**4. सविस्तरमुत्तरं दत्त।**

(1) जगन्नाथस्य द्वादशकृतीनां नामानि लिखत।

(2) जगन्नाथलवङ्ग्याः प्रणयकथां वर्णयत।

(3) जगन्नाथस्य समयनिर्धारणं कुरुत।

(4) जगन्नाथविरचितस्य भामिनीविलासस्य परिचयं लिखत।

**5. 'अ' विभाग 'ब' विभागेन सह योजयत।**

| अ | ब |
|---|---|
| (1) पेरमभट्टः | जगन्नाथस्य गुरुः |
| (2) वीरेश्वरः | जगन्नाथस्य माता |
| (3) लवङ्गी | जगन्नाथस्य पिता |
| (4) लक्ष्मीदेवी | जगन्नाथस्य भार्या |
| (5) शाहजहां | जगन्नाथस्य आश्रयदाता राजा |

●

८

# लहरीपञ्चकम्

**प्रस्तावना**

पण्डितराजजगन्नाथः अर्वाचीनयुगस्य अप्रतिमः तेजस्वी प्रतिभासम्पन्नश्च महाकविरासीत्। तेन निजजीवने द्वादशकृतयः विरचिताः, येषु काव्यानां, लहरीपञ्चकस्य, मुक्तकानां, प्रशस्तिकाव्यानां, व्याकरणसाहित्यशास्त्रग्रन्थानां च समावेशो भवति। एतेषां काव्यानां माध्यमेन जगन्नाथः यशःशरीरेण अद्यापि जीवतितराम्। तेषां काव्येषु लहरीकाव्यानां विशिष्टं महत्त्वं वर्तते अतः अधः लहरीकाव्यानां परिचयः प्रदीयते।

**1. गङ्गालहरी -**

गङ्गालहरी पण्डितराजस्य जगन्नाथस्य सर्वोत्तमं स्तोत्रकाव्यं वर्तते। इदं काव्यं 'पीयूषलहरी' इति नाम्नाऽपि विख्यातम्। अस्य स्तोत्रकाव्यस्य संस्कृतसाहित्यस्य भक्तिप्रधानकाव्येषु विशिष्टं स्थानं वर्तते। अस्मिन् काव्ये शिखरिणीच्छन्दसि निबद्धेषु द्विपञ्चाशत् श्लोकेषु गङ्गायाः माहात्म्यं पावनत्वं लोककल्याणकारित्वं हृदयङ्गमवाण्या वर्णितमस्ति। त्रिपञ्चाशत्तमः फलश्रुतिविषयकः श्लोकोऽपि वर्तते।

एवं हि श्रूयते यथा यथा गङ्गायाः स्तुतिः कृता तथा तथा द्विपञ्चाशत् सोपानानि गङ्गा वर्धमाना तस्य पार्श्वे समागता तथा जगन्नाथं स्वाङ्के स्वीकृत्य अगच्छत्।

जगन्नाथः अस्मिन् काव्ये गङ्गां मातृरूपेण जीवनतारिणिरूपेण च स्तौति। पूर्णश्रद्धया प्रगाढानुरागेण भक्त्या च कविः गङ्गायाः शरणं स्वीकरोति। गङ्गालहर्याः शैली अतीव सरला मनोहारिणी चास्ति। एकत्र बालक इव जगन्नाथः गङ्गामातुः शरणं व्रजति - '**शिशुः सम्प्राप्तस्त्वामहमिह विदध्याः समुचितम्।**' अपरत्र निराधारः असहाय इव स्वदर्पं विहाय करुणरसेन गङ्गामातुः पार्श्वे गत्वा रोदिति। यथा-

**तवालम्बादम्ब स्फुरदलघुगर्वेण सहसा**
**मया सर्वेऽवज्ञासरणिमथ नीताः सुरगणाः।**
**इदानीमौदास्यं भजसि यदि भागीरथि तदा**
**निराधारो हा रोदिमि कथय केषामिह पुरः॥**

(हे मातः! तवाधाराशया मया अतिगर्वेण सहसा सर्वे देवगणाः अपमानिताः हे भागीरथि! यदि त्वम् उदासीना भविष्यसि तदा निराधारः अहं कस्य पार्श्वे रोदिष्यामीति, कथय।)

**2. सुधालहरी -**

इदं लहरीकाव्यं सूर्यनारायणस्य स्तुतौ महाकविना जगन्नाथेन विरचितम्। अस्मिन् काव्ये त्रिंशत् पद्यानि सन्ति यानि स्रग्धराच्छन्दसि वर्तन्ते।

अस्मिन् काव्ये मयूरकवेः सूर्यशतकस्य अनुसरणं दृश्यते तथापि काव्यस्य भाषा प्रौढा, कल्पना उदात्ता, उचितालङ्कारप्रयोगः, गौडी शैली च दृश्यते। काव्यस्य पद्येषु सूर्यस्य तेषां किरणानां च भक्तिभावेनाराधनं कृतं वर्तते।

**3. करुणालहरी -**

करुणालहरीकाव्यं 'विष्णुलहरी' इति नाम्नाऽपि लोके प्रशस्यते। अस्मिन् काव्ये विविधेषु निबद्धाः षष्टिः श्लोकाः सन्ति। यत्र प्रथमतः द्वादशश्लोकाः वंशस्थच्छन्दसि त्रयोदशतः चतुष्पञ्चाशत्पर्यन्तं सुन्दरीछन्दः, अन्ये च श्लोकाः वियोगिनी-औपच्छन्दसिकादिछन्दःसु ग्रथिताः सन्ति। अस्मिन् काव्ये भगवतः विष्णोः स्तुतिः भावातिरेकेण विहिता। विद्वांसः जगन्नाथस्य वैष्णवसम्प्रदायानुयायित्वम् अनेन काव्येन मन्यन्ते। जगतः असह्यदुःखेभ्यः मानवसहजदुर्बलताभ्यः मोक्तुं भक्तकविः जगन्नाथः विष्णुं प्रार्थयते। काव्यशैलीदृष्ट्या गङ्गालहरी इव उत्कृष्टकाव्यश्रेण्यां करुणालहरी समावेशमर्हति। जगन्नाथः पूर्वकृतकर्मणां प्रायश्चित्ताय आत्मनः शुद्ध्यर्थं च रुदन् शिशुरिव हरेः कृपामभिलषति यथा-

**अहमेव हि दोषदूषितो भगवंस्त्वां समुपालभे मुधा।**

**रमणीविरहज्वरज्वलन्नमृतांशुं कुमतिर्विनिन्दति॥**

(हे भगवन्! दोषेण अहं दूषितः वृथा त्वाम् समुपालभे यथा प्रियावियोगज्वरेण ग्रस्तः कुबुद्धिः जनः चन्द्रं निन्दति।)

**4. लक्ष्मीलहरी -**

अस्मिन् काव्ये दारिद्र्यावस्थां प्राप्तस्य जनस्य निर्धनत्वं दूरीकर्तुं लक्ष्म्याः स्तवनं विहितं दृश्यते। शिखरिणीच्छन्दसि एकचत्वारिंशत् पद्येषु निबद्धमेतत् लक्ष्मीलहरीकाव्यम्। स्वनिर्धनत्वम् अपाकर्तुं कविः जगन्नाथः अस्य काव्यस्य प्रणयनं कृतवान् इति विद्वांसः स्वीकुर्वन्ति। किन्तु राज्याश्रयप्राप्तस्य जगन्नाथस्य निर्धनत्वं कुतः इति मत्वा ततः पूर्वं जगन्नाथेन इदं काव्यं रचितमिति ते मन्यन्ते। दीनः कविः अत्र लक्ष्म्याः भक्तिभावेन नखशिखवर्णनं कृतवान्। लक्ष्म्याः विविधस्वरूपाणि वर्णयित्वा याचकभावेन स्वदौर्भाग्यदलनाय कष्टनिवारणाय च लक्ष्मीमातुः प्रार्थना अत्र विहिता।

**5. अमृतलहरी -**

इदं लहरीकाव्यं लहरीकाव्येषु सर्वेभ्यः लघुकायं वर्तते। अस्मिन् काव्ये केवलम् एकादश श्लोकाः सन्ति। महाकविः जगन्नाथः प्रौढशैल्या यमुनानद्याः स्तुतिं करोति। शङ्कराचार्यस्य नर्मदाष्टकं लक्षीकृत्य इदं काव्यं जगन्नाथेन प्रणीतमिति विवेचकानां मतम्। शार्दूलविक्रीडितच्छन्दसि आरम्भे दशश्लोकाः सन्ति अन्तिमः श्लोकः अनुष्टुप्-छन्दसि निबद्धः वर्तते। कालिन्द्याः विविधानां रूपाणां गुणानां च वर्णनं कृत्वा यमुनायाः पार्श्वे संसारसागरात् मोक्तुं प्रार्थयत। यदा किञ्चित्कालं जगन्नाथः मथुरानगर्यामुषितवान् तदानीम् अस्य काव्यस्य रचना कृता स्यात् इति सुधियां विदुषां मतं वर्तते।

इत्थमिदं लहरीपञ्चकं पञ्चाशीत्युत्तरैकशतं पद्येषु विरचितं दृश्यते। अनेन पण्डितराजेन जगन्नाथेन स्वगर्वं विहाय हृदयस्य विलाससमयभावनाभिः आनन्दमयतरङ्गेषु निमज्ज्य भक्तकविरूपेण सविनयं प्रार्थितम्। पद्यसंख्यादृष्ट्या निम्नेन आकारचित्रेण लहरीपञ्चकं सरलतया बोद्धुं शक्यते।

**लहरीपञ्चकम्**

| गङ्गालहरी | सुधालहरी | करुणालहरी | लक्ष्मीलहरी | अमृतलहरी |
|---|---|---|---|---|
| (52 + 1 पद्यानि) | (30 पद्यानि) | (50 पद्यानि) | (41 पद्यानि) | (11 पद्यानि) |

**आहत्य = 185 पद्यानि**

**श्लोकाः-**

**(1) समृद्धं सौभाग्यं सकलवसुधायाः किमपि तन्**
**महैश्वर्यं लीलाजनितजगतः खण्डपरशोः।**
**श्रुतीनां सर्वस्वं सुकृतमव्यमूर्तं सुमनसां**
**सुधासौन्दर्यं ते सलिलमशिवं नः शमयतु॥**

**(गङ्गालहरी-1)**

**अन्वयः** - तव सलिलं सकलवसुधायाः किमपि तत् समृद्धं सौभाग्यं लीलाजनितजगतः खण्डपरशोः महैश्वर्यं, श्रुतीनां सर्वस्वम् अथ सुमनसां मूर्तं सुकृतम्, ते सुधासौन्दर्यं सलिलं नः अशिवं शमयतु॥

**भावार्थः** - हे गङ्गे! तव जलं समस्तवसूनां धारयित्र्याः पृथिव्याः विलक्षणं किमपि समृद्धं सौभाग्यं वर्तते, यज्जलं निजलीलया संसारनिर्मातुः खण्डपरशोः उत्कृष्टम् ऐश्वर्यं वर्तते, यज्जलं वेदानां सर्वस्वं वर्तते, देवानां मूर्तिमत् पुण्यमस्ति, अमृतस्य सौन्दर्यमस्ति तज्जलम् अस्माकम् अमङ्गलम् अकल्याणं नाशयतु हरतु इत्यर्थः।

**विशेषः** - गङ्गालहर्याः अयं मङ्गलाचरणात्मकः श्लोकः वर्तते। अत्र आशीर्वादात्मकं मङ्गलाचरणं वर्तते। शिखरिणीच्छन्दसि इदं पद्यं निबद्धम्।

**(2) अपि प्राज्यं राज्यं तृणमिव परित्यज्य सहसा**
**विलोलद्वानीरं तव जननि! तीरं श्रितवताम्।**
**सुधातः स्वादीयः सलिलभरमातृप्ति पिबतां**
**जनानामानन्दः परिहसति निर्वाणपदवीम्॥**

**(गङ्गालहरी-6)**

**अन्वयः** - हे जननि! प्राज्यम् अपि राज्यं सहसा तृणम् इव परित्यज्य विलोलद्वानीरं तव तीरं श्रितवताम्, सुधातः स्वादीयः सलिलभरम् आतृप्ति पिबतां जनानाम् आनन्दः निर्वाणपदवीं परिहसति।

**भावार्थः** - हे मातः! प्रभूतमपि साम्राज्यम् अकस्मात् तृणं तुच्छद्रव्यमिव विहाय, प्रलम्भमानवेतसवृक्षैः युतं तटम् आश्रयताम्, तेन च अमृतात् अपि स्वादु जलम् आकण्ठम् आस्वादमानानां मनुष्याणाम् आनन्दः हर्षः मोक्षस्य पदवीम् उपहसति।

**विशेषः** - अस्मिन् श्लोके सानुप्रासा भाषा मनः कर्षति। शिखरिणीवृत्तम्।

**(3) कालिन्दीति कदापि कौतुकवशात् त्वन्नामवर्णानिमान्**
**व्यस्तानालपतां नृणां यदि करे खेलन्ति संसिद्धयः।**
**अन्तर्ध्वान्तकुलान्तकारिणि तव क्षिप्तामृते वारिणि**
**स्नातानां पुनरन्वहं स महिमा केनाधुना वर्ण्यते॥**

**(अमृतलहरी-6)**

**अन्वयः** - (हे यमुने!) कदापि कौतुकवशात् व्यस्तान् 'कालिन्दी' इति इमान् त्वन्नामवर्णान् आलपतां नृणां करे यदि संसिद्धयः खेलन्ति। अन्तर्ध्वान्तकुलान्तकारिणि तव क्षिप्तामृते वारिणि अन्वहं पुनः स्नातानां स महिमा अधुना केन वर्ण्यते?

**भावार्थः** - हे मातः यमुने! कदाचित् अपि कुतूहलकारणात् पृथक् रूपेण 'कालिन्दी' इति एतान् तव नाम्नः वर्णान् जपतां मनुष्याणां हस्तयोः यदि सम्यक् सिद्धयः क्रीडन्ति तदा पुनः जनानाम् अन्तः स्थितानाम् अन्धकारसमूहानां विनाशके तव सुधाभरिते जले प्रतिदिनम् अवगाहितानां तस्य महिम्नः वर्णनं केन शक्यते? न केनापीत्यर्थः।

**विशेषः** - प्रस्तुते पद्ये शार्दूलविक्रीडितं वृत्तम्। श्रीशङ्कराचार्यविरचितस्य नर्मदाष्टकस्तोत्रकाव्याधारितम् इदं लहरीकाव्यं दशपद्यात्मकं वर्तते।

**(4) नितरां विनयेन पृच्छते सुविचार्योत्तरमत्र यच्छ मे।**
**करितो गिरितोऽप्यहं गुरुस्त्वरितं नोद्धरसे यदद्य माम्॥**

**(करुणालहरी-15)**

**अन्वयः** - नितरां विनयेन पृच्छते मे सुविचार्य अत्र उत्तरं यच्छ। अहं करितः गिरितः अपि (किं) गुरुः यत् त्वरितं माम् अद्य न उद्धरसे।

**भावार्थः** - अत्यन्तं विनम्रभावेन पृच्छां करोमि मह्यं सम्यक् चिन्तयित्वा उत्तरं देहि। अहं गजात् पर्वतात् अपि किं भारयुक्तः अस्मि येन सत्वरं मां न उद्धरसे इत्यर्थः।

**विशेषः** - अस्मिन् श्लोके वियोगिनीवृत्तम्। दुःखाभिव्यक्तये इदं वृत्तं कविभिः प्रयुज्यते।

**(5) अयमत्यधमोपि निर्गुणो दयनीयो भवता दयानिधे।**
**वमतां फणिनां विषानलं किमु नानन्दयिता हि चन्दनः॥**

**(करुणालहरी-17)**

**अन्वयः** - अयम् अति अधमः अपि निर्गुणः दयानिधे! भवता दयनीयः। किमु विषानलं वमतां फणिनां हि चन्दनः न आनन्दयिता?

**भावार्थः** - एषः (जगन्नाथः) अत्यन्तं निकृष्टः अपि गुणरहितः, हे करुणानिधे! भवतः दयायाः पात्रम् अस्ति। विषरूपाम् अग्निं वमतां सर्पाणां कृते चन्दनवृक्षः (मलयजवृक्षः) आनन्ददायकः न किम्? निश्चयेन आनन्दप्रदो भवति।

**(6) स्मरो नामं नामं त्रिजदभिरामं तव पदं**
**प्रपेदे सिद्धिं यां कथमिव नरस्तां कथयतु।**
**यया पातं पातं पदकमलयोः पर्वतचरो**
**हरो हा रोषार्द्रामनुनयति शैलेन्द्रतनयाम्॥**

**(लक्ष्मीलहरी-11)**

**अन्वयः** - त्रिजगदभिरामं तव पदं नामं नामं स्मरः यां सिद्धिं प्रपेदे तां कथम् इव नरः कथयतु। यया पदकमलयोः पर्वतचरः हरः पातं पातं हरः रोषाद्राम् शैलेन्द्रतनयाम् अनुनयति।

**भावार्थः** - हे लक्ष्मि! त्रिलोके तव चरणं मुहुर्मुहुः प्रणम्य कामदेवः यां सिद्धिं प्राप्तवान् तां सिद्धिं मानवः केन प्रकारेण निगदितुं शक्नोति। यया सिद्ध्या चरणारविन्दयोः मुहुर्मुहुः पतित्वा गिरिचरः शिवः क्रोधयुतायाः पर्वतपुत्र्याः पार्वत्याः अनुनयं करोति।

**(7) या सूते सर्वभूतेष्वनुदिनमुदये चेतनाया विलासान्**
**यान्ती सायं निकाये जलनिधिजठरं संजरीहर्ति सद्यः।**
**अत्यर्थं वर्धयन्ती मणिगुणसुषमासम्पदं रत्नसानोः**
**सा नो भानोः प्रभा नो नयनसरिणतो दूरतो जातु पातु॥**

**(सुधालहरी-9)**

**अन्वयः** - या अनुदिनं सर्वभूतेषु चेतनाया विलासान् सूते। निकायं यान्ती सायं जलनिधिजठरं सद्यः संजरीहर्ति। रत्नसानोः मणिगणसुषमासम्पदम् अत्यर्थं वर्धयन्ती, सा भानोः प्रभा नः नयनसरणितः जातु दूरतः न यातु।

**भावार्थः** - या प्रत्यहं सकलप्राणिषु चेतनायाः विभ्रमान् जनयति। गृहं गच्छन्ती सायं सन्ध्या समुद्रस्य जठराग्निं तत्क्षणं नाशयति। सुमेरुगिरेः शिखरस्य मणिरत्नसमूहशोभां नितरां वृद्धिं नयन्ती सा सूर्यस्य शोभा अस्माकं नेत्रपथतः न कदापि दूरं गच्छतु।

**( 8 ) समीपे संगीतस्वरमधुरभङ्गी मृगदृशां**
**विदूरे दानान्धद्विरदकलभोद्दामनिनदः।**
**बहिर्द्वारे तेषां भवति हयहेषाकलकलो**
**दृगेषा ते येषामुपरि कमले देवि! सदया॥**

**( लक्ष्मीलहरी-4 )**

**अन्वयः** - कमले देवि! येषाम् उपरि ते एषा सदया दृक् तेषां समीपे मृगदृशां संगीतस्वरमधुरभङ्गी, विदूरे दानान्धद्विरदकलभोद्दामनिनदः द्वारे बहिः हयहेषाकलकलो भवति।

**भावार्थः** - हे लक्ष्मि देवि! येषाम् उपरि तव इयं दयासहिता दृष्टिः निपतति तेषां समीपे हरिणनयनानां मधुरस्वरेण सम्पन्नं संगीतं भवति, दूरे मदान्धकरिणां शावकानाम् उत्कटध्वनयः श्रूयन्ते, अपि च द्वारात् बहिः अश्वानां ह्रेषानां कलकलनादः भवति।

**( 9 ) अयि गर्तमुखे गतः शिशुः पथिकेनापि निवार्यते जवात्।**
**जनकेन पतन् भवार्णवे न निवार्यो भवता कथं विभो॥**

**( करुणालहरी-26 )**

**अन्वयः** - अयि! पथिकेन अपि गर्तमुखे गतः शिशुः जवात् निवार्यते। विभो! भवता जनकेन भवार्णवे पतन् कथं न निवार्यः?

**भावार्थः** - हे नाथ! पथि गच्छता यात्रिणा अपि अवरे पतितः बालकः वेगेन रक्ष्यते। विभो! भवता भगवता पित्रा संसारसागरे निपतन् अहं किमर्थं न रक्ष्ये। भवता अयं दीनः रक्षणीयः इति भावः।

## स्वाध्यायः

**1. रिक्तस्थानपूर्तिं कुरुत।**

(1) जगन्नाथेन ......... लहरीकाव्यानि रचितानि। (पञ्च, सप्त, दश)
(2) गङ्गालहर्यां ......... पद्यानि सन्ति। (पञ्चचत्वारिंशत्, द्विपञ्चाशत्, अष्टपञ्चाशत्)
(3) सुधालहर्यां ......... अनुसरणं दृश्यते। (नीतिशतकस्य, अमरुशतकस्य, सूर्यशतकस्य)
(4) ......... विष्णुलहरी इत्यपि नाम्ना प्रसिद्धा। (करुणालहरी, सुधालहरी, लक्ष्मीलहरी)
(5) लक्ष्मीलहर्याः श्लोकाः ......... छन्दसि निबद्धाः। (स्रग्धरा, शिखरिणी, मालिनी)
(6) लहरीपञ्चके आहत्य ......... श्लोकाः सन्ति। (175, 185, 195)
(7) गङ्गालहर्याम् एकत्र कविः ......... इव गङ्गायाः शरणं व्रजति। (भक्तः, बालकः, दरिद्रः)
(8) गङ्गायाः जलं ......... मूर्तिमत् पुण्यमस्ति। (नराणाम्, पशूनाम्, देवानाम्)
(9) कालिन्दी ......... नदी कथ्यते। (गङ्गा, यमुना, कावेरी)
(10) स्मरः.........। (शिवः, विष्णुः, कामदेवः)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) जगन्नाथस्य सर्वोत्तमं लहरीकाव्यं किम्?

(2) स्वनिर्धनत्वमपाकर्तुं जगन्नाथेन कस्य लहरीकाव्यस्य रचना कृता?

(3) लहरीकाव्येषु लघुकायं लहरीकाव्यं किम्?

(4) करुणालहर्यां कविः कस्य देवस्य आराधनं चकार?

(5) गङ्गालहर्याः मङ्गलाचरणं कीदृशं मङ्गलाचरणम्?

(6) अमृतलहर्याः श्लोकेषु कस्य छटा दृग्गोचरीभवति?

(7) जगन्नाथः स्वं काभ्यां गुरुतरं मन्यते?

(8) दुःखाभिव्यक्तये कविभिः किं वृत्तम् उपयुज्यते?

(9) विषरूपामग्निं वमतां फणिनां कृते कः आनन्दयिता?

(10)कस्य प्रभा नयनसरणितः दूरतः न यातु?

**3. टिप्पणीं लिखत।**

(1) गङ्गालहरी।

(2) लक्ष्मीलहरी।

(3) पञ्चलहरीकाव्ये काव्यसौन्दर्यम्।

**4. सविस्तरमुत्तरं दत्त।**

(1) सुधालहर्याः वैशिष्ट्यं प्रदर्शयत।

(2) करुणालहर्यां कविः जगन्नाथः किं प्रार्थयते?

(3) गङ्गालहर्याः मंगलश्लोके गङ्गाजलं कीदृशं निरूपितम्?

(4) 'स्मरो नामं नामम्' इति श्लोकं व्याख्यायत।

(5) येषामुपरि कमलायाः सदया दृक् भवति तेषां किं किं जायते?

**5. 'अ' विभागं 'ब' विभागेन सह योजयत।**

| अ | ब |
|---|---|
| (1) गङ्गालहरी | पञ्चाशत् पद्यानि |
| (2) अमृतलहरी | त्रिपञ्चाशत् पद्यानि |
| (3) लक्ष्मीलहरी | त्रिंशत् पद्यानि |
| (4) सुधालहरी | एकादश पद्यानि |
| (5) करुणालहरी | एकचत्वारिंशत् पद्यानि |

●

## ९

# चम्पूकाव्यपरिचयः

**प्रस्तावना**

संस्कृतवाङ्गमये ''चम्पू'' रित्येतामभिधां भजमानस्य काव्यस्य अवतारणा गद्यकाव्यानन्तरं संवृत्ता। चम्पूकाव्यं वस्तुतः गद्यकाव्यस्यैव उपबृम्हणं प्रतीयते। तस्मात् तस्य जन्म गद्यकाव्यस्यानन्तरं स्वाभाविकतया सिद्ध्यति। दशमशतकात् प्राक् चम्पूकाव्यस्य दर्शनं न भवति। कृष्णयजुर्वेदस्य त्रिष्वपि शाखासु गद्यपद्यमयी रचना अस्ति। अथर्ववेदस्य षष्ठः अंशः गद्यपद्यमयोऽस्ति। पुराणेष्वपि इयं प्रवृत्तिः दृश्यते। विष्णुपुराणस्य चतुर्थांशः तथा श्रीमद्भागतपुराणस्य पञ्चमस्कन्धः गद्यपद्यमयोऽस्ति यस्मिंश्च प्रदीर्घसमासानां प्राचुर्यमस्ति। तथापि चम्पूकाव्यं गद्यपद्ययुतं विशिष्टं काव्यम्।

**व्युत्पत्तिः**

चम्पूशब्दस्य व्युत्पत्तिः चुरादिगणस्य ''चपि'' इति धातोः ''उ'' प्रत्यये कृते चम्पयति चम्पति वा इति चम्पूः इति रूपं सिद्ध्यति। किन्तु अनया व्युत्पत्या शब्दस्य स्वरूपमात्रम् उपस्थितं भवति। यस्याः रचनायाः कृते चम्पूशब्दस्य व्यवहारः भवति, तत्सरलतया बोधयितुम् अयं शब्दः समर्थः नास्ति। गत्याः चत्वारः अर्थाः भवन्तिगमनम्, ज्ञानम्, प्राप्ति, मोक्षश्चेति। अनेनाधारेण एवं वक्तुं शक्यते यत्चम्पूरिति सा रचना वर्तते या मोक्षसहोदरानन्दं (ब्रह्मानन्दसहोदरानन्दः) कारयति इति।

**चम्पूकाव्यस्य उद्भवः विकासश्च**

एवं यद्यपि चम्पूकाव्यात् पूर्वमेव संस्कृते गद्यपद्ययोः मिश्रिलेखनपद्धतेः प्रारम्भः वैदिकवाङ्मयादेव भवति तथापि कृष्णयजुर्वेदादिषु गद्यपद्ययोर्मिश्रणं दृश्यते परं न स गद्यपद्ययोर्योगस्तादृशः, यादृशो हि चम्पूकाव्येऽभिमतः। अपि च सर्वैः विद्वद्भिः चम्पूकाव्यस्य प्रवर्तकत्वेन त्रिविक्रमभट्टः एव स्वीक्रियते। चम्पूकाव्यं गद्यपद्ययोर्मिश्रणाय अन्यामेव विद्यामभिलषते। न सा विधा वैदिके साहित्ये पालीभाषारचितेषु गद्यपद्यमिश्रेषु जातकेषु वा अवाप्यते। आर्यशूरस्य जातकमालायामपि गद्यपद्ययोर्निधानं येन विधिनानुष्ठितं स विधिरपि न चम्पूकाव्यलक्षणकृतामभीष्टः।

चम्पूकाव्यस्यान्तर्भावः आख्यायिकाकायामपि न भवति। आख्यायिकायां नायकः स्वयं वक्ता भवति अत्र तु न। चम्पूकाव्यस्य सामान्यलक्षणं ''गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते।'' तत्र लक्षणकारैरभिलष्यते यत् चम्पूकाव्ये भावात्मकानां वर्णनं पद्येषु स्यात् किञ्च वर्णनात्मकानां विषयाणां विवरणं गद्येषु। सम्भवतः एतद्विधस्यैव सौन्दर्यस्य चम्पूषु वाञ्छितत्वात् भोजराजः-

**''गद्यानुबन्धरसमिश्रितपद्यसूक्ति-**

**हृद्यापि वाद्यकलया कलितेव गीतिः।'' इत्याचख्यौ।**

अन्येन केनचिदुक्तं तल्लक्षणम्-

**''गद्यपद्यमयं श्रव्यं सबन्धं बहु वर्णितम्।**

**सालङ्कृतं रसैः सिक्तं चम्पूकाव्यमुदाहृतम्॥''**

लक्षणमिदम् अधिकमुपयुक्तमिव भाति। लक्षणमिदं गद्यपद्यमिश्रिते नाटके न सङ्गच्छते, यतो हि नाटकं दृश्यकाव्येऽन्तर्भवति, चम्पूकाव्यं तु श्रव्ये अन्तर्भवति। साम्प्रतं यानि चम्पूकाव्यान्युपलभ्यन्ते तानि सन्ति दशमशतकार्वाक्कालगामीनि। परं षष्ठे शतके सम्भूते हि काव्यादर्शकारो दण्डी कविश्चम्पूकाव्यस्य लक्षणम् अलिखत्। एतेन तु चम्पूकाव्यानां रचना तस्मिन् काले वा तत्कालात् प्रागपि सञ्जातेति सिद्ध्यति। पुरातनं यच्चम्पूकाव्यमद्योपलभ्यते तदस्ति त्रिविक्रमभट्टस्य ''नलचम्पूकाव्यम्।'' सप्तमशताब्द्यां कविर्दण्डी ''गद्यपद्यमयी काचित् चम्पूरित्याभिधीयते'' इति (काव्यादर्शे 1-31) तल्लक्षणं उक्तवान्। यस्य हेमचन्द्रविश्वनाथौ प्रमाणत्वेन स्वीकुरुतः। हेमचन्द्रः चम्पूकाव्ये साङ्कत्वं सोच्छवासत्वञ्च आवश्यकमिति स्वीकरोति, यतो हि केषाञ्चन चम्पूग्रन्थानां विभाजनम् अङ्केषु केषाञ्चन विभाजनम् उच्छ्वासेषु कृतमासीत्। चम्पूकाव्यस्य गद्यपद्ययोः अलङ्काराः अपेक्षन्ते। गद्ये समासबहुलता पद्ये छन्दस्सु विविधता च अपेक्षिता।

डॉ. छबीनाथत्रिपाठीवर्यः स्वकीये ''चम्पूकाव्यस्य आलोचनात्मकमैतिहासिकञ्चाध्ययनम्'' नामकशोधप्रबन्धे चम्पूकाव्यस्य मार्मिकसमीक्षणं अकरोत्। तदनुसारं चम्पूकाव्यस्य विकासः दशमशताब्द्याः सततं जायमानः अस्ति।

**कानिचन प्रसिद्धानि चम्पूलक्षणानि-**

1. गद्यपद्यमयं काचिच्चम्पूरित्यभिधीयते। (दण्डी - काव्यादर्शः 1/31)
2. मिश्रं चम्पूरिति ख्यातम्। (अग्निपुराणम् 326/30)
3. याऽख्यायिकेव सोच्छ्वासा दिव्यपद्यगद्यमयी।
   सा दमयन्तीवासवदत्तादिरिहोच्यते चम्पूः॥ (भोजदेवः)
4. गद्यपद्यमयी साङ्का सोच्छ्वासा चम्पूः। (हेमचन्द्रः, काव्यानुशासनम्)
5. गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते। (विश्वनाथः, साहित्यदर्पणः 6/336)
6. गद्यपद्यात्मकं काव्यं चम्पूरित्यभिधीयते। (श्रीकृष्णः, मन्दारमरन्दचम्पूः)

**कानिचन प्रसिद्धानि चम्पूकाव्यानि :-**

**नलचम्पू :** त्रिविक्रमभट्टः (ई. दशमशताब्दी) नलदम्यन्तीकथाधारिता।

**मदालसाचम्पू :** त्रिविक्रमभट्टः (ई. दशशताब्दी) मार्कण्डेयपुराणकथाधारिता।

**यशस्तिलकचम्पू :** सोमदेवसूरिः (ई. दशमशताब्दी) गुणभद्रकृतस्य उत्तरपुराणस्य कथाधारिता।

**जीवन्धरचम्पू :** हरिश्चन्द्रः (ई. दशमशशताब्दी) उत्तरपुराणकथाधारिता।

**रामायणचम्पू :** भोजराजः (एकादशशताब्दी) रामायणकथाधारिता।

**भागवतचम्पू :** अभिनवकालिदासः (ई. एकादशशताब्दी) कृष्णकथाश्रिता।

**भारतचम्पू :** अनन्तभट्टः (पञ्चदशशताब्दी) महाभारतकथाधारिता।

**आनन्दवृन्दावनचम्पूः** कविकर्णपूरः (ई. षोड्शशताब्दी)।

**गोपालचम्पू :** जीवगोस्वामी (ई. सप्तदशशताब्दी)।

**आनन्दकन्दचम्पू :** मित्रमिश्रः (सप्तदशशताब्दी)।

**पारिजातहरणचम्पू :** श्रीकृष्णशेषः (प्रसिद्धवैयाकरणः, ई. षोडशशताब्दी)।

**नृसिंहचम्पू :** सूर्यकविः (षोडशशताब्दी)।

**नीलकण्ठविजयचम्पू :** नीलकण्ठ दीक्षितः (सप्तदशशताब्दी)।

**वरदाम्बिकापरिणयचम्पू :** तिरुमलाम्बा (षोडशशताब्दी)।

**शङ्करचम्पू :** लक्ष्मीपतिः।

**जगद्गुरुविजयचम्पू :** श्रीकण्ठशास्त्री।

## स्वाध्यायः

**1. रिक्तस्थानपूर्तिं कुरुत।**

(1) चम्पूकाव्यं ......... उपबृंहणम्। (गद्यकाव्यस्य, पद्यकाव्यस्य, न कस्यापि)

(2) ......... अनन्तरं चम्पूकाव्यस्य जन्म अभवत्। (गद्यकाव्यस्य, पद्यकाव्यस्य, न कस्यापि)

(3) अथर्ववेदस्य ......... अंशः गद्यपद्यमयोस्ति। (पञ्चमः, षष्ठः, सप्तमः)

(4) जातकमाला ......... कृतिः। (हेमचन्द्रस्य, लक्ष्मणस्य, आर्यशूरस्य)

(5) आख्यायिकायां नायकः स्वयं ......... भवति। (वक्ता, श्रोता, विदूषकः)

(6) चम्पूकाव्ये वर्णनात्मकविषयाणां विवरणम् ......... क्रियते। (प्रशंसया, पद्यैः, गद्यैः)

(7) "गद्यानुबन्धरसमिश्रित" इति ......... उक्तम्। (भोजराजेन, भासेन, त्रिविक्रमभट्टेन)

(8) मदालसाचम्पूकाव्यस्य रचयिता .........। (भोजराजः, त्रिविक्रमभट्टः, श्रीकृष्णः)

(9) भोजराजेन ......... लिखिता। (भारतचम्पूः, रामायणचम्पूः, नलचम्पूः)

(10) भागवतचम्पूः ......... लिखिता। (त्रिविक्रमभट्टेन, अभिनवकालिदासेन, हरिश्चन्द्रेण)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) कृष्णयजुर्वेदस्य कतिशाखासु गद्यपद्यमयी रचना अस्ति?

(2) चम्पूकाव्यस्य सर्वमान्यः प्रवर्त्तकः कः?

(3) हरिषेणस्य का कृतिः?

(4) चम्पूकाव्ये भावात्मकं वर्णनं कैः क्रियते?

(5) काव्यादर्शस्य रचयिता कः?

(6) पुरातनं चम्पूकाव्यं किम्?

(7) गोपालचम्पूकाव्यस्य रचयिता कः?

(8) सूर्यकविना किं चम्पूकाव्यं रचितम्?

(9) शङ्करचम्पूः केन विरचिता?

(10) काव्यानुशासनस्य रचयिता कः?

**3. टिप्पणीं लिखत।**

(1) त्रिविक्रमभट्टः।

(2) चम्पूकाव्यम्।

**4. सविस्तरमुत्तरं दत्त।**

(1) अन्यकाव्यप्रकारेभ्यः चम्पूकाव्यस्य भेदः कः ?

(2) प्रसिद्धानां चम्पूकाव्यानां नामानि लिखत।

(3) प्रसिद्धानि चम्पूकाव्यस्य लक्षणानि लिखत।

**5. 'अ' विभागं 'ब' विभागेन सह योजयत।**

| अ | ब |
|---|---|
| (1) त्रिविक्रमभट्टः | आनन्दकन्दचम्पूः। |
| (2) जीवगोस्वामी | जगद्गुरुविजयचम्पूः। |
| (3) श्रीकण्ठशास्त्री | भारतचम्पूः। |
| (4) अनन्तभट्टः | गोपालचम्पूः। |
| (5) मित्रमिश्रः | नलचम्पूः। |

**छात्रप्रवृत्तिः**

चम्पूकाव्यशैल्यवगमनम् एवं तस्यैतिहासिकज्ञानं वर्धनीयम्।

**अध्यापकप्रवृत्तिः**

केषाञ्चन चम्पूकाव्यानां परिचयं विस्तरेण छात्रेभ्यः यच्छन्तु।

●

# १०

# नलचम्पूः

**प्रस्तावना**

गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते इति विश्वनाथोक्त्या गद्यकाव्यं पद्यकाव्यं चातिरिच्यानुवर्तिनि काले उभयोः सम्मिश्रणेन चम्पूकाव्यस्य नवीना विधा दृष्टिपथमायाति। इत्थं संस्कृतवाङ्मये चम्पूसाहित्यमतीव प्रशस्तं पदमलङ्करोति। चम्पूकाव्ये हि गद्यपद्ययोः स एव सम्बन्धः यः किल सङ्गीते गीतवाद्ययोर्नाम। दशम-शताब्द्याः प्राक् तु चम्पूकाव्यानां नामापि नानुश्रूयते स्म। अस्य सर्वप्रथमः उल्लेखः ख्रिस्त 600 तमशतकभवेन तत्रभवता दण्डिना काव्यादर्शे कृतः। तत्र त्रिविक्रमभट्टविरचिता नलचम्पूः चम्पूकाव्यस्य प्रथमं काव्यं स्वीक्रियते। ततः इयं चम्पूकाव्यस्य स्वतन्त्रपरम्परा कालान्तरे बहुविस्तृता सञ्जाता।

**कविवरः त्रिविक्रमभट्टः**

नलचम्पूकारः त्रिविक्रमभट्टः चम्पूकाव्यस्य आद्यः प्रवर्तकः वर्तते। नलचम्पूकाव्यस्य प्रारम्भे सः स्वीयं परिचयं ददाति तदाधारेण अयं महाकविः शाण्डिल्यगोत्रीयः ब्राह्मणः आसीत्।

त्रिविक्रमभट्टस्य पितामहः श्रीधरः, पिता च देवादित्यः नेमादित्यो वा। दन्तकथाधारेण अयं बाल्यकाले मन्दबुद्धिः आसीत् कठोरं विद्याभ्यासं कृत्वा एष कालान्तरे विद्वत्वं प्राप्तवान्। त्रिविक्रमभट्टस्य द्वे कृती उपलभ्येते - 1. नलचम्पूः 2. मदालसाचम्पूः।

त्रिविक्रमभट्टः स्वग्रन्थे बाणमुल्लिखति। भोजराजश्च नलचम्पूश्लोकं सरस्वतीकण्ठाभरणे उल्लिखति। अनेन बाणस्य परवर्ती भोजराजस्य पूर्ववर्ती च कविः त्रिविक्रमभट्टः। बाणस्य कालः 600 ई. वर्षम्, भोजराजस्य च समयः 1100 ई. वर्षम्। एषः राष्ट्रकूटवंशजस्य इन्द्रराजतृतीयस्य आश्रितः कविः आसीत्। नवसारीजनपदप्राप्ताभिलेखेन तस्य समयः ई. नवमशताब्दिः आसीत्, अनेनाधारेण कवेः समयः दशमशताब्देः पूर्वार्धः स्वीक्रियते।

**नलचम्पूविषयकी जनश्रुतिः**

नलचम्पूरचना विषये एका किंवदन्ती प्रचलिता वर्तते। त्रिविक्रमभट्टस्य पिता नेमादित्यः मूर्धन्यः पण्डितः आसीत्। सः कस्यचिद्राज्ञः सभापण्डितः अपि आसीत्। एकदा कार्यवशात् बहिर्देशं गते पितरि कश्चन विपक्षी प्रकाण्डपण्डितः सभापण्डितेन सह शास्त्रार्थं कर्तुम् ऐच्छत्। तदा निरक्षरतया अयं त्रिविक्रमः अतिशयलज्जामनुभवन् कुलदेवतां सरस्वतीमाराधितवान्। सः स्वपितुः मानं स्थापयितुं राजसभायां स्थितं विपक्षिणं पण्डितं पराजेतुं शक्तिं प्रार्थितवान्। प्रीता सरस्वती पितुः आगमनं यावत् अमोघपाण्डितस्य वरं दत्तवती। राजसभां गत्वा पण्डितं स्वतीक्ष्णबुद्ध्या पराजितवान् ततश्च सरस्वत्याः वरदानं लब्ध्वा नलचम्पूलेखनमारब्धवान्। पितुः आगमनात् पूर्वं सः सप्त उच्छ्वासान् लिखितवान्। पितरि आगते सः पुनः ज्ञानहीनः संजातः। एतस्मात् कारणादेव इयं नलचम्पूः अपूर्णा वर्तते। कथेयं कपोलकल्पिता एव भाति तथापि इयं जनश्रुतिः लोके श्रूयते।

**नलचम्पूकाव्यस्य कथावस्तु**

नलचम्पूरियं 'दमयन्तीकथा' इति नाम्ना अपि प्रसिद्धा। अस्मिन् काव्ये सप्त उच्छ्वासाः सन्ति। सप्तसु उच्छ्वासेषु देवसंवादादारभ्य नलदमयन्त्योः स्वयंवरवर्णनान्तम् अपूर्णं कथावस्तु साम्प्रतं लभते। एतत् कथानकं महाभारतस्य नलोपाख्यानात् प्रभावितं दृश्यते। प्रत्येकम् उच्छ्वासस्य अन्तिमे पद्ये 'हरिचरणसरोजः' इति पदं विद्यते एतस्मात् कारणात् इयं चम्पूः 'हरिचरणसरोजाङ्क' इति नाम्ना ज्ञायते। त्रिविक्रमस्य प्रसिद्धं नाम 'यमुना-त्रिविक्रमः' आसीत्। घण्टामाघः, आतपत्र-भारविः, दीपशिखा-कालिदास इव समालोचकाः अधोलिखितपदाधारेण इमाम् उपाधिं दत्तवन्तः। स च श्लोकः यथा–

**उदयगिरिगतायां प्राक् प्रभापाण्डुताया-**
**मनुसरति निशीथे श्रृङ्गमस्ताचलस्य।**
**जयति किमपि तेजः साम्प्रतं व्योममध्ये**
**सलिलमिव विभिन्नं जाह्नवं यामुनं च॥**

**( नलचम्पूः 6/1 )**

अस्मिन् पद्ये स्वमौलिकप्रतिभया कविः यमुनायाः ग्रहणं करोति यमुनायाः उत्कृष्टवर्णनेन प्रीताः विद्वांसः अस्मै यमुनात्रिविक्रमोपाधिं दत्तवन्तः।

नलचम्पूकाव्यस्य उच्छ्वासानामाधारेण संक्षेपतः कथानकं दीयते।

**प्रथमः उच्छ्वासः**

प्रथमे उच्छ्वासे त्रिविक्रमभट्टः भगवन्तं शिवं मङ्गलाचरणे स्मृत्वा वाल्मीकि-व्यास-कालिदासादीनां वैशिष्ट्यं प्रदर्शयति। स्वगोत्रस्य ततश्च आर्यावर्तस्य निषधायाः सभङ्गश्लेषेण सुन्दरं वर्णनं करोति। निषधायाः राज्ञः नलस्य सालङ्कायनसुतस्य 'श्रुतशील' नाम्नः महामन्त्रिणः वर्णनं वर्तते। तदनन्तरं सेनापत्या बाहुकेन सह नलेन आखेटवने वराहस्य वधः वर्णितः। आखेटश्रमक्लान्तः नलः शाल्मलितरोः अधः विश्रामं करोति तदा पथिकस्य आगमनं भवति। पथिकमुखेन विदर्भदेशस्य अद्भूतवर्णनात्परं कस्याश्चित् राजकुमार्याः अनुपमसौन्दर्यं श्रुतम्। राजकुमार्याः वृत्तान्तजिज्ञासया हृदये कामाग्निः प्रकटितः जातः, तस्याः स्मृतौ इत्थं वर्षाकालो व्यतीतो भवति।

**द्वितीयः उच्छ्वासः**

द्वितीयोच्छ्वासे शरदृतोः प्रकृतिसौन्दर्यप्रियः राजा वनपालिकया सह वनविहारं करोति। उद्याने वृक्षलतामयूरकोकिलभ्रमरादीनां विशेषतां विवर्ण्य सर्वर्तुनिवासवने राजहंसस्य अवतरणं कविः वर्णयामास। नलः राजहंसं जग्राह ततश्च "स्वस्ति" इति वचसा राजहंसः राजानं भोक्तुं न्यवेदयत्। तत्रस्थिता राजहंसी अपि स्वपतिं राजहंस त्यक्तुं निवेदयति राजाऽपि श्लिष्टपदैः तेन सह वार्तालापं करोति। तदैव अन्तरिक्षमण्डलात् कापि आकाशवाणी श्रूयते यदयं हंसः त्वां प्रति दमयन्त्याः हृदये प्रेमजागृत्यै दूतो भविष्यति इति। राजा दमयन्त्याः नाम श्रुत्वा तस्य विषये ज्ञातुमिच्छति तदा हंसः दक्षिणदेशे स्थितस्य कुण्डिनपुरस्य वर्णनं कृत्वा भीमनृपस्य प्रियङ्गुमञ्जर्याः महाराज्ञ्याश्च विषये विज्ञापयति। वनविहारसमये प्रियङ्गुमञ्जरी वानरशावकेन सह वानरीं दृष्ट्वा स्वसन्तानहीनत्वे दुःखमनुभवति। सन्ततिप्राप्त्यै अम्बिकापतिं महेश्वरम् आराधयितुं निश्चिनोति शिवमाराध्य उभावपि राजभवनं प्रविशतः ततश्च शय्यायां निद्राधीनौ भवतः।

**तृतीयः उच्छ्वासः**

अस्य उच्छ्वासस्य प्रारम्भे उषःकाले प्रियङ्गमञ्जरी स्वप्ने भवान्या सह शिवं पश्यति। शिवः तस्यै मञ्जरीं दत्त्वा दमनकमुनेः आगमनं सूचयति। महाराज्ञी स्वप्ने मञ्जरीं स्वीकृत्य प्रणमति। तदैव प्रातःकालो भवति, सूर्यं नत्वा सा स्वप्नविषयकं वृत्तान्तं राज्ञे भीमाय निवेदयति। दैवज्ञैः स्वप्नफलरूपेण अपत्यप्राप्तेः शुभसङ्केतो दीयते। तदैव कश्चन तरुणो मुनिः अर्कमण्डलात् अवततार। शिवाज्ञया वयमागताः इत्युक्त्वा मुनिः तस्यै कन्यारत्नप्राप्तेः आशिषं दत्तवान्। पुत्रकामिनी कन्याप्राप्तेः वरं श्रुत्वा खिन्ना सती श्लिष्टैः वाक्यैः मुनिं पीडयति। ततश्च कर्मानुरूपमेव फलं प्राप्नोसि इति अवबोधनेन सा अपराधाय क्षमां याचते। कालक्रमेण तस्यां कन्या प्रादुर्बभूव, दमनकमुनेः वरदानहेतोः तस्याः 'दमयन्ती' इति नामकरणं जातम्। सा च शनैः शनैः शैशवकालक्रीडाभिः सर्वेषां मनः आकृष्टवती। इत्थं गच्छता कालेन दमयन्ती यौवनावस्थां प्राप्नोति।

नलः हंसमुखेन कथया प्रीतः सन् हंसं वयःसन्धेः वृत्तान्तं पृच्छति। हंसोऽपि दमयन्त्याः अप्रतिमं सौन्दर्यं प्रशंसन् तूष्णीभवति।

**चतुर्थः उच्छ्वासः**

हंसस्य माध्यमेन दमयन्त्याः वृत्तमाकर्ण्य नलः अनुमिनोति 'प्रायः इयं सैव सुन्दरी स्यात् या पथिकेन मार्गे वर्णिता' इत्थं विचिन्त्य मन्दं हसन् हंसं मनोहरक्रीडासरसि विहरितुं निर्दिशति। राजा राजभवनं गच्छति तदा हंसोऽपि राजहंसवर्गेण सह गगने उड्डयते। शीघ्रमेव सः राजहंसः कुण्डिनपुरं गत्वा कन्यान्तःपुरस्थे उद्यानक्रीडासरोवरे अवतीर्य

दमयन्तीं सखिभिः सह विहरन्तीं पश्यति। तत्र दमयन्ती अपि लीलासहितं तं हंसं गृह्णाति। गृहीतः हंसः दीर्घायुष्यस्य सुखमयजीवनस्य च आशीर्वादं दत्त्वा वदति – 'दर्शनीयं दीर्घनेत्रं नलं पतिरूपेण प्राप्नुहि।'

दमन्यती हंसस्य संस्कृतवाणीं श्रुत्वा विस्मिता भवति। गौरीमहोत्सवे गच्छतः पथिकस्य मुखेन सा यस्य पुरुषस्य विषये श्रुतवती स एव नलः इति चिन्तयति। साऽपि कुतूहलेन नलविषये ज्ञातुमिच्छति। हंसः निषधदेशस्य सुन्दरवर्णनेन सह महाराजस्य वीरसेनस्य राज्यव्यवस्थां निरूपयति। अम्बिकापतेः भगवतः कृपया पुत्ररत्नरूपेण नलं प्राप्नोति। नलोऽपि श्रुतशीलेन मित्रेण सह नैकासु विद्यासु नैपुण्यं प्राप्नोति। काले आगते राज्ञः नलस्य राज्याभिषेको भवति पिता अपत्यस्याऽपि अपत्ये जाते राज्यं विहाय वनं प्रति गतवान्। सर्वेऽपि विलापं कृतवन्तः।

इत्थम् इयं दमयन्तीकथा अस्मिन् उच्छ्वासे प्रमुखतया चर्चिता दृश्यते।

**पञ्चमः उच्छ्वासः**

निषधराजस्य नलस्य वृत्तमाकर्ण्य दमयन्त्याः हृदये कश्चन अवर्णनीयः अनुरागः समुत्पन्नः। तस्याः मन्मथव्यथां दृष्ट्वा ''परिहासशीला'' इत्याख्यां सखीं राजहंसः पुनः नलविषयकीं कथां श्रावयितुं वदति। इत्युभयोः परिहासवार्ता कथायां हास्यरसं जनयति। पुनः हंसः दमयन्त्याः मुक्तावलीं प्राप्य हंसगणैः सह आकाशमार्गं गच्छति। दमयन्ती नलचिन्तने भोजनम्, पानम्, भाषणम्, शयनं सर्वं विस्मरति।

राजहंसः वन-पर्वत-नगराणि उल्लंघ्य दमयन्त्याः मुक्तावलीं नलाय समर्पयति। ततः बहुविधां वार्तां कृत्वा पुनः नलः राजभवनं प्रविशति। जाते प्रभाते हंसः राज्ञः अनुमतिं गृहीत्वा अभीष्टस्थानं व्रजति। दमयन्त्याः तारूण्यं वीक्ष्य राजा भीमः मन्त्रिणां परामर्शेण स्वयंवरमायोजयति। तस्य सूचनायै राजा दूतान् चतुर्षु दिक्षु प्रेषयति, दमयन्त्यपि एकं वृद्धब्राह्मणं नलस्य समीपे प्रेषयति। निमन्त्रणं प्राप्य राजा नलः विदर्भदेशं प्रति गच्छति। मार्गे नर्मदातटे श्रुतशीलेन सह विश्रामं करोति तदा आकाशादवतरन्तं पुरुषं पश्यति। ततः इन्द्रादिदेवाः आयान्ति। इन्द्रसङ्केतेन कुबेरः स्वयं-वरागमनं नलाय निवेदयति। मार्गे लोकपालाः इन्द्रादिदेवेभ्यः पतिरूपेण दमयन्ती वरेत्तदर्थं नलं प्रार्थितवन्तः। नलोऽपि शोकसंतप्तमनसा प्रस्तावं स्वीचकार किन्तु श्रुतशीलः चिन्तातुरं नलम् आश्वासयामास यत् 'दमयन्ती भवन्तमेव वरिष्यति' मास्तु चिन्तनमन्यथा भवतः। तथापि नलः शान्तिं न लेभे। एकान्तविहारे नलस्य मनः विचालयितुं देवाः बहुविधान् उपायान् अकुर्वन् किन्तु श्रुतशीलस्य प्रेरणया नलः पुनः स्वस्थो भवति। ततः सन्ध्यावन्दनादिकं विधाय नलः वीणास्वरेण सह निद्राधीनो भवति।

**षष्ठः उच्छ्वासः**

अस्य उच्छ्वासस्य प्रारम्भः प्रभातेन भवति। सूर्योपासनं विधाय नलः गजमारुह्य ससैन्यः नर्मदानदीमुत्तीर्य विन्ध्याटवीं प्राप्नोति। विश्रामकाले पथिकेन सह तस्य संवादो जायते। पथिकः पुष्कराक्षः दमयन्तीसन्देशं नलाय निवेदयति। पुनः सः दमयन्तीप्रेषितं प्रणयपत्रं नलाय ददाति। मार्गे किन्नरमिथुनेन सह परिचयो भवति। सुन्दरवागुरिके नलं प्रणम्य अङ्गुलीयकं वस्त्रयुगलं च नलाय यच्छतः। नलः तयोः धन्यवादं मन्यते। सूर्यास्ते जाते भोजनादिकं समाप्य किन्नरमिथुनात् गीतं श्रुत्वा सुखमया रात्रिः व्यतीता भवति। अन्येद्युः ससैन्यः निषधराजः नलः विदर्भदेशं प्रति गच्छति। मार्गे कामासक्तं गजं विलोक्य तत्र विघ्नं नोत्पाद्य सः कुण्डिनपुरस्य समीपं गच्छति। नलागमनवृत्तान्तं कुण्डिननगरवासिनः प्राप्य आनन्दिताः भवन्ति। नलस्य स्वागताय सम्पूर्णनगरं शोभितं दृश्यते स्म।

**सप्तमः उच्छ्वासः**

अस्मिन् अन्तिमे उच्छ्वासे नलसमीपं प्रतिहारः आगम्य कुण्डिनमागन्तुं प्रार्थयते। विदर्भराजः भीमः अपि स्वयं स्वागताय उपस्थाय नलं साधुवचांसि निगदति। नलः सत्कारेण प्रीतः राजभवनं प्रविशति। दमयन्त्या प्रेषिताः दास्यः विविधान् उपहारान् यच्छन्ति नलोऽपि ताः पुरस्करोति। दमयन्त्या प्रेषितं भोजनं भुक्त्वा तृप्तः सन्नपि अतृप्तः नलः आसीत्। ततः प्रतिहारस्य अनुमत्या पर्वतकः राजभवनस्य वैभवं दमयन्त्याश्च मेलनं ज्ञापयति। पुनः पुष्कराक्षमुखेन 'भवान् इन्द्रादिलोकपालानां दूतरूपेण अत्र आगतः' इति श्रुत्वा दमयन्ती अतिविषण्णा जाता इत्यपि निवेदितवान्।

देवप्रदत्तकार्यं करणीयं वा न करणीयमिति विमूढावस्थायां सः नलः पुरन्दरवरदानेन अदृश्यरूपेण दमयन्तीप्रासादं प्रविशति ततः दमयन्तीमुपगम्य नैजं रूपं प्रकटयति। दमयन्ती नलस्य सौन्दर्यं दृष्ट्वा नलश्च दमयन्त्या सौन्दर्यं दृष्ट्वा

परस्परं मोहितौ भवतः। नलः वागुरां विलोक्य 'दमयन्ती अभ्यागतानाम् आतिथ्यं न करोति' इति उपालम्भते। दमयन्ती नलस्य स्वागतं करोति पुनः उभावपि परस्परं वार्तालापरतौ भवतः। तन्मध्ये नलः इन्द्रदेवस्य सम्पूर्णमादेशं तस्यै श्रावयति। दमयन्ती मन्दहास्येन अनवधानं प्रदर्श्य सखीभिः सह आलपति। नलः इन्द्रं वृत्वा स्वर्गलोकस्य सुखानि प्राप्तुं कथयति। दमयन्त्याः सखी प्रियवंदिता राजानं कथयति, 'श्रोतव्यं सर्वं दमयन्त्या श्रुतम्' किन्तु सा भवति एव अनुरक्ता, भवन्तं विहाय नान्यं कञ्चित् एषा वरिष्यति।

ततः राजा दमयन्तीरूपमाधुर्यं प्रेक्ष्य मनसि च प्रगाढप्रणयं निधाय प्रस्थितो भवति। दमयन्तीं विचिन्त्य यथाकथञ्चित् नलः रात्रिं यापयति। अनेन सहैव चम्पूकाव्यं समाप्तिमेति।

**नलचम्पूकाव्यस्य वैशिष्ट्यम्**

श्रृङ्गाररसप्रधानमिदं सर्वप्रथमं चम्पूकाव्यं वर्तते। नलचम्पूकाव्ये माधुर्यप्रसादगुणयोः सुभगसमन्वयः वर्तते। तस्य काव्यं अगाधान्तः परिस्पदं विबुधानन्दमन्दिरं, रसान्तरप्रौढं, वहत् सारस्वतं स्रोतः वरीवर्ति यत् परस्य हृदये लग्नं शिरः घूर्णयति। यथोक्तम् -

**किं कवेस्तस्य काव्येन किं काण्डेन धनुष्मतः।**
**परस्य हृदये लग्नं न घूर्णयति यच्छिरः॥**

नलचम्पूकाव्ये श्लेषप्रयोगः यत्र तत्र सर्वत्र विलोक्यते। तत्रापि सभङ्गश्लेषच्छटा पदे पदे काव्यसौन्दर्यं जनयति। यथा रामायणप्रशंसायां कविना रचितोऽयं श्लोकः -

**सदूषणापि निर्दोषा सखरापि सुकोमला।**
**नमस्तस्मै कृता येन रम्या रामायणी कथा॥**

त्रिविक्रमभट्टस्य श्लेषः विरोधाभास-परिसंख्या-दीपक-रूपक-उपमा-उत्प्रेक्षादिभिः अलङ्कारैः सह मिश्रणेन अतितरां कमनीयतां काव्ये जनयति। यथा श्रुतशीलस्य वर्णने विरोधाभासमिश्रः श्लेषः -

**ब्रह्मण्योऽपि ब्रह्मवित्तापहारी स्त्रीयुक्तोऽपि प्रायशो विप्रयुक्तः।**
**सद्वेषोऽपि द्वेषनिर्मुक्तचेताः को वा तादृग् दृश्यते श्रूयते वा॥**

न केवलं पद्येषु अपितु गद्येष्वपि सरसकाव्यधाराप्रवाहः दृश्यतेऽस्मिन् काव्ये। सोपमः श्लेषः अत्र पठित्वैव मनः प्रसादयति। यथा आर्यावर्तवर्णनप्रसङ्गे कविः।

यत्र चतुरगोपशोभिताः सङ्ग्रामा इव ग्रामाः, तुरङ्गसकलभवनाः सर्वत्र नगाः इव नगरप्रदेशाः, सदाचरणमण्डनानि नूपुराणीव पुराणि, सदानभोगाः प्रभञ्जनाः इव जनाः, प्रियालपनसाराणि यौवनानीव वनानि....।

सभङ्गश्लेषप्रयोगे कवेः त्रिविक्रमस्य प्रतिभा विशेषेण अस्मिन् काव्ये स्फुरिता दृश्यते। नग-नगर-वन-उपवन-नदी-सरोवर-आश्रम-चन्द्रोदय-सन्ध्या-वर्षा-शरद्-प्रभातवर्णने कवेः वर्णनचातुरी सहृदयानां हृदये अप्रतिमं कुतूहलं जनयति। इत्थमिदं नलचम्पूकाव्यं चम्पूकाव्यपरम्परायाम् अन्येषां चम्पूकाराणां कृते पथप्रदर्शकं सिद्ध्यति।

**उदात्तनायकोपेता गुणवद्वृत्तमुक्तका।**
**चम्पूश्च हारयष्टिश्च केन न क्रियते हृदि॥**

**स्वाध्यायः**

**1. रिक्तस्थानपूर्तिं कुरुत।**

(1) नलचम्पूकाव्यस्य प्रणेता .........। (भट्टनारायणः त्रिविक्रमभट्टः, विक्रमादित्यः)

(2) नलचम्पूकाव्ये ......... उच्छ्वासाः सन्ति। (पञ्च, सप्त, नव)

(3) त्रिविक्रमभट्टस्य पितामहः ......... आसीत्। (श्रीधरः, शिवदत्तः माघः)

(4) गद्यपद्यमयं काव्यं ......... इत्यभिधीयते। (महाकाव्यम्, कथा, चम्पूः)

(5) चम्पूकाव्यस्य सर्वप्रथममुल्लेखं ......... करोति। (दण्डी, भामहः, वामनः)
(6) त्रिविक्रमस्य अपरं नाम ......... । (गङ्गात्रिविक्रमः, यमुनात्रिविक्रमः, महीत्रिविक्रम)
(7) नलस्य महामन्त्री ......... वर्तते। (श्रुतशीलः, शीलवर्द्धनः, रूमण्वान्)
(8) नलदमयन्त्योः प्रणये ......... दूतरूपं कार्यं करोति। (हंसः, कपोतः, शुकः)
(9) राज्ञः भीमस्य पत्नी ......... आसीत्। (विदेहनन्दिनी, पद्मावती, प्रियङ्गुमञ्जरी)
(10) नलचम्पूकाव्ये प्रधानरसः .........। (करूणः, वीरः, श्रृङ्गार)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) संस्कृतसाहित्यस्य प्रथमं चम्पूकाव्यं किम्?
(2) त्रिविक्रमभट्टस्य कति कृतयः सन्ति? काश्च ताः?
(3) नलचम्पूकारस्य कः समयः स्वीक्रियते?
(4) कस्याः प्रसादेन त्रिविक्रमः अमोघपाण्डित्यं प्राप्तवान्?
(5) नलचम्पूकाव्यस्य कथानकं कस्मात् प्रभावितं दृश्यते?
(6) नलचम्पूकाव्यस्य अपरं नाम किम्?
(7) प्रथमे उच्छ्वासे आखेटवने नलः कस्य वधं चकार?
(8) दमयन्ती कस्य देशस्य राजकुमारी आसीत्?
(9) कस्य अलङ्कारस्य प्रयोगे त्रिविक्रमभट्टः प्रसिद्धः?
(10) कस्य मुनेः कारणात् 'दमयन्ती' इति नामकरणं जातम्?

**3. टिप्पणीं लिखत।**

(1) नलचम्पूरचना विषयकी जनश्रुतिः।
(2) त्रिविक्रमभट्टस्य जीवनवृत्तम्।
(3) द्वितीयोच्छ्वासस्य कथावस्तु।

**4. सविस्तरम् उत्तराणि दत्त।**

(1) प्रियङ्गुमञ्जरी कथम् अपत्यप्राप्तिं करोति?
(2) चतुर्थोच्छ्वासस्य कथावस्तु लिखत।
(3) नलचम्पूकाव्यस्य वैशिष्ट्यं संक्षेपेण निरूपयत।
(4) नलदमयन्त्योः अन्तःपुरे कथं मेलनं भवति?
(5) केन श्लोकेन कविः त्रिविक्रमः यमुना-त्रिविक्रमोपाधिं प्राप्तवान्?

**5. ''अ'' विभागं ''ब'' विभागेन सह योजयत।**

| अ | ब |
|---|---|
| (1) निषधायाः राजा | भीमः |
| (2) नलस्य सेनापतिः | वीरसेनः |
| (3) दमयन्त्याः पिता | श्रुतशीलः |
| (4) सालङ्कायनसुतः | नलः |
| (5) नलस्य पिता | बाहुकः |

●

# ११

# प्रतिज्ञायौगन्धरायणम्

**प्रस्तावना**

संस्कृतवाङ्मयं दृश्यश्रव्यत्वभेदेन द्विधा विभक्तमस्ति। तत्र दृश्यकाव्ये रूपकस्याप्यन्तर्भाव: भवति। रूपकञ्च दशविधम्। रूपकेष्वाद्यं नाटकं भवति। एवञ्च संस्कृतभाषायां तेषां नाटकानां रचयितार: बहव: सन्ति। तेष्वन्यतम: प्रमुखतमश्च भवति महाकवि: भास:। इतिहासविद्भि: अस्य महाकवे: समय: चतुर्थशताब्दिरिति निश्चीयते। तेन महाकविना भासेन त्रयोदश नाटकानि रचितानि, यानि च भासनाटकचक्रत्वेन प्रसिद्धानि। विषयानुसारं पञ्चश्रेणीषु तेषां नाटकानां नामानि यथा–

**1. रामकथाश्रितानि–**

1. प्रतिमानाटकम्।
2. अभिषेकनाटकम्।

**2. महाभारताश्रितानि–**

3. पञ्चरात्रम्।
4. मध्यमव्यायोग:।
5. दूतघटोत्कचम्।
6. कर्णभारम्।
7. दूतवाक्यम्।
8. ऊरुभङ्गम्।

**3. श्रीमद् भागवताश्रितातम्–**

9. बालचरितम्।

**4. लोककथाश्रिते–**

10. दरिद्रचारुदत्तम्।
11. अविमारकम्।

**5. उदयनकथाश्रिते–**

12. प्रतिज्ञायौगन्धरायणम्।
13. स्वप्नवासवदत्तम्।

तेषु त्रयोदशरूपकेषु अन्यतमं नाटकाख्यं रूपकं भवति – ''प्रतिज्ञायौगन्धरायणम्'' इति।

**प्रतिज्ञायौगन्धरायणस्य कथावस्तु**

वत्सदेशस्य राजा उदयन: एक: रूपवान्, विद्यासम्पन्न: शूर: वीरश्च आसीत्। प्रद्योतनामक: तस्य प्रतिनिवेशी राजा आसीत्। तस्य प्रद्योतस्य पार्श्वे महती सेना आसीत्, अत: स राजा महासेनेति नाम्ना अपि प्रसिद्ध: आसीत्। तस्य महासेनस्य पुत्र्या: नाम वासवदत्ता इति। स: तस्या: विवाहार्थं योग्यवरान्वेषणे प्रवृत्त: आसीत्। तस्मिन्नेव समये स:

ज्ञातवान् यत् उदयनः मृगयार्थं नागवनं प्रति प्रस्थितोऽस्तीति। अतः प्रद्योतः उदयनं मोहयितुं सालवृक्षवने एकं कृत्रिमं नीलगजं विनिर्माप्य, तं परितः स्वसैनिकान् न्ययोजयत्। राजा उदयनः नीलं गजं वास्तविकमिति मत्वा तस्य आखेटार्थम् अगच्छत्। किन्तु तत्र प्रद्योतस्य सैनिकैः तम् उदयनः। ततः तम् उदयनं मोचयामि इति तन्मन्त्रिणा यौगन्धरायणेन प्रतिज्ञा क्रियते। प्रतिज्ञानुसारं सफलोऽपि भवति यौगन्धरायणः।

**प्रथमाङ्कस्य सारांशः-**

वत्सराजस्य बुद्धिमान् मन्त्री यौगन्धरायणः, स्वयं प्रद्योतस्य योजनाः ज्ञातुं सालकेन सार्धं मञ्चोपरि आयाति। सः वार्तालापसमये इदं सूचयति यत् ''वेणुवनस्य पार्श्वे निबिडारण्यमध्ये विद्यमानं नागवनं प्रति श्वः प्रातः स्वामी उदयनः प्रस्थानं करिष्यति, अतः तैः सह मेलनं आदावेव कर्तव्यम्'' इति। सः यौगन्धरायणः तं सालकं पत्ररक्षासूत्राभ्यां सार्धं स्वामिनः सुरक्षायै प्रेषयितुमिच्छति। एतन्मध्ये एव हंसकः, यश्च राज्ञा उदयनेन साकं तदङ्गरक्षकरूपेण अगच्छत् सः सन्देशमानयति यत् ''राजा कस्यापि प्रतीक्षाम् अकृत्वैव प्रातःकाले नागवनमगच्छत्। तत्र तस्मै अनतिदूरे एकः नीलगजः दृष्टिगोचरः अभवत्। एतादृश्यां स्थितौ रुमण्वता अनेकवारं कृतेऽपि अनुनये तदश्रुत्वा कैश्चित् सैनिकैः सार्धं स्वकीयां वीणां स्वीकृत्य अग्रे आगच्छत्। प्रद्योतः कपटेन सालवृक्षस्याधः एकं कृत्रिमं नीलगजं विनिर्माप्य तं गजं परितः स्वयोद्धृन् न्ययोजयत्। वत्सराजः तं गजं वास्तविकं मत्वा तस्य मृगायार्थम् अगच्छत्। परन्तु तत्र प्रद्योतस्य योद्धारः तदुपरि युद्धे विजयं प्राप्य तम् उदयनं बद्धवन्तः अहम् आत्मानम् अनुगृहीतं कर्तुं यदा स्वामिनः पार्श्वम् अगच्छम् तदा स्वाम्यपि किञ्चित् विवक्षति स्म, परन्तु तन्नेत्रे अश्रुपूरिते आस्ताम्, कण्ठश्च स्तम्भितः आसीत्। अतः स्वामिना एतावदेव उक्तं यत् ''गच्छ यौगन्ध.....'' इति। अर्थात् गत्वा यौगन्धरायणं मिलतु इति। अहमपि स्वोत्तरदायित्वं मनसि निधाय समाचारस्यास्य भवत्सम्मुखे स्थापनं योग्यमिति अचिन्तयम् इति।

यौगन्धरायणः शोकपूर्णमिदं वृत्तान्तं श्रुत्वा अतीव चिन्तितः भवति। सः विषयमेनं प्रतीहारिद्वारा अन्तःपुरे विद्यमानायै उदयनस्य मात्रे प्रेषयति। राजमाता उदयनस्य बन्धनस्य विषयं श्रुत्वा खिन्ना भवति, अनेन सार्धमेव सा यौगन्धरायणस्य धियः प्रशसां कृत्वा तं प्रार्थयते यत् ''मत्पुत्रं बन्धनान्मुक्तं कारय इति। यौगन्धरायणोऽपि राजानं बन्धनात् मोक्षसम्बन्धिप्रतिज्ञां करोति यत् यद्यहं वत्सराजम् उदयनं बन्धनात् न मोचयामि तर्हि मम नाम यौगन्धरायण एव नास्ति'' इति। सौभाग्यवशात् भगवान् व्यासः तस्मै एकम् अद्वितीयं वस्त्रं ददाति, येन सः स्वस्वरूपं तिरोधातुं शक्नोति, फलतः शत्रुपुरे स्वच्छन्दरूपेण विचरणं कुर्वन् सारल्येन स्वलक्ष्यं साधयितुं च शक्नोति।

**द्वितीयाङ्कस्य सारांशः -**

अङ्केऽस्मिन् प्रद्योतः सर्वादौ स्वस्य प्रमुखकर्मचारिभिः सार्धम् पश्चात् च स्वपत्न्या अङ्गारवत्या सार्धं वासवदत्तायाः विवाहविषये किञ्चित् परामर्शं करोति। सः विवाहनिमितं भिन्नभिन्नदेशेभ्यः अगतानां राज्ञां नाम्नां गुणानाञ्च परिचयं ददानः अङ्गारवतीं पृच्छति ''एतेषु कः विवाहाय योग्यः अस्ति इति भवती चिन्तयति'' इति। तदैव वत्सराजस्य बन्धनविषयकीं वार्तां काञ्चुकीयः आगत्य श्रावयति। तत्पश्चात् घोषवती नामिकाम् उदयनस्य वीणामप्यानीय प्रद्योताय समर्पयति। सः तां वीणां तत्पुत्र्याः सङ्गीताभ्यासाय प्रेषयति। बद्धः उदयनः अस्माकं पुत्र्यै सुयोग्यः वरः भवितुमर्हति इति अङ्गारवती सङ्केतेन निर्दिशति।

**तृतीयाङ्कस्य सारांशः -**

अङ्केऽस्मिन् एतत् निर्दिश्यते यत् केन प्रकारेण वत्सराजस्य त्रयः मन्त्रिणः यौगन्धरायणः उन्मत्तकस्य वेषं धृत्वा, वसन्तकः डिण्डिकस्य वेषं धृत्वा, रुमण्वान् श्रमणकस्य च वेषं धृत्वा उज्जयिन्यां निवसन्तः वत्सराजस्य बन्धनान्मुक्तये प्रयतन्ते इति। ते बहुधा मेलनार्थं व्यवस्थामपि कुर्वन्ति। तस्मिन्नेव क्षणे राजा उदयनः वासवदत्तां दृष्टवा कामासक्तः / मोहितः भवति। सः वसन्तकः यौगन्धरायणं राज्ञः मनोरथपूर्त्यर्थं प्रेरयति। तदा यौगन्धरायणः शपथं करोति यत् ''घोषवतीं वीणाम्, नलागिरिगजम्, विशालाक्षीं वासवदत्ताम्, वत्सराजमुदयनञ्च इतः हृत्वा कौशाम्बीं न नयामि चेत् मम नाम यौगन्धरायणः नास्ति'' इति।

**चतुर्थाङ्कस्य सारांश :**

अङ्केऽस्मिन् यौगन्धरायणस्य चातुर्येण उन्मत्ततां नीतः नलागिरिः, तं वशं कर्तुं वत्सराजः बन्धनमुक्तः क्रियते। सदवसरस्य सदुपयोगं कुर्वन् उदयनः वासवदत्तया सार्धं भद्रावतीनामिकायाः गजायाः उपर्युपविश्य ततः पलायितः भवति। प्रद्योतस्य सेना यौगन्धरायणस्य एवं तस्य सेनायाश्च उपरि आक्रमणं करोति, दौर्भाग्यवशात् यौगन्धरायणस्य कृपाणः भग्नः भवति, अपि च शत्रुसैनिकाः तं योगन्धरायणं गृहणन्ति। प्रद्योतस्य अमात्यः भरतरोहकः कारागारे यौगन्धरायणेन सार्धं वाद-विवादं करोति। एवञ्च वत्सराजस्य कपटरीत्या पलायनालोचनस्य निन्दां करोति। तत्पश्चात् प्रद्योतस्य काञ्चुकीयः महासेनेन दत्तं भृङ्गारम् (सुवर्णपात्रम्) यौगन्धरायणस्य राजभक्तिं गुणागुणज्ञानं च दृष्ट्वा उपायनत्वेन दातुम् आनयति। आदौ यौगन्धरायणः स्वीकर्तुं निराकरोति। परन्तु वासवदत्तायाः वत्सराजस्य च विवाहः एकस्मिन् चित्रफलके कृतः इति यदा सः ज्ञानं प्राप्नोति तदा सोऽपि सहर्षं तमुपहारं स्वीकरोति।

**केचन प्रमुखश्लोकाः**

1. **काष्ठादग्निर्जायते मथ्यमानाद्**
**भूमिस्तोयं खन्यमाना ददाति।**
**सोत्साहानां नास्त्यसाध्यं नराणाम्**
**मार्गारब्धाः सर्वयत्नाः फलन्ति॥ प्रतिज्ञा. (1/18)**

**अन्वयः** - मथ्यमानात् काष्टात् अग्निः जायते, खन्यामाना भूमिः तोयं ददाति, सोत्साहानां नराणाम् असाध्यं नास्ति मार्गारब्धाः सर्वयत्नाः फलन्ति।

**भावार्थः** - सङ्घर्षमाणात् काष्ठात् अग्नेरुत्पत्तिः जायते। खन्यमाना पृथ्वी जलं ददाति। एवमेव उत्साहसम्पन्नानां नराणां कृते किञ्चिदपि कर्तुमशक्यं नास्ति। समुचितेन पथा आरब्धाः सर्वयत्नाः फलन्ति।

2. **कुलं तावच्छ्लाघ्यं प्रथममभिकाङ्क्षे हि मनसा**
**ततः सानुक्रोशं मृदुरपि गुणो ह्येष बलवान्।**
**ततो रूपे कान्तिं न खलु गुणतः स्त्रीजनभयात्**
**ततो वीर्योदग्रं न हि न परिपाल्या युवतयः॥ प्रतिज्ञा. (2/4)**

**अन्वयः** - प्रथम मनसा श्लाघ्यं कुलम् अभिकाङ्क्षे, ततः सानुक्रोशं हि मृदुः अपि गुणः बलवान्, ततः स्त्रीजनभयात् रूपे कान्तिं न खलु गुणतः, ततः युवतयः न परिपाल्या इति न अतः वीर्योदग्रम् अभिकाङ्क्षे।

**भावार्थः** -सर्वप्रथमहं पुत्र्यर्थं मनसा योग्यकुलोत्पन्नं वरं वाञ्छामि तत परम् इच्छामि यत् सः वरः दयावान्-मृदुः-बलवान् च स्यात् इति, स्त्रियः विशिष्टं सौन्दर्यं पश्यन्तीति कारणात् तस्मिन् वरे सौन्दर्यमपि इच्छामि तद्गुणत्वेन न, नारीणां रक्षा ते सदापि कर्तव्या भवति अतः सः वरः पराक्रमशाली अपि स्यादिति इच्छामि।

3. **शत्रुं पश्यन्तु मे पौराः श्रुतपूर्वं स्वकर्मभिः।**
**सिंहमन्तर्गतामर्षं यज्ञार्थमिव संयतम्॥ प्रतिज्ञा. (2/10)**

**अन्वयः** - स्वकर्मभिः श्रुतपूर्वं मे शत्रुं तथा पौराः पश्यन्तु यथा यज्ञार्थं संयतं अन्तर्गतामर्षं सिंहम्।

**भावार्थः** - स्ववीरताभिः पुरुषार्थैः प्राक्प्रसिद्धं मम शत्रुमुदयनं मम पौराः तथा अवलोकयेयुः यथा यज्ञार्थमन्तर्गतामर्षं बद्धं सिंहम् अवलोकयन्ति। अर्थात् उदयनग्रहणं सिंहग्रहणमिव दुष्करम् इत्यर्थः।

4. **व्यवहारेष्वसाध्यानां लोके वाऽप्रतिरज्यताम्।**
**प्रभाते दृष्टदोषाणां वैरिणां रजनी भयम्॥ प्रतिज्ञा. (3/3)**

**अन्वयः** - व्यवहारेषु असाध्यानां लोके अप्रतिरज्यतां वा प्रभाते दृष्टदोषाणाम् अत एव वैरिणां रजनी भयम्।

**भावार्थः** - दैनिकव्यवहारेषु येषां जनानां मनः नावगम्यते, ये च भवजनैः सार्धं स्नेहभावं न स्थापयन्ति अपि च येषां कपटयुक्तभावनाः दिने प्रकटिताः भवन्ति, एतादृशानां शत्रूणां रात्रयः भयदायकाः भवन्ति।

**5. सुभद्रामिव गाण्डिवी नागः पद्मलतामिव।**

**यदि तां न हरेद् राजा नास्मि यौगन्धरायणः॥ प्रतिज्ञा. (3/8)**

**अन्वयः** – सुभद्रां गाण्डीवी इव, पद्मलतां नाग इव, यदि तां राजा न हरेत् तर्हि न अस्मि यौगन्धनारायणः।

**भावार्थः** – येन प्रकारेण कमलवल्लीं गजः सहजतया त्रोटयित्वा स्वीकृत्य गच्छति, यथा अर्जुनः सुभद्रां स्वीकृत्य पलायनं कृतवान् तथैव अस्माकं राजा उदयनः यदि तां वासवदत्ताम् अपहृत्य पलायनं न करोति चेत् न मम नाम यौगन्धनारायणः अर्थात् अवश्यं स राजा तस्याः अपहरणे समर्थः भवतीति भावः।

**6. यदि तां चैवतं चैव तं चैवायतलोचनाम्।**

**नाहरामि नृपं चैव नास्मि यौगन्धरायणः॥ प्रतिज्ञा. (3/9)**

**अन्वयः** – यदि तां च तं च ताम् आयतलोचनां च नृपं न आहरामि चेत् यौगन्धरायणः न अस्मि।

**भावार्थः** – यदि तां घोषवतीम्, तं नलागिरिं गजम्, ताम् आयतलोचनां विशालनयनां वासवदत्ताम्, नृपं वत्सराजमुदयनं च प्रद्योतसकाशात् आहृत्य कौशाम्बीं न प्रापयामि चेत् अहं यौगन्धरायणः नास्मि अर्थात् अवश्यं एतत् सर्वं करोम्यहम् इत्यर्थः।

अन्येऽपि बहवः प्रसिद्धाः श्लोकाः सन्त्यस्मिन् नाटके एवं त्रयोदशनाटकप्रणेतुः महाकविभासस्य कीर्तिध्वजः गगनचुम्बी वर्तते। तस्य शैली सहृदयहृदयङ्गमा भवति। तन्नाटकस्थेषु श्लोकेषु अनेकाः सूक्तयः प्रयुक्ताः, याश्च नित्यजीवनोपयोगिन्यः सन्ति।

## स्वाध्यायः

**1. रिक्तस्थानपूर्तिं कुरुत।**

(1) दृश्यकाव्ये ......... अन्तर्भावः भवति। (रूपकस्य, पुस्तकस्य, वाद्यस्य)

(2) रूपकं .........। (द्विविधम्, पञ्चविधम्, दशविधम्)

(3) भासेन ......... नाटकानि रचितानि। (दश, त्रयोदश, त्रीणि)

(4) पञ्चरात्रं ......... अस्ति। (रामकथाश्रितम्, उदयनकथाश्रितम्, महाभरतकथाश्रितम्)

(5) बालचरितम् ......... अस्ति। (लोककथाश्रितम्, भागवतकथाश्रितम्, उदयनकथाश्रितम्)

(6) भासस्य रचनासु महाभारतकथाश्रिताः ......... रचनाः सन्ति। (त्रयः, पञ्च, षड्)

(7) यौगन्धरायणः ......... अमात्यः। (प्रद्योतस्य, उदयनस्य, इन्द्रस्य)

(8) हंसकः उदयनस्य .........। (अङ्गरक्षकः, पिता, पौत्रः)

(9) यौगन्धरायणः उज्जयिन्यां ......... निवसति। (उन्मत्तकवेषेण, डिण्डिकवेषेण, श्रमणकवेषेण)

(10) भरतरोहकः ......... अमात्यः। (उदयनस्य, प्रद्योतस्य, इन्द्रस्य)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) रूपकेष्वाद्यं किं भवति?

(2) नाटककर्तृषु प्रमुखतमः कः?

(3) इतिहासविद्भिः भासस्य समयः कः इति निश्चीयते?

(4) भासस्य नाटकानि केन नाम्ना प्रसिद्धानि?

(5) भासरचितनाटकेषु रामकथाश्रिताः रचनाः कति सन्ति?

(6) उदयनकथाश्रिता: रचना: कति सन्ति?

(7) प्रद्योत: केन नाम्ना प्रसिद्ध:?

(8) महासेनस्य पुत्र्या: नाम किम्?

(9) प्रद्योतस्य पत्न्या: नाम किम्?

(10) उदयनस्य वीणाया: नाम किम्?

**3. टिप्पणीं लिखत।**

(1) यौगन्धरायण:।

(2) प्रद्योत:।

(3) उदयन:।

**4. सविस्तरम् उत्तरं लिखत।**

(1) प्रथमाङ्कस्य सारांशं लिखत।

(2) तृतीयाङ्कस्य सारांशं लिखत।

(3) चतुर्थाङ्कस्य सारांशं लिखत।

**5. ''अ'' विभागं ''ब'' विभागेन सह योजयत।**

| अ | ब |
|---|---|
| (1) प्रद्योत: | वत्सराज:। |
| (2) वासवदत्त | उन्मत्तक:। |
| (3) रुमण्वान् | प्रद्योतपुत्री। |
| (4) यौगन्धरायण: | श्रमणक:। |
| (5) उदयन: | महासेन:। |

# १२

# भीष्मविजयम्

**प्रस्तावना**

गद्यपद्यचम्पूभेदेन सामान्यतया काव्यं त्रिविधम्। ''रविः यत्र न गच्छति तत्र गच्छति कविः'' इत्युक्त्यनुसारं सर्वत्राप्यस्ति कवीनां प्रवेशः। सर्वस्यापि रचनायामपेक्षते कविचातुरी, तत्रापि गद्यकाव्यस्य रचनायामधिका एव। तादृशगद्यकाव्यानां रचनाकाराः संस्कृते बहवः सन्ति बाणभट्टादयः।

तेष्वन्यतमा महामहोपाध्यायाः लक्ष्मणसूरिमहोदयाः। एतेषां पितुः नाम मुथुभारती, संस्कृततमिलभाषयोः च विद्वल्लेखकाः आसन्। एतेषां गुरूणां नाम ''सुब्बा'' दीक्षितः इति। एतेषां दाक्षिणात्यानां जन्म तमिलनाडु-राज्यस्य तिन्नेवेल्लिजनपदस्य पुरूनाल् ग्रामे 1858 तमे वर्षे अभवत्। 1886 पर्यन्तं मद्रास्नगरस्य पचयप्पा संस्कृतमहाविद्यालये अध्यापनम् अकार्षुः। 1903 तमे वर्षे मैसूरुनगरस्य दीवानद्वारा ''सूरि'' इत्युपाधिं प्राप्तवन्तः। 1916 तमे वर्षे भारतसर्वकार द्वारा ''महामहोपाध्यायाः'' इत्युपाधिम् अलभन्त। 1912 तमे वर्षे दिल्लीसाम्राज्यं नाम नाटकं मद्रास्-द्वारा मुद्रितम्। जीवनस्यान्तिमे चरणे परिव्राजकरूपेण भारतीयसंकृतेरुपरि एवञ्च अध्यात्मदर्शनस्योपरि बहूनि प्रवचनानि अकुर्वन्।

**कृतयः**

- घोषयात्रा (अपरं नाम युधिष्ठिरनृशस्यम्)
- दिल्लीसाम्राज्यम्, पौलस्त्यवधः (नाटकम्)
- भीष्मविजयम्, भारतसङ्ग्रहः, नलोपाख्यानसङ्ग्रहः (गद्यकाव्यानि)
- कृष्णलीलामृतम् (महाकाव्यम्)
- जार्ज-शतकम् (काव्यम्)
- अनर्घराघवोत्तररामचरितवेणीसंहारबालरामायणानामुपरि टीकाः।

पाठेऽस्मिन् भीष्मविजयम् इति गद्यकाव्यस्य विषये पठामः। अस्मिन् गद्यकाव्ये आहत्य अष्टौ उच्छ्वासाः सन्ति। भीष्मस्य विजयमधिकृत्यं कृतं काव्यमिति भीष्मविजयम्।

---

सर्वादौ काव्यस्य निर्विघ्नपूर्वकपरिसमाप्त्यर्थं भगवन्तं शिवमुद्दिश्य ''येन कालश्च'' इत्यादिना मङ्गलाचरणं करोति। तत्पश्चात् राज्ञः शन्तनोः परिचयादारभ्यते प्रथमोच्छवासः। अन्ते च शरशय्यायां शयानः भीष्मः कृष्णस्तवं करोति ब्रह्मरन्ध्रेण तस्य प्राणाः दिवं यान्ति इत्युक्त्वा एकेन मङ्गलश्लोकेन काव्यस्य समापनं कृतमस्ति।

**प्रथमोच्छ्वासस्य सारांशः**

अस्योच्छवासस्य नाम भीष्मप्रादुर्भावः इति। चन्द्रवंशे उत्पन्नः शन्तनुर्नाम राजा पृथिवीं पालयन्नासीत्। कदाचित् सः मृगयार्थं भागीरथ्याः तटे एकाकी रथेन सञ्चरन् काञ्चित् सुन्दरीं युवतिम् अद्राक्षीत्। तां दिव्याङ्गनां मन्यमानः स्वनाम शन्तनुरिति ज्ञापयन् स्वसंशयान् दूरीकर्तुं ताम् अपृच्छत् ''हे भद्रे एकान्तभीरवो हि प्रायेण नार्यः, त्वं किमर्थम् अस्मिन् क्रूरमृगयुते अरण्ये अटसि? मानवलोके सुदुर्लभा तवेयमाकृतिः। मोहितोऽस्मि तव सौन्दर्येण। का त्वम्?'' इति। सा प्रत्यवदत् ''लोके भवन्तं कः न जानाति? यथा भवान् तथैवाहमपि प्रख्यातकुलोत्पन्ना। मास्तु मयि परकलत्रसंशयः। कदापि भवत्सदृशामार्याणां मनसि अनार्यः सङ्कल्पः भवितुं नार्हति। यदि भवान् मम विचारैः सह सम्मतः भवति तर्हि आवयोः अनुरागलता झटित्येव फलति'' इत्युक्त्वा स्वविचारान् प्रकटयति यत्

''स्त्रीपुरुषयोः चेतनेन्द्रियमनांस्यापि समानानि चेत् उभावपि समानावेव खलु। एवं नार्याः महत्स्थानं प्रतिपादयित्वा तव गृहे मम कृते स्वातन्त्र्यमपेक्षते, अग्रे विवाहात्परं जीवने अहं यत्किमपि करोमि, कदापि किमर्थमित्यादिप्रश्नान् न पृच्छेत्? विस्मृत्य कदाचित् पृच्छति चेत् तदैव अहं भवन्तं त्यक्त्वा यामि। यदि एतत् सम्मतम् अस्ति तर्हि अहं भवता सार्धं विवाहार्थं सिद्धा अस्मि'' इति। ''स्वच्छन्दचेष्टा भव'' इति वचनेन स राजा तस्यै स्वानुमोदनं दत्तवान्।

यथाकालं सा गर्भवती सञ्जाता, कालान्तरे पुत्रोऽपि उत्पन्नः सपद्येव सा तं पुत्रं स्वीकृत्य ''जात अस्तु तेऽपवर्गः'' इत्युक्त्वा घातकीव स्रोतसि क्षिप्तवती। आश्चर्यचकिताः सर्वेऽपि शन्तनुसहिताः पुरजनाः। दुःखिताश्च ते गच्छताकालेन तं दुःखं विस्मृतवन्तः। एवमेव सा स्वस्य सप्तशिशून् स्रोतसि क्षिप्तवन्ती। तत्पश्चात् बहुदुःखितः सः शन्तनुः इतः परं सोढुं न शक्नोति, कथञ्चिदेतत् अवरोद्धव्यम् इति अचिन्तयत्। यदा अष्टममपि शिशुं सा क्षिप्तुमुद्यता तदा सः अपृच्छत् यत् ''किमिदं लोकविरुद्धं शिशुमारणक्रौर्यम्, किमर्थमेवं कुरुते भवती'' इत्येवंरूपेण बहु पृष्टे सति सा ''आवयोः सम्बन्धः समाप्तः, याम्यहम्'' इत्युक्त्वा निजस्वरूपं निजकथां च ज्ञापयति ''गङ्गाहं त्वं च महाभिषः नामकः इक्ष्वाकः राजर्षिः आसीः'' इति।

एकदा विधातुः ब्रह्मणः सभायाम् आवामुपस्थितौ। वायोः कारणेन मम वस्त्रं किञ्चिदितस्ततः जायमानम् आसीत्। तस्मिन्नेव क्षणे सत्सु सर्वेषु सदस्येषु केवलं तव दृष्टिः ममोत्सङ्गे पतिता, येन क्रुद्धः, ब्रह्मा मनुष्यलोकं प्रयाहि, शन्तनुनाम्ना जनिष्यसे, इयं ''हैमवती त्वां तत्र रञ्जयति इत्यवदत्।'' इयम् आवयोः समागमकथा इति तां कथामुक्त्वा, पुत्रमारणं किमर्थं कृतमित्यस्य कारणभूतां कथां वक्ति ''पुरा अष्टवसुषु अन्यतमः द्यौरिति वसुः, सः स्वपत्न्यै कामधेनोः नन्दिनीं दर्शयन् शशंस तेन समुदिताशा सा तां नन्दिनीं स्वसखीनिमित्तमाहर्तुं निवेदितवती।'' तदनुसारं ते वसवः सर्वेऽपि एकस्मिन्नहनि वसिष्ठस्य तां नन्दिनीम् अपहृतवन्तः। एतदपहरणादिकं सर्वं वसिष्ठः ज्ञानचक्षुषा ज्ञात्वा तान् शप्तवान् यत् ''यूयं जायेध्वं मानुषयोनौ'' इति। तत्रापि सप्तवसवः केवलं जन्म प्राप्य झटिति म्रियन्ते, अष्टमः द्यौर्नामकस्तु बहुकालपर्यन्तं जीवेदत्र पृथिव्यामिति पश्चात् शापस्य स्पष्टतामदात्। अतः एव सप्तपुत्रानहं क्षिप्तवती, तदनु सम्प्रति एनं स्वीकृत्य यामि यदायं युवावस्थां प्राप्नोति तदा भवत्समीपमायास्यति।

**द्वितीयोच्छवासस्य सारांशः**

अस्योच्छवासस्य नाम भीष्मस्य भीष्मत्वलाभः इति। पुत्रं विना राजा जगत् शून्यममन्यत। पुत्रशोकमनुभवन् प्रजापालनं च कुर्वन् वत्सरान् यापितवान्। एवं याप्यमाने काले कदाचित् सः आखेटार्थं गङ्गातटे पर्यटन् कञ्चित् तेजस्विनं सकार्मुकं कुमारमद्राक्षीत्। तं स्वतनुजं चिन्तयन्, तस्मिन् पुत्रस्नेहमनुभवन् नूनमयं गाङ्गेयः इति अतर्कयत्। एवं विचार्यमाणे तत्रागतवती गङ्गा ''पुत्र, वन्दतां गुरुम्'' इति अवदत्, तदनु स देवव्रतनामाहं नौमि इति साष्टाङ्गप्रणामम् अकरोत्। राजा तम् आनन्देन पर्यश्वजत्। तत्पश्चात् गङ्गा अब्रवीत् यत् ''अयं आवयोः सूनुः अधीतसर्वशास्त्रशस्त्रः भगवन्तौ वसिष्ठजामदग्न्यावस्य विनेतारावभूताम् इति।'' पश्चात् ''वत्स अयं ते जनकः'' इति तमपि ज्ञापयित्वा कांश्चन उपदेशान् उक्त्वा अन्तर्धिमगात्। पुत्रेण सार्धं सः राजा हस्तिनापुरमागत्य स्वपुत्रं यौवराज्येऽभिषिच्य गृहाश्रमे एव विशश्राम। स च देवव्रतः धर्मवर्त्मनि प्रजापालनमकार्षीत्।

एकस्मिनहनि सः शन्तनुः आखेटार्थं यमुनावनमगच्छत्। तत्र सः कञ्चित् गन्धविशेषमनुसरन् धीवरजातीयां काञ्चित् सुन्दरीं दासकन्याम् अद्राक्षीत्। तस्यां मोहितः सः तस्याः नामादिकं पृच्छति तदा सा स्वनाम सत्यवती इति, परन्तु जनाः मत्स्यगन्धा, योजनगन्धा, गन्धवती इति नामभिः अपि जानान्ति मामित्यगादीत्। तया पृष्टः सोऽपि स्वपरिचयम् अदात्। तत्पश्चात् सः राजा स्वानुरागं अभिव्यञ्जयति तदा सा दासराजस्तु मम पोषकपिता, चेदीश्वरस्य वसुराजस्य पुत्री अहमितिनिजपरिचयं ददाना पिता (दासराजः) यदि अनुमतिं ददाति चेत् ममाप्यस्ति सम्मतिः विवाहायेति वदति। सन्तुष्टः सः राजा तं दासराजं मिलितुं तद्गृहमगात्, तदागमनेन सः दाशराजः नितान्तम् आनन्दितः। यदा राजा कन्यामपृच्छत् तदा स दासपतिः इदमुक्तवान् यत् ''मम पुत्र्यां सत्यवत्यामुत्पाद्यमानस्तनुजः भवता राज्येऽभिषेक्तव्यः, एतदङ्गीक्रियते चेत् भवते दीयते मया कन्या'' इति। एवं तेन यदा उक्तं तदा कियत्स्वार्थपरोऽसौ इति विचिन्तयन् ततः निर्गतः हस्तिनावतीम् आगतवान् शन्तनुः।

तस्यां निविष्टमनाः सः प्रतिदिनं तस्याः स्मरणेन दुःखतप्तः सञ्जातः। पितुः दुःखस्य कारणं अज्ञात्वा सः तच्छयनगृहाधिकारिणम् अप्राक्षीत्। तन्मुखात् सः स्वपितुर्दुःखस्य कारणं सत्यवती गन्धवतीति काचित् महाराजस्य मानसमध्यास्ते, सः एतद्विषयं मत्तः गोपयितुञ्च इच्छति इति ज्ञातवान्। सारथिद्वारा कुत्रत्या सा इत्यपि ज्ञात्वा बहुभिः क्षत्रियैः सार्धं तद्दाशनिवेशम् अगात् शान्तनवः।

सानन्दं सः युवराजस्य स्वागतादिकमकार्षीत्। पश्चात् सः युवराजः देवव्रतः भवत्पुत्रीम् अस्मत्पितुः कृते वरीतुमागताः वयम्, तद्वद किमिच्छति भवान् ? लज्जया भयेन निरुत्तरं तं बहुधा पृच्छति युवराजे स एवम् अवदत् ''एतत् स्वार्थपरता इत्यपि वा चिन्तयतु परन्तु भवत्पितुरनन्तरम् त्वद् भ्राता सात्यवतेयः तद्राज्यं लभताम्, अयमेव मे दुहितुः शुल्कः'' इति। तदा देवव्रतःवदति यत् ''सात्यवतेयः अग्रे राज्यशासनं करोति'' इति। ''भवान्नेच्छति राज्यं नात्र संशयः भवत्पुत्राः कदाचित् भविष्यत्काले मम दौहित्रात् राज्यं वाञ्छेयुः'' इति स्वसंशयं प्रकटयति दाशपतिः। तदा देवव्रतः भीषणप्रतिज्ञां करोति अहं मम पितुः सत्यवत्या सार्धं विवाहार्थं प्रतिजानामि यत् ''अहं यावज्जीवं ब्रह्मचारी भवामि, नाहं दारसङ्ग्रहं प्रजोत्पादनं वा करोमि, अतः वीतशङ्कः मम पित्रे स्वकन्यां प्रयच्छतु दाशराज'' इति।

एतच्छ्रुत्वा सर्वेऽपि ''एतादृशीं भीष्मप्रतिज्ञां कृतवान् अतः त्वं भीष्मोऽसीति'' अभिधाय जयघोषेण प्रशंसां कृतवन्तः। पश्चादाश्चर्यमनुभवन् दाशः भीष्मं बहुधा प्रशंस्य अन्ते पादयोर्निपत्य स्वस्वार्थवृत्तये दौर्जन्याय च क्षमां याचते। ततः सः भीष्मः हस्तिनावतीं प्रति तया सत्यवत्या सह निर्गच्छति। तत्र तां पितुः समीपं नीत्वा सप्रणिपातमिदं निवेदयामास - ''एषा सत्यवती भवत्कृते उपस्थिता।'' तदनु सर्वं प्रतिज्ञावृत्तान्तं पित्रे निवेदयति। किमर्थमेवमकार्षीदिति आदौ विषादमन्वभवत् पश्चात् ससन्तोषं स्वात्मजाय वरमेकं दित्सति यत् ''लोकः सर्वोऽपि मृत्योश्छन्देन म्रियते, परन्तु त्वम् आत्मनश्छन्देन म्रियस्व'' इति अर्थात् यदा भवान् इच्छति तदा एव अस्तु भवतः मरणम्, इच्छामरणिः स्याः इति। तत्पश्चात् सः शन्तनुः तां सत्यवतीं वृणीतवान्।

**तृतीयोच्छ्वासस्य सारांशः-**

अस्योच्छ्वासस्य नाम भीष्मविक्रमः इति। सत्यवतीं प्राप्य सन्तुष्टः शन्तनुः गच्छता कालेन तस्यां चित्राङ्गदविचित्रवीर्याविति आत्मजौ प्राप्तवान्। प्राप्तयौवनं ज्येष्ठं राज्ये अभिषिच्य सः शन्तनुः मृतः। उद्धतः चित्राङ्गदः एकदा एकेन गन्धर्वेण युद्धं कृत्वा मरणं प्राप्तवान् तदा विचित्रवीर्यस्तु बालः आसीदतः सत्यवती वचनात् भीष्म एव तन्नाम्नि राज्यं कुर्वन् आसीत्। सः विचित्रवीर्यः यदा यौवनावस्थां प्राप्तवान्, तदा तस्य विवाहाय सः भीष्मः कन्यान्वेषणं कुर्वन्नासीत्। तस्मिन्नेव समये काशीराजः स्वयंवरमायोजितवानासीत् अतः काशीनगरं गतवान्। तत्र राज्ञः आस्थाने एनं भीष्मं दृष्ट्वा बहवः राजानः चिन्तितवन्तः यत् अयं किमर्थमत्र आगतोऽस्ति? अयमाजन्मब्रह्मचारी खलु, अये! कन्यायां जाताभिलाषः समुपस्थितः स्यात्? स्वभ्रातुः प्रतिनिधिभूतः आगतः स्यात्? एवमनेकविकल्पान् तत्रागताः राजानः तर्कयन्तः आसन्। परन्तु तत्सर्वं शृण्वन्नपि न शृणोति इव भीष्मः अग्रे आगमत्। स्वयंवरे काशीराजस्य तिस्रः पुत्र्यः अम्बा-अम्बिका-अम्बालिकानामिकाः आसन्। अन्येषु राजसु ताः वीक्ष्यमाणेषु सत्सु सः भीष्मः ताः तिस्रः अपि लीलया स्वभुजयोरुपरि समारोप्य रथमारोपयामास।

एतदसहमानाः ते राजानः कथमयं कन्याः हरेदस्मासु सत्सु? इति तदुपरि प्रहरणाय उद्यताः। तदा सः भीष्मः वदति यत् गान्धर्वराक्षसविवाहौ निर्दिष्टौ वर्तेते क्षत्रियाय, तत्र द्वितीयः मया क्रियमाणः वर्तते। यदि मत्तः भीताः सन्ति चेत् रक्षिताः, नो चेत् आयान्तु इति गर्जयन् तान् आह्वयति, तेऽपि तत्प्रहाराय आयान्ति। सः लीलया तान् सर्वानपि जित्वा गच्छति तदा साल्वनामकः सौभपतिः तं निन्दन् युद्धाय पुनराह्वयति। द्वयोर्मध्ये प्रचलिते घोरे युद्धे साल्वः शस्त्रविहीनो भवति पराजयं च प्राप्नोति। ततः परं अन्यः कोऽपि इच्छति वा मया सार्धं योद्धुं इति प्रश्ने कृते सति अलब्धोत्तरः सः भीष्मः स्वपुरीं आगतवान्। ताः तिस्रः अपि बालिकाः सत्यवत्याः करे समर्पितवान्।

अथ विवाहमुहूर्ते निश्चिते एकस्मिन्दिने सभायां नानादेशेभ्यः आगतानां राज्ञां सभ्यानां सत्यवत्याश्च पुरतः सा अम्बा भीष्मम् इदमुवाच - हे पौरवेन्द्र! चिराय मम मनसि साल्वराजः निवसति। सोऽपि मां काङ्क्षति। स्वयंवरे सः ''मां वरीतुमेवागतः आसीत् परन्तु भवान् सर्वं नाशितवान्। सम्प्रत्यपि मम मनः तमेव इच्छति। अतः मां विमोचय''

इति। सः विवेकी भीष्मः तत्रत्यानां सभ्यानाम् अभिप्रायं पृच्छति। ते सर्वेऽपि तस्याः इच्छा नास्ति चेत् तां त्यजतु, शिष्टाभ्यां सार्धं वरणं कारयतु इत्युक्तवन्तः। तदनुसारं सः तामम्बां वदति यत् ''इदानीमपि न किञ्चिच्छिन्नम्। अतः भवती गच्छतु साल्वमेव प्राप्नोतु, नास्ति चिन्ता कापि'' इति। एवं तस्याः गमनाय व्यवस्थां कृत्वा सः तयोः विवाहं विचित्रवीर्येण सार्धं कारितवान्।

**चतुर्थोच्छ्वासस्य सारांशः**

अस्योच्छ्वासस्य नाम व्रतस्थेमा इति। सा अम्बा साल्वराजमुपगम्य तं प्रणम्य ''एषागता तव प्रियाहम्'' इति यदा तया उक्तम् तदा सः साल्वः ''त्वया सह प्रेमानुबन्धः आसीत् परन्तु स तु भग्नः खलु पुनः कथं प्ररोह'' इति प्रत्युत्तरति। बहु कथनानन्तरमपि स एवम् उक्तवान् यत् ''भवती तमेव पराक्रमिणः भीष्मस्य समीपं गच्छतु'' इति ततः तां प्रेषयति। सा पुनः भीष्मसमीपमागत्य ''क्षम्यताम् मम चापल्यकृतापराधम्, निवर्तय मम विवाहम्'' इति वदति। भीष्मः ''मम साल्वयोः द्वेषः समाप्तः इत्युक्त्वा गत्वा तं प्रसीदय, प्रसन्नः सः त्वां वृणीते'' इति प्रेरयित्वा तां पुनः तत्समीपं प्रेषयति। सा पुनस्तत्र गत्वा ''वृत्तः विवाहः, मत्परिस्थित्या दुःखितः सः त्वया सह विवाहाय अनुमतिं प्रादात् इति साल्वं वदति।'' निराकरिष्णुः स प्रतिवदति यत् ''अये! यदा सः दयार्द्रभावः तदा एव सः निर्बन्धनीयः आसीत् खलु, त्वमेव माम् वृणीष्व'' इति। मिथ्याप्रियवचनेन कृतोत्साहा सा पुनः भीष्ममुपगता तम् निवेदितवती स च स्पष्टं तां निन्दन् निराकृतवान् यत् ''अहं आजन्मब्रह्मचारी वर्ते नाहं कदापि त्वया सह विवाहं कर्तुं शक्नोमि इति।'' ''इतः परमियमत्र राज्येऽन्तः न प्रवेश्या'' इति तत्सम्मुखे एव सीमन्तपालमादिष्टवान्। पुनः सा साल्वमुपगम्य ''भीष्मेण विद्राविताास्मि भोः, अहं भवतः प्रेमिका खलु प्रतिगृह्णातु माम्'' इति प्रार्थयति। तदा साल्वः तच्चरित्रोपरि सन्देहवचांसि वदति। तथा नास्ति भोः! सुशीलाऽहमिति सा प्रतिपादयति, भवत्या सह मया चर्चा न कार्या इत्युक्त्वा तां निष्कासयति। सा मुखमुरश्च ताडयन्ती हा हतास्मि! वञ्चितास्मि! इत्येवं विलपन्ती, साल्वभीष्मौ निन्दन्ती प्रधावन्ती क्वचिदरण्ये तापानवलोक्य सरभसं तच्छरणमगच्छत्।

अस्याः वृत्तान्तं श्रुत्वा तेषु केचन अस्याः एव अपराधः इति, केचित् साल्वस्येति, केचन भीष्मस्येति च स्वाभिप्रायं प्रकटितवन्तः अन्ते तत्पितृसमीपनयनोपायः केनचिन्निर्दिष्टः यदा सा तपस्विनी भवाम्यहं इति वदति तदा मास्तु तद्दुष्करं अनर्थकरं चेति निवारयति शैखवत्यः। तस्मिन् समये समुपस्थितः होत्रवाहनो नाम राजा, यश्च वृत्तान्तं सर्वमपि अश्रौषीत्। यदा च अम्बाम् अद्राक्षीत्, अयि इयं मम दौहित्री इति बहु दुःखमन्वभवत् ता गृहं नेतुमीष्टे सा च निराकरोति।

तदनन्तरदिने होत्रवाहनस्य मित्रं महातेजस्वी जामदग्न्यः तत्र समायाति इति ज्ञातवन्तः। यदायातः रक्षेति तं प्रार्थितवन्तः। अस्त्विति जामदग्न्यः तया सह कुरुक्षेत्रमायाति भीष्मं मिलितुम्, भीष्मोऽपि ज्ञातागमनः स्वागताय सिद्धः आसीत्। तत्पश्चादनया सह विवाहं कुरु इति भार्गवेण उक्तः तन्निराकरोति भीष्मः, एतदर्थं तयोः गुरुशिष्ययोः मध्ये वाग्युद्धं प्रचलति। तदनु उभाभ्यामपि युद्धमारब्धम्। अन्ते गङ्गा तत्रागत्य युद्धं समापयितुम् उभौ अपि कथयति। युद्धे द्वाविंशे दिने भीष्मस्य सारथिः मारितः, भीष्मे च अस्त्रशस्त्राणि प्रयुक्तानि, प्रविष्टानि च तच्छरीरम्। रथात्पतितं भीष्मं रथे उपावेश्य प्रग्रहान् गृह्णाति माता गङ्गा तां निवार्य स्वयमेव भीष्मः सारथ्यं प्रहारं द्वयमपि करोति। चतुर्विंशे दिने उभावपि ब्रह्मास्त्रं प्रयुक्तवन्तः येन सकलभुवनान्यपि कष्टे पतितानि। नारदादयः मुनयः गङ्गा च तद्युद्धं अवरोद्धुं तत्रागताः। तत्पश्चात् ''**जितोऽहम्**'' इति तुष्टः भार्गवः। तस्य चरणयोः पतित्वा ''क्षम्यतां मत्साहसम्'' इति भीष्मः क्षमां याचते। सोऽपि प्रसन्नः तं परिश्वजते। ''यावच्छक्यमस्माभिः कृतम् इतः परं करणीयं कुरु'' इति अम्बामुक्त्वा सः मुनिः महेन्द्रगिरिमगात्, भीष्मश्च स्वपुरमगात्।

**पञ्चमोच्छ्वासस्य सारांशः**

अस्योच्छ्वासस्य नाम भीष्मोपन्यासः इति। अम्बा शिवमाराध्य भीष्मवधाय वरं प्राप्य स्वान्तमग्नौ जुहोति। हुत्वा द्रुपदपुत्रीत्वेन पुनर्जन्म प्राप्य कस्यचिद्यक्षस्य प्रसादेन पौंस्त्वमासाद्य शिखण्डीति ख्यातिं प्राप्नोति। पुनर्जन्मन्यपि पूर्ववैरं पारयितुं समयं प्रतीक्षमाणा तिष्ठति। एतन्नारदमुखात् ज्ञात्वा नाहं स्त्रिया स्त्रीपूर्वेण वा कथमपि प्रतियुध्येय इति प्रतिज्ञां करोति भीष्मः।

विचित्रवीर्यः कतिचन कालानन्तरं मरणं प्राप्तवान्। तदा सत्यवती भीष्मं विवाहाय प्रेरयति। स च आजीवनमहं ब्रह्मचारीति तन्निराकरोति। ततः परं रहस्यं किञ्चित् वच्मि इति वदति यत् ''पुरा नौकर्म कुर्वाणायां मयि पराशरेण कृष्णद्वैपायनो नाम पुत्र उत्पादितः। सपद्येव यौवनप्राप्तेन तेन अवसरे तवानृण्यं गन्तास्मि इति वरः प्रदत्तः'' इति। भीष्मः तां सत्यवतीं व्यासजननीति ज्ञात्वा आत्मनः सौभाग्यमनुभवन् मुनिं तम् आकारय इत्यवदत्। तस्य मुनेः कृपया धृतराष्ट्रः एवं पाण्डुरिति पुत्रावुत्पन्नौ। पुनरग्रे भीष्मः दुर्योधनादिषु धार्तराष्ट्रेषु, युधिष्ठिरादिषु पाण्डवेषु च राज्यं समविभागं कृत्वा अदात्। जातु चिदवसरे राजसूययागसमये अग्रपूजाकाले सभायामुपस्थितं ज्येष्ठपितामहम् अप्राक्षीत् यत् कः उत्तमः? इति स च भीष्मः युक्तियुक्तं ''नान्यो विद्यते अग्रपूजायै योग्यः भगवन्तं कृष्णं विहाय'' इति उक्तवान्। ततः परं पूजापि सुसम्पन्ना।

एतत्सर्वमसहमानः दुर्योधनः द्यूते शकुनिना सह मिलित्वा युधिष्ठिरं पराजितवान्। अजातशत्रुः सः आत्मानम्, अनुजान्, जायाश्च द्यूते स्थापयित्वा पराजयं प्राप्तवान्। ततः परं सभायां सर्वेषां सम्मुखे एव दुर्योधनाज्ञया दुःशासनेन द्रौपद्याः केशाम्बराकर्षणे कृते सा च कृष्णेन अक्षयवसनदानाद्रक्षिता। पुनर्द्यूतस्य नियमानुसारं तैः द्वादशवार्षिकं वनवासक्लेशमनुभूय, त्रयोदशे वर्षे अज्ञातासः करणीयः आपतितः। एतत्सर्वं समाप्य आगतैः पाण्डवैः पञ्चग्रामाः प्रार्थिताः, सन्ध्यर्थमपि प्रार्थितम्, सर्वं च निराकृतं दुर्योधनेन।

एवं यदा दुर्योधनः कृष्णसन्धानं भञ्जयति तदा वृद्धेन मया किञ्चित् वक्तव्यमिति इति विचिन्त्य वदति भीष्मः यत् ''मयि स्थिते कथमिदं स्वातन्त्र्यं युष्माकम् राज्यमिदं मत्पितुः मामेव प्रथममुपस्थिता, मय्युपेक्षितवति, मदनुमत्या क्षणं विचित्रवीर्ये विश्रम्य तत् पाण्डुमासाद्य निर्वृता तस्मिन्नेव रेमे, उपरते तु तस्मिन्, ततस्तव पितरम्, ततो युष्मांश्च शिश्रिये। एवं सति कथं त्वमेव भागी कुरुराज्ये न पाण्डवाः। प्रयच्छ पाण्डवेभ्यो राज्यम्'' इति। अन्ततो गत्वा अर्जुनेन श्रीकृष्णः सारथ्यर्थं प्रार्थितः। कृष्णेन ''युद्धे अहं शस्त्रं न धरामि'' इति प्रतिज्ञा कृता तच्छुत्वा भीष्मेनापि ''न ग्राहयामि शस्त्रं कृष्णेन पाण्डवेषु न च प्रहरामि इति प्रतिज्ञे'' कृते। ''शिखण्डिना सार्धं न युध्येमहि'' इत्युक्त्वा अक्षौहिणीसप्तपरिमितं पाण्डवबलमभिजगाम।

**षष्ठोच्छ्वासस्य सारांशः**

अस्योच्छ्वासस्य नाम स्वच्छन्दमृत्युताप्रकाशनम् इति। कुरुक्षेत्रे सम्मुखमागत्य गुरुः ज्येष्ठः इति पादयोः पतितस्य युधिष्ठिरस्य कृते वदति ''वदतु तेऽभीप्सितं करिष्यामि समरसाह्यवर्जम्'' इति। युधिष्ठिरः ''पितामह तव जयोपायं वदतु'' इति वदति। ''तत्काले वदामि'' इति उक्त्वा तं विसृज्य ''युधिष्ठिराय जयो भवतु'' इति भगवन्तं सम्प्रार्थ्य युद्धमारभते भीष्मः। युद्धक्षेत्रं प्रविश्य सर्वमाकुलयन्, बहून् मारितवान्। पाण्डवसेनायाः सङ्ख्या न्यूना जाता। भयत्रस्तः अजातशत्रुः सायं तच्छिबिरं गत्वा ''सम्प्रति तवोपरि विजयोपायं वदतु'' इति प्रार्थिते सति भीष्मः ''स्त्रीपूर्वं शिखण्डिनं पुरोधाय मदुपरि विजयं प्राप्नुहि इत्यवदत्।''

परेद्यवि समुपस्थिते शिखण्डिनि यदा तन्मारयितुं धार्तराष्ट्राः सर्वेऽपि तदुपरि अपतन् तदा पाण्डवाः सर्वेऽपि तद्रक्षणमकार्षुः। ततःपरं ''मदर्थं शरशय्यां विनिर्मातु'' इति भीष्मवचननुसरन् पार्थः शरशय्यां करोति तच्छयनाय। तत्पश्चात् गङ्गायाः सन्देशहारकाः हंसाः आगत्य गदन्ति यत् ''गतिविशेषमीप्सतां दक्षिणायने मरणं नोचितम्'' इति। एतज्जानन् भीष्मः ''धारितास्मि प्राणान् उत्तरायणपर्यन्तम्'' इत्यवादीत्। तदनु सः पार्थोपकल्पिते शरोपाधाने शिरः संस्थाप्य शरशय्यायां शयानः सर्वान् ततः निर्गन्तुमादिशति।

**सप्तमोच्छ्वासस्य सारांशः-**

अस्योच्छ्वासस्य नाम उपदेशसङ्ग्रहः इति। युधिष्ठिरः कुरुक्षेत्रयुद्धे विजयं राज्यं च सम्प्राप्य तत्प्राप्तिकारणी-भूतस्य भगवतः श्रीकृष्णस्य पार्श्वं गत्वा सुखं शयितं भगवता इति पप्रच्छ। निरुत्तरं तं दृष्ट्वा जाताश्चर्यः अजातशत्रुः पृच्छति ''किं कारणमस्य?'' इति। ''सततं मा तव पितामहः भीष्मः ध्यायति अतः तत्रास्ति सर्वतन्त्रस्वतन्त्रस्यापि

भक्तपरतन्त्रस्य मम मनः। अतः क्षम्यताम्। सः इदानीमेव सभाजयितव्यः इति कृष्णः युधिष्ठिरम् उक्त्वा तेन सह कुरुक्षेत्रमाजगाम।

गत्वा च तत्र भीष्मस्य समाधिभङ्गः न स्यात् इति उभावपि तूर्ष्णीं तिष्ठतः। समाधावेवावगतार्थः स भीष्मः अक्षिणी समुन्मील्य कृष्णदर्शनं कृत्वा करौ बद्ध्वा सानन्दं मम सौभाग्यमिदं इति वदति। ततः परं सन्ध्यासमये श्रीकृष्णः ''युधिष्ठरोऽयं बन्धुहननेन दुःखितः यथावत्प्रजाकार्ये मनः न कुरुते, किञ्चिदेनम् उपदिशतु'' इति वदति। सन्ध्यासमयत्वात् अपरस्मिन् दिने उपदेशः भवतु इति ततः उभावपि निर्गच्छतः। परेद्यवि अपेक्षितजनैः सह श्रीकृष्णं पुरस्कृत्य युधिष्ठिरः भीष्मान्तिकमुपयाति। भीष्मः ''वत्स, सन्ति बहवो राजधर्माः, किन्तु तेषु विशिष्यते प्रजापालनम्, अपि च भवान् केवलं भवतः ज्ञातिनाम् देहनाशमेव कृतवान् न तु आत्मनः, आत्मा तु नित्यः, भगवान् केवलं निमित्तमात्रः, अतः मास्तु शोकः पालय प्रजाः इति सम्यगुद्बोधयति। प्राप्ते तु उत्तरायणे त्वं पुनरस्मान् पश्येरिति तम् अजातशत्रुं नगराय निवर्तयति।

**अष्टमोच्छ्वासस्य सारांशः-**

अस्योच्छ्वासस्य नाम ''स्वर्गारोह'' इति। दिनेभ्यः परं कृष्णं पुरस्कृत्य राजा युधिष्ठिरः कुरुक्षेत्रं गत्वा शरतल्पस्थं भीष्मं प्रणम्य ''पितामह, प्राप्तमुत्तरायणम्'' इति वदति। प्रमुदितः भीष्मः वदति यत् अद्य माघमासस्य शुक्लपक्षः वर्तते, अतीतान्यष्टपञ्चाशतमहानि अस्यामवस्थायाम् मम, अनुमतिं ददातु गन्तुं मह्यम्। कृष्णं दृष्ट्वा ''भगवन्! कियती कृपा भवतः मयि यदीदृशेप्यवसरे मम दर्शनगोचरोऽसि। मम प्राणानां गमनपर्यन्तं तिष्ठतु'' इति प्रार्थयति। ''अप्रतिबन्धो वसुपदं याहि'' इति भगवान् कृष्णः वदति। अस्त्विति ध्यायति, स्तौति परमात्मानम्। तदा एव सः ब्रह्मरन्ध्रेण परज्योतिः स्वरूपः समुत्थाय दिवमारोहन् यथापुरं स्वे वासवे पदे चकासयामास। अन्ते च कविः नाटकेषु भरतवाक्यवत् अत्रापि मङ्गलाचरणमकरोत्।

संस्कृतसाहित्ये भीष्मविजयगद्यकाव्यस्य शैली विशिष्टा वर्तते। तत्र लक्ष्मणसूरिणां विचक्षणता एव कारणम्। कवयः एते कस्याः अपि शैल्याः दासाः न सन्तीति तद्रचनादर्शनेन स्पष्टं भवति। प्रसङ्गानुसारं गुणानां रीतीनां च प्रयोगः समस्तकाव्ये द्रष्टुं शक्यते परन्तु औजोगुणयुक्तरचनाधिक्यं दृश्यते। एवं दाक्षिणात्यः कविरयं कविकुले विजयतेतराम्।

## स्वाध्यायः

**1. रिक्तस्थानपूर्तिं कुरुत।**

(1) भीष्मविजयस्य रचयिता ………… । (हेमचन्द्रसूरि, लक्ष्मणसूरिः, कैलाससूरिः)

(2) लक्ष्मणसूरिणः जन्म ………… वर्षे जातम्। (1856, 1857, 1858)

(3) भीष्मविजये आहत्य ………… उच्छ्वासाः सन्ति। (अष्टौ, नव, दश)

(4) शन्तनोः ………… । (चन्द्रवंशः, सूर्यवंशः, किमपि न)

(5) तृतीयोच्छ्वासस्य ………… इति नाम। (भीष्मप्रादुर्भाव, भीष्मप्रतिज्ञा, भीष्मविक्रमः)

(6) मत्स्यगन्धायाः अपरं नाम ………… इति। (चन्द्रकला, सत्यवती, अम्बा)

(7) अम्बा ………… पुत्री। (मगधराजस्य, काशीराजस्य, दाशराजस्य)

(8) अम्बा ………… आराध्य भीष्मवधाय वरं प्राप्तवती। (ब्रह्माणम्, विष्णुम्, शिवम्)

(9) ''युद्धे अहं शस्त्रं न धरामि'' इति प्रतिज्ञा ………… कृता। (अर्जुनेन, कृष्णेन, दुर्योधनेन)

(10) ''पितामह, प्राप्तमुत्तरायणम्'' इति ………… उक्तिः। (दुयीधनस्य, युधिष्ठिरस्य, भीष्मस्य)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) लक्ष्मणसूरिणः पितुः नाम किम्?

(2) प्रथमोच्छ्वासस्य नाम किम्?

(3) प्रथमोच्छ्वासे शन्तनुः मृगयार्थं कस्याः नद्याः तटं गच्छति?

(4) ''स्वच्छन्दचेष्टा भव'' इति कस्योक्तिः?

(5) ''जात अस्तु तेऽपवर्गः'' इति कस्योक्तिः?

(6) भीष्मस्य पूर्वं (मूल) नाम किम्?

(7) चेदीश्वरः कः?

(8) सौभपतिः कः?

(9) होत्रवाहनस्य दौहित्री का?

(10) अष्टमोच्छ्वासस्य नाम किम्?

**3. टिप्पणीं लिखत।**

(1) दृढव्रतः भीष्मः।

(2) गङ्गा।

(3) दाशपतिः।

**4. सविस्तरमुत्तरं दत्त।**

(1) अम्बायाः दुःस्थितिं वर्णयत।

(2) द्वितीयोच्छ्वासस्य सारांशं लिखत।

(3) लक्ष्मणसूरिणः परिचयं दत्त।

**5. ''अ'' विभाग ''ब'' विभागेन सह योजयत्।**

| अ | ब |
|---|---|
| (1) शन्तनुः | युधिष्ठिरः |
| (2) पाण्डुः | परशुरामः |
| (3) धृतराष्ट्रः | देवव्रतः (भीष्मः) |
| (4) काशीराजः | दुर्योधनः |
| (5) जमदग्निः | अम्बा। |

**छात्रप्रवृत्तिः**

भीष्मविजयगद्यकाव्यस्य गभीराध्ययनम्।

**अध्यापकप्रवृत्तिः**

अन्येषां गद्यकाव्यानां परिचयप्रदानम्।

●

# १३

# विक्रमोर्वशीयम्

**प्रस्तावना**

'विक्रमोर्वशीयम्' कविकुलगुरुणा कालिदासेन विरचितम् अद्भुतं सुन्दरं च कल्पनाप्रधानं नाटकं वर्तते। अस्य नाटकस्य कथावस्तु पृथिव्याः स्वर्गं यावत् प्रसृतमस्ति, अत एव तस्य दृश्ययोजना सन्निवेशः च अलौकिकः भाति। नाटकस्यास्य सौन्दर्यप्रशंसां टागोर-अरविन्दादयः बहव अद्यतनाः विद्वांसः कृतवन्तः। नाटकेऽस्मिन् पञ्चाङ्काः सन्ति। अस्य नायकः प्रतिष्ठानपुरस्य सम्राट् पुरूरवाः नायिका च स्वर्गलोकस्य अप्रतिमा अप्सरा उर्वशी। द्वयोः प्रणयः अस्मिन्नाटके निरूपितः वर्तते।

**कथावस्तु** -

पञ्चाङ्केषु निबद्धं नाटकमेतत् त्रोटकनामकं रूपकम्। अस्मिन् राज्ञः पुरूरवसः (विक्रमस्य) उर्वशीनामिकायाः अप्सरसः च प्रणयकथा वर्णिता अस्ति। महाराजः पुरूरवाः केशीराक्षसात् सन्त्रस्तायाः उर्वश्याः उद्धारं करोति। उर्वश्याः सौन्दर्यकारणात् राज्ञः च पराक्रमकारणात् उभावपि परस्परं मुग्धौ जातौ। उर्वशी महाराजस्य स्नेहविषयम् अभिजानाति। उर्वश्या लिखितं प्रेमपत्रं विदूषकस्य दोषवशात् पुररवसः पत्नी देवी औशीनरी प्राप्नोति। तत् प्राप्य सा महाराजं तर्जयति। राजा सानुनयं तस्याः क्रोधं शमयति।

कस्मिंश्चित् नाट्यमञ्चनावसरे अनवधानवशात् अन्यमनस्का उर्वशी 'पुरूषोत्तमविष्णुः' इति स्थाने 'पुरूरवाः' इति नाम्नः उच्चारणं करोति। तदा नाटकस्य निर्देशकः भरतमुनिः क्रुद्धो भूत्वा उर्वश्यै शापं ददाति यत् 'पुत्रदर्शनकालं यावत् मर्त्यलोके वस' इति। उर्वशी राज्ञः समीपे एव वसति। चतुर्थाङ्के इत्थं किञ्चित् घटति यत् राजा विद्याधरकुमारीकामेकां दृष्ट्वा तस्यामासक्तो भवति। एतद् दृष्ट्वा कुपिता उर्वशी कार्तिकेयस्य गन्धमादनोपवनं प्रति याति। गन्धमादनोपवनस्य स्वामिना कार्तिकेयेन उपवनस्य केचन नियमाः रचिताः आसन्। तदनुसारं या कापि स्त्री उपवनमिदं प्रवेक्ष्यति सा लता भविष्यति। नियमानुसारम् उर्वशी अपि लतायां परिवर्तिता भवति।

वृत्तमिदं ज्ञात्वा राजा शोकाकुलः भवति। ततश्च आकाशवाणी भवति यत् सङ्गमनीयं मणिं गृहीत्वा लतारूपायाः उर्वश्याः आलिङ्गनकरणेन सा पुनः पूर्वतनं स्वरूपं प्राप्स्यति। आकाशवाण्याः वचनं श्रुत्वा राजा तथा करोति। अनेन प्रकारेण राजा लतां पुनरपि उर्वश्यां परिवर्तितां करोति। ततश्च कश्चित् गृध्रः तं सङ्गमनीयं मणिं नीत्वा पलायते स च पुत्रः। कस्यचित् अनभिज्ञस्य बाणेन सः गृध्रः मरणम् अवाप्नोति। तस्य बाणस्योपरि 'पुरूरवसः पुत्रः आयुष' इति लिखितं भवति। उर्वशी जानन्त्यपि च्यवनऋषेः आश्रमे गोपयित्वा स्थापितः आसीत्। पुत्रदर्शनकारणादेव शापमुक्तया तया पुनः स्वर्गगमनाय आदेशः प्राप्तः। तस्मात् सा अतीव दुःखिता भवति। तस्मिन्नेव काले नारदमुनिः इन्द्रलोकात् आगत्य सूचयति यत् इन्द्रः क्वचित् युद्धे पुरूरवसः साहाय्यम् अपेक्षते इत्यतः इन्द्रकृपया उर्वशी इतः परं सर्वदा पुरूरवसा सह वसिष्यति। इत्थं प्रकारेण कथानकमेतत् संक्षेपण अत्र प्रस्तुतम्।

पुरूरवसः उर्वश्याश्च कथेयं ऋग्वेदे, यजुर्वेदे, शतपथब्राह्मणे, विष्णुपुराणे, मत्स्यपुराणे, महाभारते च प्राप्यते। महाकविना कालिदासेन वैदिकाख्यानेऽस्मिन् बहवो नवीनाः अंशाः योजिताः सन्ति। यथा - भरतमुनिना उर्वश्यै प्रदत्तः अभिशापः, कार्तिकेयस्य उपवनस्य नियमवार्ता, उर्वश्याः लतायां परिवर्तनस्य वार्ता, पुरूरवसः विलापः इत्यादयः प्रसङ्गाः। वैदिकाख्यानस्य अभिप्रायः विद्यते यत् पुरूरवसः अर्थात् मेघस्य उर्वश्याः अर्थात् विद्युतः इत्युभयोः संयोगेन आयुषः अर्थात् अन्नस्य जन्म भवति (धान्यम् उत्पद्यते) निरूक्ते 10.46 तमे मन्त्रे पुरूरवसः अर्थः मेघः, यजुर्वेदे 15.19 निरूक्ते च उर्वश्याः अर्थः विद्युत् इति प्रदत्तः। अनेन प्रकारेण द्वावपि एतौ परस्परसंयोगेन विना स्थातुं न शक्नुतः अयमेव शृङ्गारिकः पक्षः वर्तते।

'विक्रमोर्वशीम्' रूपकस्य कानिचित् वैशिष्ट्यानि अवलोकयामः चेत् -

अत्र कवेः प्रतिभा पर्याप्ता विकसिता अनुभूयते। मालविकाग्निमित्रस्यापेक्षया अत्र पात्राणाम् अन्तर्दशायाः सुन्दरं चित्रणम् अस्ति। दिव्यायाम् उर्वश्याम् अपि मानवीयभावाः सुन्दरतया चित्रिताः सन्ति। भाषायां भावेषु च कवेः विकासोन्मुखी प्रतिभा, भाषायां सारल्येन सह प्रसादमाधुर्यमपि विद्यते। भावेषु आन्तर्द्वन्द्वं मानसदशायाः सुन्दरं विश्लेषणं च अस्ति। चतुर्थाङ्के राज्ञः विलापः विविधवृत्तेषु विद्यते, कवित्त्वदृष्ट्या इमानि पद्यानि अतीव सुन्दराणि। गतिशीलतायां नाटकमिदं मालविकाग्निमित्रात् न्यूनं किन्तु विचारवैशारद्ये अतीव श्रेष्ठं विद्यते। कवेः वर्णनशक्तिः अपि प्रबुद्धा। लघुवाक्यैः, लोकोक्तिभिः, सूक्ष्मप्रकृतिनिरीक्षणं करुणरसप्रवाहेण, हास्यरसपुटैः, कथानकसौन्दर्येण च नाटकमिदम् अतीव मनोहरं प्रतिभाति।

नाटकस्य प्रारम्भतः एव कवेः कल्पनानां मनोज्ञतां दृष्टुं शक्नुमः। उर्वश्याः नैसर्गिकं मनोभिरामं च सौन्दर्यं राज्ञः मनसि शङ्कां जनयति यत् 'सर्जनमिदं ब्रह्मणः अस्ति न वा ?' पद्येनानेन तत् ज्ञातुं शक्यते -

**अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः**
**शृङ्गारैकरसः स्वयं नु मदनो मासो नु पुष्पाकरः।**
**वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो**
**निर्मातुं प्रभवेन्मनोरममिदं रूपं पुराणो मुनिः॥**

**- विक्रमोर्वशीयम् 1.10**

उर्वश्याः अनुपमसौन्दर्यं वर्णयन् महाकविः लिखति -

**आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः।**
**उपमानस्यापि सखे! प्रत्युपमानं वपुस्तस्याः॥**

**- विक्रमोर्वशीयम् 2.3**

व्यतिरेकालङ्कारस्याश्रयेण कविः कथयति यत् उर्वश्याः शरीरम् आभूषणानाम् अपि भूषणम् अस्ति, अलङ्करणविधेरपि अलङ्करणम्, उपमानस्यापि उपमानमस्ति।

केशिराक्षसात् भयभीता उर्वशी मूर्च्छां गता, ततश्च चैतन्यप्राप्तेः अनन्तरकालीनं कीदृशं सजीवं चित्रणं वर्तते। तद्यथा-

**आविर्भूते शशिनि तमसा मुच्यमानेव रात्रिः**
**नैशस्यार्चिर्हुतभुज इवच्छिन्नभूयिष्ठधूमा।**
**मोहेनान्तर्वरतनुरियं लक्ष्यते मुक्तमाना**
**गङ्गा रोधःपतनकलुषा गच्छतीव प्रसादम्॥**

**- विक्रमोर्वशीयम् 1.9**

अथात्र सम्भोगशृङ्गारस्य सुन्दरं वर्णनं प्राप्यते। उर्वशीं प्राप्य राजा आत्मानं गर्वान्वितम् अनुभवति। यथा तस्य सर्वाणि दुःखानि अपगतानीव -

**पादास्त एव शशिनः सुखयन्ति गात्रं**
**बाणास्त एव मदनस्य मनोऽनुकूलाः।**
**संरम्भरूक्षमिव सुन्दरि यद्यदासीत्**
**त्वत्सङ्गमेन मम तत्तदिवानुनीतम् ॥**

**- विक्रमोर्वशीयम् 3.20**

उर्वश्याः वियोगावसरे राज्ञः उन्मत्ततायाः अपि सुन्दरं चित्रणं समुपलक्ष्यते, महाराजः सर्वदा सर्वत्र च उर्वशीम् एव परिकल्पयति -

**नवजलधरः सन्नद्धोऽयं न दृप्तनशाचरः**
**सुरधनुरिदं दूराकृष्टं न नाम शरासनम्।**
**अयमपि पटुर्धारासारो न बाणपरम्परा**
**कनकनिकषस्निग्धा विद्युत् प्रिया मम नोर्वशी॥**

**- विक्रमोर्वशीयम् 4.7**

एवं पूर्वलिखितैः कतिपयपद्यैः अस्य नाटकस्य गरिमा अस्माभिः ज्ञायते।

## स्वाध्यायः

**1. रिक्तस्थानपूर्तिं कुरुत।**

(1) 'विक्रमोर्वशीयम्' रूपके .......... अङ्काः विद्यन्ते। (त्रयः, चत्वारः, पञ्च)
(2) उर्वशी .......... अस्ति। (नागकन्या, गन्धर्वकन्या, अप्सरा)
(3) उर्वश्या स्वपुत्रः .......... आश्रमे स्थापितः। (च्यवनर्षेः, कण्वमुनेः, गौतमर्षेः)
(4) .......... पुरूरवसः साहाय्यम् अपेक्षते। (इन्द्रः, औशीनरी, उर्वशी)
(5) कुपिता उर्वशी .......... उपवनं गच्छति। (गन्धमादन, अशोकवाटिका, स्वर्गलोकस्य)
(6) पुरूरवाः .......... सन्त्रस्तायाः उर्वश्याः उद्धारं करोति। (विदूषकात्, अभिशापात्, केशीराक्षसात्)
(7) पुरूरवाः अर्थात् .......... भवति। (विद्युत्, मेघः, वर्षाः)
(8) उर्वश्याः अर्थः विद्युत इति .......... वर्णितमस्ति। (ऋग्वेदे, यजुर्वेदे, सामवेदे)
(9) .......... प्रेमपत्रं लिखति। (औशीनरी, पुरूरवाः, विदूषकः)
(10) .......... अस्य नाटकस्य कर्ता अस्ति। (भारविः, कालिदासः, भासः)

**2. टिप्पणीं लिखत।**

(1) उर्वश्याः सौन्दर्यम्।
(2) 'विक्रमोर्वशीयम्' कथानकस्य आधारभूताः ग्रन्थाः।
(3) पुरूरवसः मनोदशा।

**3. सविस्तरम् उत्तरं लिखत।**

(1) उर्वश्याः उपवनप्रवेशः।
(2) अभिशापात् उर्वश्याः मुक्तिः।
(3) 'आभरणस्याभरणं प्रसाधनविधेः प्रसाधनविशेषः' इति पङ्क्तेः भावं प्रतिपादयत।
(4) 'विक्रमौर्वशीयम्' रूपकस्य वैशिष्ट्यानि।
(5) उर्वश्याः वियोगात् राज्ञः विरहदशायाः वर्णनम्।

**4. 'अ' - विभागं 'ब' - विभागेन सह योजयत।**

| अ | ब |
|---|---|
| (1) औशीनरी | अप्सराः। |
| (2) कालिदासः | प्रतिष्ठानपुरस्य सम्राट्। |
| (3) पुरूरवाः | पञ्चाङ्कात्मकं नाटकम्। |
| (4) उर्वशी | प्रतिष्ठानपुरस्य साम्राज्ञी। |
| (5) विक्रमोर्वशीयम् | विक्रमोर्वशीयस्य रचयिता। |

●

# १४

# दोषनिरूपणम्

**प्रस्तावना**

काव्यस्याध्यनाध्यापने उत्तममध्यमाधममूल्याङ्कने यथा गुणानां ज्ञानमनिवार्यं भवति तथैव दोषाणामपि ज्ञानं निर्णायकं भवति। एतस्मात्कारणात् काव्यलेखनावसरे काव्यज्ञानावसरे के के दोषाः पूर्वसूरिभिः आकरग्रन्थकारैः दर्शिताः तदस्माभिः ज्ञातव्यं भवति। दोषविवेचनम् अन्याकरग्रन्थेभ्यः मम्मटकृते काव्यप्रकाशे नितरां सहजं सरलञ्च निरूपितम्। तस्मादत्र तमेव ग्रन्थमाश्रित्य दोषाणां निरूपणं विधीयते।

---

आचार्यमम्मटः स्वकीयकाव्यप्रकाशनामकग्रन्थस्य सप्तमोल्लासे दोषाणां स्वरूपनिरूपणम् अकरोत्। यथा-

**मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयत्वात् वाच्यः।**

**उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः॥**

मुख्यार्थस्य हतिः अपकर्षः यस्मात् सः मुख्यार्थहतिः। अर्थात् मुख्यपदेनात्र रसस्य परामर्शः भवति, एवञ्च तस्य रसस्य हतिर्नाम अपकर्षः यस्मात् भवति स एव दोषः इत्यर्थः पर्यवसितो भवति। विश्वनाथमतेन ''रसस्यापकर्षका दोषाः'', इत्युक्ते ये रसस्यापकर्षं जनयन्ति त एव दोषपदवाच्याः इति। तर्ह्ययं दोषः कतिविधः? इति प्रश्ने सति उत्तरं भवति-प्रथमतः अयं नित्यानित्यत्वभेदेन द्विविधः। तत्पश्चादयं शब्दार्थरसभेदेन त्रिप्रकारकः भवति।

**1. शब्ददोषगतपददोषाः**

शब्ददोषः अपि पदपदां- शवाक्यगतत्वेन पुनः त्रिविधः। तेषु शब्दगतपदगतदोषाणां नामानि यथा-

**''दुष्टं पदं श्रुतिकटुच्युतसंस्कृत्यप्रयुक्तमसमर्थम्**
**निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाश्लीलम्।**
**सन्दिग्धमप्रतीतं ग्राम्यं भवेत् क्लिष्टम्**
**अविमृष्टविधेयांशः विरुद्धमतिकृत्समासगतमेव॥''**

तेषु दिङ्मात्रेण काञ्चन शब्ददोषगतपदगतदोषान् सोदाहरणं पश्यामः।

**(1) श्रुतिकटुत्वम्-**

यस्य रसस्य कृते यत्पदं वर्णः वा अनुकूलः नास्ति यदि तत्पदं तद्वर्णो वा तस्मिन् रसे प्रयुज्यते चेत् तर्हि तच्छ्रवणेन श्रुतेः पीडनं जायते अतः श्रुतिकटुत्वं कथ्यते। उदाहरणं यथा-

**अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः।**

**आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा॥**

पद्येऽस्मिन् शृङ्गारः वर्तते। शृङ्गारे कार्तार्थ्यम् इति पदं श्रुतिकटु भवति। कृतार्थस्य भावः कार्तार्थ्यम्। एतत्पदं श्रुतेः वेदनात्वात् श्रुतिकटु भवति। अत्र कार्तार्थ्यमिति पदयोगात् श्रुतिकटुत्वं दोषः।

**( 2 ) अप्रयुक्तता-**

कोशादौ व्यवहृतेऽपि पदे कविभिरप्रयुक्तत्वात् तत्प्रयोगे अप्रयुक्तता दोषः भवति।

यथा-

**यथायं दारुणाचारः सर्वदैव विभाव्यते।**
**तथा मन्ये दैवतोऽस्य पिशाचो राक्षसोऽथवा॥**

''वृन्दारको दैवतानि पुंसि वा देवतास्त्रियाम्'' इति अमरकोशवाक्यानुसारेण यद्यपि दैवतशब्दः पुंल्लिङ्गे प्रयोक्तव्यः इति नियमः वर्तते, तथापि प्रायः दैवतशब्दः नपुंसकलिङ्गे एव प्रसिद्धः। परन्तु अत्र दैवतपदस्य पुंल्लिङ्गे प्रयोगत्वात् अप्रयुक्तता दोषः।

**( 3 ) निहतार्थता-**

यत्र कश्चिच्छब्दः प्रसिद्धार्थं विहाय अप्रसिद्धार्थे प्रयुक्तः चेत् तत्र निहतार्थता दोषः भवति। यथा-

**यावकरसार्द्रपादप्रहारशोणितकथेन दयितेन।**
**मुग्धा साध्वसतरला विलोक्य परिचुम्बिता सहसा॥**

पद्येऽस्मिन् शोणितशब्दः उज्ज्वलीकृतेऽर्थे कविना न्यस्तः। शोणितशब्दः रुधिरार्थे प्रसिद्धः। परन्तु एतदर्थं विहाय उज्ज्वलार्थबोधनात् शोणितशब्दे निहतार्थता दोषः समभवत्।

**( 4 ) निरर्थकता-**

यत्र श्लोकेषु केवलं पादपूरणार्थमेव केषाञ्चन चवैतुहीत्यादीनां निरर्थकशब्दानां प्रयोगः क्रियते तत्र निरर्थकता दोषः भवति।

**उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि।**
**अभिवाञ्छितं प्रसिद्ध्यतु भगवति युष्मत्प्रसादेन॥**

पद्येऽस्मिन् हि शब्दः निरर्थकः। केवलं पादपूरणार्थम् अस्य प्रयोगः कृतः। पादपूरणार्थं प्रयुक्तानामेतादृशानां शब्दानां सार्थकताभावात् निरर्थकता दोषः।

**( 5 ) अवाचकता-**

प्रयुक्तपदात् यत्र अपेक्षितार्थः न प्राप्यते तत्र अवाचकतादोषः भवति।

**अवन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः।**
**अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः॥**

श्लोकेऽस्मिन् जन्तुपदम् अदातरि अर्थे प्रयुक्तम्। परन्तु जन्तुपदम् अदातुः अर्थं न बोधयति, तद्वाचकत्वं तस्मिन् शब्दे नास्ति। अतः जन्तुपदम् अदातरि अर्थे अवाचकमिति कृत्वा अवाचकता दोषोऽत्र भवति।

**2. शब्ददोषगतपदांशगतदोषाः**

पदस्य अंशविशेषे जायमानाः दोषाः पदांशगतदोषाः इति कथ्यन्ते। पदगतदोषेषु उक्ता एव केचन अत्र भवन्ति। पदांशगताः सप्तदोषाः काव्यप्रकाशकारेण प्रोक्ताः। ते यथा- श्रुतिकटुता, निहतार्थता, निरर्थकता, अवाचकता, अश्लीलता, सन्दिग्धता, नेयार्थता च।

**3. वाक्यगतदोषाः-**

यथा-

**प्रतिकूलवर्णमुपहतलुप्तविसर्गविसन्धि हतवृत्तम्**
**न्यूनाधिकं कथितपदं पतत्प्रकर्षं समाप्तपुनरात्तम्।**

**अर्थान्तरैकवाचकम् अभवन्मतयोगमनभिहितवाच्यम्,**

**अपदस्थपदसमासं सङ्कीर्णं गर्भितं प्रसिद्धिहितम्॥**

**भग्नप्रक्रममक्रमममतपरार्थं च वाक्यमेव तथा।**

**(1) प्रतिकूलवर्णता-**

यं रसं प्रति येषां वर्णानामनुकूलता नास्ति तत्र यदि तेषां वर्णानां योजनं क्रियते तर्हि प्रतिकूलवर्णता दोषः भवति। यथा -

**अकुण्ठोत्कण्ठया पूर्णमाकण्ठं कलकण्ठि! माम्।**

**कम्बुकण्ठ्याः क्षणं कण्ठे कुरु कण्ठार्तिमुद्धर॥**

श्लोकेऽस्मिन् शृङ्गाररसवर्णानप्रसङ्गे कोमलवर्णान् विहाय तद्रसानुगुणेतर ''ट्'' वर्गवर्णविन्यासात् प्रतिकूल-वर्णता दोषः।

**(2) उपहतत्वम् (ओत्वप्राप्तत्वम्)**

यत्र विसर्गादोत्वप्राप्तानाम् शब्दानां अधिकप्रयोगः क्रियते तत्र उपहतत्वदोषः भवति।

**धीरो विनीतो निपुणो वराकारो नृपोऽत्र सः।**

इह ''हशि च'' इति सूत्रानुसारम् अकारान्तविसर्गात्परं हश् प्रत्याहारान्तर्गतस्य वर्णस्य योगात् पूर्वविसर्गस्य ओकारः भवति। एवम्भूतानां बाहुल्ये अस्य दोषस्यावकाशः।

**(3) लुप्तविसर्गता-**

अधिकानां लुप्तविसर्गशब्दानां प्रयोगे लुप्तविसर्गता दोषः भवति।

**यस्य भृत्या बलोत्सिक्ता भक्ता बुद्धिप्रभाविताः।**

''भृत्या'', ''बलोत्सिक्ता'', ''भक्ता'' इति स्थलेषु विसर्गस्य लोपः भवति। यत्र विसर्गलोपस्य आधिक्यं भवति तत्र लुप्तविसर्गतादोषः भवति।

**(4) अधिकपदता-**

विवक्षितार्थनिमित्तं यत्र अनावश्यकानाम् अधिकानां पदानां प्रयोगः क्रियते तत्र अधिकपदता दोषः भवति।

**स्फटिकाकृतिनिर्मलः प्रकामम्**

**प्रतिसंक्रान्तनिशातशास्त्रतत्त्वः।**

**अविरुद्धसमन्वितोक्तियुक्तिः**

**प्रतिमल्लास्तमयोदयः स कोऽपि॥**

अनावश्यकस्य पदस्य व्यवहारात् अर्थात् विवक्षितस्य अर्थस्य कृते यत्र अधिकानां पदानां प्रयोगः क्रियते तत्र अयं दोषः भवति। अत्र स्फटिकपदं शुभ्रार्थसम्पादकम्। किन्तु स्फटिकवत् इत्युक्ते स्फटिकस्याकृतिवत् निर्मलः इति अन्वयकारणात् आकृति पदस्यावश्यकरहितस्य स्थापनात् अधिकपदतादोषः।

**(5) कथितपदता-**

यदि एकस्मिन् श्लोके एकस्यैव पदस्य यदि मुहुर्मुहुः प्रयोगः भवति चेत् तत्र कथितपदता दोषः भवति।

**अधिकरतलतल्पं कल्पितस्वापलीला**

**परिमिलननिमीलत्पाण्डिमा गण्डपाली।**

सुतनु! कथय कस्य व्यञ्जयत्यञ्जसैव

स्मरनरपति लीलायौवराज्याभिषेकम्॥

श्लोकेऽस्मिन् लीलापदं प्रथमपादे चतुर्थपादे च एवं द्विवारं व्यवहृतं वर्तते। लीलापदस्य प्रथमपादे कथनादनन्तरं चतुर्थपादे पुनः कथनात्कथितपदता दोषः।

**4. अर्थदोषाः**

यथा–

**अर्थोऽपुष्टः कष्टोःव्याहतपुनरुक्तदुष्क्रमग्राम्याः।**

**सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च**

**अनवीकृतः सनियमानियमविशेषाविशेषपरिवृत्ताः**

**साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः।**

**विध्यनुवादायुक्तस्त्यक्तपुनः स्वीकृतोऽश्लीलः॥**

**(1) अपुष्टार्थता–**

प्रयुक्तपदेन यदि विवक्षितार्थस्य पुष्टिः न भवति अपुष्टार्थता दोषः

**अतिविततगगनसरणिप्रसरणपरिमुक्तविश्रामानन्दः।**

**मरुदुल्लासितौरभकमलाकरहासकृद्रविर्जयति॥**

श्लोकेऽस्मिन् अतिविततत्त्वम्, सरणित्त्वम्, मरुदुल्लास्तिसौरभत्त्वम् प्रभृतीनि पदानि वर्ण्यमानस्य रवेः न पुष्टिं कुर्वते। अतः अपुष्टता दोषः। गगनस्य स्वतः दीर्घवात् अतिविततत्त्वम् इत्यपि विशेषणं नोपकुरुते। गगने सरणित्वमपि नारोपणीयम्। एतदुपादानेऽपि नार्थे काचित् पुष्टिः। अतोऽत्र अपुष्टार्थतादोषः भवति।

**(2) व्याहतता–**

प्रागेव एकस्य उत्कर्षमपकर्षं वा अभिधाय यदि अनन्तरं तत् वैपरीत्यं सम्पाद्यते तर्हि व्याहतता दोषः भवति यथा–

**जगति जयिनस्ते ते भावा नवेन्दुकलादयः**

**प्रकृतिमधुराः सन्त्येवान्ये मनो मदयन्ति ये।**

**मम तु यदियं याता लोके विलोचनचन्द्रिका**

**नयनविषयं जन्मन्येकः स एव महोत्सवः॥**

अत्र श्लोके असारतया आदौ चन्द्रिका वर्णिता। परन्तु तृतीयपादे ''विलोचनचन्द्रिका याता'' इति कथनेन चन्द्रिकायाः उत्कर्षः प्रतिपादितः। अतः चन्द्रिकायाः आदौ असारवर्णनानन्तरं पुनः तस्याः सारवर्णनात् व्याहतता दोषः।

**(3) पुनरुक्तता–**

एकस्मिन् श्लोके एकस्य शब्दस्य अनेकवारं प्रयोगः क्रियते चेत् पुनरुक्तता दोषः।

**कृतमनुमतं दुष्टं वा यैरिदं गुरुपातकम्**

**मनुजपशुभिर्निर्मर्यादैर्भवद्भिरुदायुधैः।**

**नरकरिपुणा सार्धं तेषां सभीमकिरीटिना–**

**मयमहमसृङ्मदोमांसैः करोमि दिशां बलिम्॥**

क्रुद्धस्याश्वत्थाम्नः वेणीसंहारे जनकवधानन्तरमेव उक्तिरियम्। अस्मात् श्लोकात् प्रागेव अर्जुन! अर्जुन! इति सम्बोधनं विधाय सभीमकिरीटिनामिति पुनः कथनेन किरीटिपदं (अर्जुनपदम्) पुनरुक्तम्। अतः अत्र पुनरुक्तता दोषः।

**( 4 ) ग्राम्यता-**

ग्रामीणैः प्रयुज्यमानानां शब्दानां प्रयोगः काव्ये भवति चेत् ग्राम्यता दोषः भवति।

**स्वपिति यावदयं निकटे जनः स्वपिमि तावदहं किमपैति ते।**

**तदयि! साम्प्रतमाहर कूर्परं त्वरितमूरुमुदञ्चय कुञ्चितम्॥**

असौ जनः तव समीपे स्वपिति, अहं तावत् तव समीपे स्वपिमि। अनेन तव का क्षतिः? सत्वरं कुञ्चितमूरुम् उन्मोचय, इति पामरजनोक्तिः। नागरिकाणां कृते एतादृशी उक्तिर्न युक्तियुक्ता भवति। ग्राम्यजनानामेतादृशः व्यवहारः। अतोऽत्र ग्राम्यता दोषः।

**( 5 ) सन्दिग्धता -**

कवेः विवक्षितार्थस्य आशयस्य वा ज्ञाने यत्र द्वैधीभावः जायते तत्र सन्दिग्धता दोषः भवति। यथा-

**मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमुदाहरन्तु।**

**सेव्या नितम्बाः किमु भूधरामामुत स्मरस्मेरविलासिनीनाम्॥**

श्लोकेऽस्मिन् गिरिनितम्बः (मध्यभागः) सेव्यः, अहोस्वित् नायिकानितम्बः इति प्रश्नकर्तुराशयज्ञानाभावात् सन्देहो जायते। अतः सन्दिग्धता दोषः। प्रश्नकर्ता विरागी वा रागी वा इति सन्देहः, विरागी चेत् तर्हि पर्वतमध्यभागः सेव्यः, इत्यर्थः स्यात्। रागी चेत् नायिकानितम्बः सेव्यः स्यादित्यर्थः स्यात्।

**5. रसदोषाः**

साक्षात् ये रसमपकर्षयन्ति ते एव रसदोषाः इति कथ्यन्ते। रसदोषाः यथा-

**व्यभिचारिरसस्थायिभावानां शब्दवाच्यता।**

**कष्टकल्पनया व्यक्तिरनुभावविभावयोः॥**

**प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः**

**अकाण्डे प्रथनच्छेदौ, अङ्गस्याप्यतिविस्तृतिः।**

**अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्ययः**

**अनङ्गस्याभिधानञ्च रसे दोषाः स्युरीदृशाः॥**

**( 1 ) रसस्य ( स्वशब्दकथनात् ) स्वशब्दवाच्यत्वदोषः-**

यत्र काव्ये शृङ्गारादिरसानां नामोच्चरणम् अथवा रसः इति शब्दस्योच्चारणं वा क्रियते तत्र रसस्य स्वशब्दवाच्यत्वदोषः भवति।

**तामनङ्गजयमङ्गलश्रियं किञ्चिदुच्चभुजमूलालोकिताम्।**

**नेत्रयोः कृतवतोऽस्य गोचरे कोऽप्यजायत रसो निरन्तरः॥**

"रसः निरन्तरः अजायत" इति कथनेन रसशब्दः स्वशब्देन उच्चारितः अतः रसस्य स्वशब्दवाच्यत्वदोषः।

**( 2 ) कष्टकल्पनया अनुभावस्य प्रतीतिः-**

यत्र अनुभावस्य प्रतीतौ अस्पष्टता भवति तत्र अयं दोषः भवति।

**कर्पूरधूलिधवलद्युतिपूरधौतदिङ्मण्डले शिशिररोचिषि तस्य यूनः।**

**लीलाशिरोंऽशुकनिवेशविशेषक्लृप्तिव्यक्तस्तनोन्नतिरभून्नवयौवना सा॥**

चन्द्रोदये नायिका शिरसि अंशुकापातव्याजेन स्वस्य उन्नतस्तनद्वयं युवकं प्रति दर्शयति। अत्र युवकयुवत्योरन्योन्यावलोकनमनुभावः। किन्तु अयम् अनुभावः स्पष्टतया न प्रतिभाति। यतः मार्गे कति युवकाः युवतयो न गच्छन्ति? सर्वत्र किं सर्वेषाम् अवलोकनलालसा भवति? परन्त्वत्र कष्टेन अनुभावस्य कल्पना कर्तव्या भवति अतः दोषः।

**( 3 ) पुनः पुनर्दीप्तिः -**

काव्ये अङ्गत्वेन विवक्षितस्य रसस्य पुनः पुनः यदि परिप्रकाशः भवति, तर्हि अयं दोषः भवति। कुमारसम्भवे मारदहनानन्तरं रतिदेव्याः क्रन्दनस्य पौनःपुन्येन वर्णनात् अङ्गभूतस्य करुणरसस्य पुनः दीप्तिः जायते अतः अत्र दोषः। अङ्गिनः रसस्य एवं वर्णनान्न दोषः यथा महाभारतादौ शान्तरसस्य।

**( 4 ) अकाण्डे छेदता -**

यत्र असमये रसस्य विच्छेदः भवति तत्र अयं दोषः भवति। यथा-वीरचरितनाटके श्रीरामपरशुरामयोः युद्धे सन्निकटे (वीररसास्यासन्नत्वात्) वीररसवर्णनं विहाय विवहानन्तरं ''**कङ्कणमोचनाय गच्छामि**'' इति राघवस्य उक्तिवर्णनं रसच्छेदकं भवति। येन प्रसिद्धवीरस्य श्रीरामस्य भीरुता प्रकटिता भवति। अतः दोषः।

**( 5 ) अनङ्गस्य वर्णनम्-**

अनङ्गस्य रसानुपकारकस्य वर्णनं यत्र भवति तत्र अयं दोषः भवति।

यथा-राजशेखररचिताया कर्पूरमञ्जर्यां नायिकाकृतं वसन्तवर्णनमनादृत्य राजा वन्दिवर्णितं वसन्तकालवर्णनं शृणोति। वन्दिवर्णितस्य वसन्तस्य वर्णनं प्रकृतरसस्य अनुपकारकत्वात् दोषस्थलम्। अर्थात् तत्र अङ्गत्वेन अभिमतस्य वर्णनात् अयं दोषः जातः। अपरञ्च ध्वनिकारः आनन्दवर्धनः अप्यगादीत् -

**अनौचित्यादृते नान्यत् रसभङ्गस्य कारणम्।**
**औचित्योपनिबन्धस्तु रसस्योपनिषत्परा ॥ इति॥**

एवं दिङ्मात्रेणात्र काव्यप्रकाशानुगुणं दोषस्य पञ्चविभागाः प्रदर्शिताः।

## स्वाध्यायः

**1. कोष्ठकप्रदत्तविकल्पेभ्यः योग्यविकल्पं चित्वा रिक्तस्थानानि पूरयत।**

(1) काव्यप्रकाशस्य ........... उल्लासे दोषनिरूपणं कृतमस्ति। (षष्ठे, सप्तमे, अष्टमे)

(2) ''मुख्यार्थहतिदोषः'' इत्यत्र हति शब्दस्य ........... अर्थः भवति। (अपकर्षः, उत्कर्षः, ग्रहणम्)

(3) श्रुतेः पीडने ........... दोषः भवति। (अप्रयुक्तता, निहतार्थता, श्रुतिकटुता)

(4) पदस्य अंशे यदि दोषः भवति चेत् सः ........... दोषः इति कथ्यते। (पददोषः, स्वल्पदोषः, पदांशदोषः)

(5) ''अकुण्ठोत्कण्ठया'' इत्यस्मिन् श्लोके ........... दोषः अस्ति। (अप्रयुक्तता, सन्दिग्धता, प्रतिकूलवर्णता)

(6) रसे तदननुकूलवर्णानां प्रयोगे ........... दोषः भवति। (उपहतत्वम्, प्रतिकूलवर्णता, अधिकपदता)

(7) पाठेऽस्मिन् ........... अर्थदोषाः प्रोक्ताः। (त्रयः, सप्त, पञ्च)

(8) काव्ये ग्रामीणशब्दप्रयोगे ........... दोषः भवति। (ग्राम्यता, पुनरुक्तता, व्याहतता)

(9) ''कङ्कणमोचनाय गच्छामि'' इति रामस्य कथने ........ दोषः अस्ति।
(स्वशब्दवाच्यता, पुनः अकाण्डे छेदता)

(10) पाठेऽस्मिन् काव्यप्रकाशानुगुणं दोषस्य ........ भेदाः प्रदर्शिताः। (त्रयः, चत्वारः, पञ्च)

**2. एकवाक्येन उत्तरं लिखत।**

(1) आचार्यमम्मटोक्तां दोषस्वरूपनिरूपणकारिकां लिखत।

(2) ''अनङ्गमङ्गलग्रहापाङ्ग......'' इत्यस्मिन् श्लोके कः दोषः ?

(3) अप्रयुक्ततादोषः कदा भवति?

(4) जन्तुपदं कस्मिन्नर्थे अवाचकम्?

(5) काव्यप्रकाशकारेण पदांशगतदोषाः कति प्रोक्ताः?

(6) ''धीरो विनीतो निपुणो......'' इत्यत्र कः दोषः?

(7) अधिकपदतादोषस्य किं लक्षणम्?

(8) व्याहतता दोषस्य किं लक्षणम्?

(9) ग्राम्यता दोषस्य उदाहरणं लिखत?

(10) पुनः पुनर्दीप्तेः किं लक्षणम्?

**3. टिप्पणीं लिखत।**

(1) प्रतिकूलवर्णता।

(2) अधिकपदता।

(3) अपुष्टार्थता।

**4. सविस्तरमुत्तरं लिखत।**

(1) पदगतदोषान् विवृणुत।

(2) वाक्यगतदोषान् विवृणुत।

(3) अर्थदोषान् विवृणुत।

(4) रसदोषान् विवृणुत।

**5. ''अ'' विभागं ''ब'' विभागेन सह योजयत।**

| अ | ब |
|---|---|
| (1) श्रुतिकटुता | चवैतुहि |
| (2) निरर्थकता | रसः |
| (3) ग्राम्यता | कार्तार्थ्यं |
| (4) सन्दिग्धता | कुञ्चितमूरुः |
| (5) स्वशब्दवाच्यता | ''मात्सर्यमुत्सार्य.....'' |

●

(१५)

# ध्वनिविचारः

**प्रस्तावना**

साहित्यशास्त्रस्य प्रमुखाः षट् सम्प्रदायाः, रस-अलङ्कार-रीति-ध्वनि-वक्रोक्ति-औचित्याः। तेषु सर्वाधिकः प्रसिद्धः सम्प्रदायः ध्वनिसम्प्रदायो वर्तते। काव्यस्य प्रमुखं तत्त्वं किमिति जातायां जिज्ञासायां ध्वनिप्रस्थापकः आचार्यः आनन्दवर्द्धनः सर्म्यते। असौ काव्यस्यात्मत्वेन - 'काव्यस्यात्मा ध्वनि'रिति प्रतिपादयति।

परवर्तिनः काव्याचार्याः प्रायः सर्वे काव्यसमालोचकाः अस्यैव ध्वनितत्त्वस्यानुगन्तारः अभवन्। एते मम्मट-विश्वनाथादयः अनुगामिनः काव्यस्य सर्वेषां प्रमुखतत्त्वानां ध्वनौ एवान्तर्भावं 'वस्त्वलङ्काररसादिलक्षणत्रिरूपो ध्वनिः' इति स्वीकृतवन्तः। साम्प्रतं ध्वनिः साहित्यजगतः सर्वस्वमेव वर्तते।

- **को नाम ध्वनिः?**

ध्वनिशब्दस्य पञ्चधा व्युत्पत्तिः क्रियते विद्वद्भिः। पञ्चधा निर्वचनेन पञ्चापि ध्वनिसम्बद्धाः अर्था गृह्यन्ते तद्यथा-

1. **ध्वनति इति ध्वनिः।** अनेन व्यञ्जकः शब्दो ध्वनिः स्वीक्रियते।
2. **ध्वनति ध्वनयति वेति ध्वनिः।** अनेन व्यञ्जकः अर्थः ध्वनिरुच्यते।
3. **ध्वन्यते इति ध्वनिः।** अनेन रसालङ्कारवस्तुरूपं व्यङ्ग्यार्थत्रयं ध्वनिः कथ्यते।
4. **ध्वन्यते अनेन इति ध्वनिः।** अनेन व्यञ्जनादिशक्तीनां ग्रहणं भवति।
5. **ध्वन्यतेऽस्मिन्निति ध्वनिः।** अनेन व्यङ्ग्यार्थप्रधानं काव्यमपि ध्वनिः सम्बोध्यते।

एवं ध्वनिशब्देन पञ्चानां सन्निवेशो भवति। ते सन्ति (1) व्यञ्जकशब्दः (2) व्यञ्जकार्थः (3) व्यङ्ग्यार्थः (4) व्यञ्जनाव्यापारः (5) व्यङ्ग्यार्थप्रधानं काव्यम्।

- **ध्वनेः स्वरूपम्-**

यत्र वाच्यार्थापेक्षया व्यङ्ग्यार्थस्य प्राधान्यं भवति सः ध्वनिः कथ्यते। काव्यप्रकाशे आचार्यः मम्मटः काव्यभेदप्रसङ्गे उत्तमं काव्यं ध्वनिरिति संज्ञया सम्बोधयति।

**इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः।** (का.प्र.1.4)

साहित्यदर्पणेऽपि आचार्यः विश्वनाथः ब्रूते-

**वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत्काव्यमुत्तमम्।** (सा.द. 4.1)

अर्थात् यत्र वाच्यात् व्यङ्ग्यम् अतिशयितं भवति सः ध्वनिः। आचार्यः आनन्दवर्द्धनः ध्वन्यालोके ध्वनिं लक्षयति-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः सः ध्वनिरिति सूरिभिः कथितः॥** (ध्व. 1.13)

यत्र अर्थः आत्मानं तथा शब्दः स्वम् अर्थं गौणरूपेणोपस्थाप्य व्यङ्ग्यमर्थम् अभिव्यञ्जयतः तदा ध्वनिः। ध्वनिकारः स्वयं कारिकामिमां व्याख्यायति - '**वाच्यविशेषः वाचकविशेषः शब्दो वा तमर्थं व्यङ्क्तः स काव्यविशेषो ध्वनिरिति।**'

लक्षणेनानेन वाच्य-वाचकचारुत्वहेतुभ्य: उपमादिभ्य: अनुप्रासादिभ्यश्च ध्वने: विषय: भिन्न इति सुस्पष्टम्। आनन्दवर्धन: काव्ये मुख्यरूपेण द्वौ अर्थौ मन्यते- वाच्य: प्रतीयमानश्च। अनयो: वाच्याददितिरिक्त: य: प्रतीयमानार्थ: स एव महाकवीनां वाणीषु कामिनीषु लावण्यमिव भिन्न: एव भाति। यथोक्तम्-

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत् यत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥ (ध्व. 1.4)**

इत्थं ध्वने: मूलं प्रतीयमान: अर्थ: य: सहृदयानां हृदयावर्जक:। एतादृश: अर्थ: एव काव्यस्य आत्मेति मन्यते। आदिकवे: वाल्मीके: वाण्यां काव्यरूपेण अयं ध्वनि: प्रकटित:, य: क्रौञ्चयुगलवियोगेन उत्पन्न: शोक: श्लोकरूपेण परिणत:-

ध्वनिकारमतेन प्रतीयमानार्थ: त्रिविध: - **रसध्वनि:, अलङ्कारध्वनि:, वस्तुध्वनिश्च।** एतेष्वपि रसध्वनि: सर्वेषु विशिष्यते। अभिनवगुप्त: ग्रन्थस्यास्य लोचनटीकायां रसध्वनिमेव आत्मा इति वदति।

तेन रस: एव वस्तुत: आत्मा। वस्त्वलंकारध्वनी तु सर्वथा रसं प्रति पर्यवस्येते इति वाच्यादुत्कृष्टौ तौ इति अभिप्रायेण ध्वनि: काव्यस्य आत्मा इति सामान्येन उक्तम्।

इत्थमानन्दवर्धन: ध्वनौ यथास्थानं रस-अलङ्कार-वस्तु-रीति-वृत्ति-गुणादीनां समेषां तत्त्वानामन्तर्भावं चकार। ध्वनि: काव्यस्य केन्द्रबिन्दुत्वेन मत्वा अन्यानि तत्त्वानि उपकारकाणीति स्वीकरोति आचार्य:।

- **ध्वने: मूलप्रेरणा प्राचीनता च**

ध्वनिशब्दस्य कृते आलङ्कारिका: वैयाकरणानामृणिन: सन्ति यत: ध्वनिकल्पनाया: मूलप्रेरणा वैयाकरणानां स्फोटसिद्धान्तेन सम्बद्धा। भर्तृहरिकृते वाक्यपदीये स्फोटस्वरूपं प्रतिपादितम्। यथा-

**य: संयोगवियोगाभ्यां करणैरूपजन्यते।**
**स स्फोट: शब्दजा: शब्दा ध्वनयोऽन्यैरुदाहृता:॥ (वा.प. 1.103)**

तत्रोच्चारणावयवानां संयोगेन विभागेन च य: शब्द: उत्पद्यते स स्फोट: अन्ये च शब्दजा: शब्दा: ध्वनिशब्दवाच्या:। तत्र वैयाकरणै: परा-पश्यन्ती-मध्यमा-वैखरी इति चतुर्विधां वाणीमभिधाय तिसृणां नित्यत्वमखण्डत्वञ्च व्यवस्थाप्य तुरीयां वाचं मनुष्या: वदन्तीति प्रतिपादितं स्वशास्त्रे। या वागस्माभि: श्रूयते सा वैखरी वाक्। व्यक्तशब्द: एव वैखरीशब्द: यं वयं श्रृणुमस्तस्य योऽर्थस्तन्मध्ये। तथा चोक्तम् - पूर्वपूर्ववर्णानुभवाहितसंस्कारसचिवेनान्त्यवर्णानुभवेनाभिव्यज्यते स्फोट इति। यथा घण्टानादादिषु अनुरणनरूप: शब्द: तथैव शब्दज: व्यङ्ग्यार्थ: ध्वनिरित्युच्यते। इत्थं स्फोटव्यञ्जका: वर्णा: ध्वनिनाम्ना कथ्यन्ते एवं व्यञ्जकशब्दार्थयो: ध्वनित्वं सिद्धं भवति। अत एव आचार्य आनन्दवर्द्धनेन मम्मटेन च वैयाकरणानां प्रशंसायामुच्यते-

**प्रथमे हि विद्वांसो वैयाकरणा:, व्याकरणमूलत्वात् सर्वविद्यानाम्। ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति। (ध्व. 1.13.)**

मम्मट: अपि ध्वने: प्राचीनत्वे स्फोटं वैयाकरणान् च स्मरति। यथा-

**बुधै: वैयाकरणै: प्रधानभूतस्फोटरूपव्यङ्ग्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहार: कृत:। (का.प्र.1.4)**

- **न्यायद्वयेन ध्वनिप्रतिपत्ति:**

ध्वनितञ्चास्य ज्ञानाय आलङ्कारिकै: आचार्यै: द्वौ न्यायौ आश्रियेते घण्टानुरणनन्याय:, वीचिसन्तानन्यायश्च।

**1. घण्टानुरणनन्याय:**

यथा मन्दिरे घण्टानाद: भवति, घण्टानादे जाते अन्तिम: नादप्रवाह: कर्णे गुञ्जायमान: बहुकालं यावत् झङ्कारवत् भवति। तथैव शब्दस्य उच्चारिते तस्माद् जनित: विशिष्ट: अर्थ: व्यङ्ग्यार्थ: सहृदयानां हृदि बहुकालं यावत् जनयति स एव ध्वनि: उच्यते। स्फोटवादे अपि अयं न्याय: अतिप्रसिद्ध: वर्तते। घण्टानादस्य अनुरणनमिव ध्वनि: भवति।

**2. वीचिसन्तानन्यायः**

वीचिः अर्थात् तरङ्गः, तथा सन्तानम् अर्थात् विस्तारः। यथा जलाशयस्य मध्यभागे केनापि लोष्टं निक्षिप्यते, मध्ये निक्षिप्तस्य लोष्टस्य तरङ्गाः शनैः शनैः जलाशयं परितः स्थितेषु तटेषु प्रसरन्ति शब्दस्य श्रवणेन सामान्यार्थं विहाय विशिष्टः व्यङ्ग्यार्थः अस्माकं हृदयतरङ्गेषु विस्तारं प्राप्नोति स एव ध्वनिरुच्यते।

- **काव्यस्यात्मा ध्वनिः**

**ध्वनिनाऽतिगभीरेण काव्यतत्त्वनिवेशिना।**
**आनन्दवर्धनः कस्य नासीदानन्दवर्धनः॥**

आनन्दवर्धनः ध्वन्यालोकग्रन्थे काव्यतत्त्वानां गम्भीरतया परिशीलनं कृत्वा ध्वनिसिद्धान्तस्य प्रस्थापनां कृतवान्। आप्राचीनाद् कालाद् काव्यस्य प्रमुखतत्त्वविषयकी चर्चा प्रचलतितराम्। रस-अलङ्कार-रीतिसम्प्रदायाः पूर्वतः प्रचलिताः तथापि काव्यस्य प्रमुखतत्त्वस्य गवेषणा प्रचलन्ती आसीत्। तदानीन्तने समये प्राचीनाचार्याणां मतानि समीक्ष्य ध्वनितत्त्वस्य प्रतिष्ठां कृतवान् आचार्य आनन्दवर्द्धनः। तदुत्तरकालीनाः मम्मटविश्वनाथादयः प्रसिद्धाः आलङ्कारिकाः अपि ध्वनिमेव काव्यस्य आत्मरूपेण स्वीकृतवन्तः। आचार्यः स्वयं कथयति यत् ध्वनिशब्दः न मया कल्पितः पूर्वाचार्यैः एषः ध्वनिः समाम्नातः। लक्ष्यग्रन्थेषु तु ध्वनिरवर्तत एव किन्तु आनन्दवर्धनात्पूर्वं केनापि आलङ्कारिकेण समालोचकेन वां ध्वनिः काव्यस्यात्मरूपेण वा महनीयतत्त्वेन प्रतिपादितः। अत एव आनन्दवर्द्धनः ध्वन्यालोकस्य प्रथमकरिकायां ध्वनिविरोधिनां त्रीणि मतानि निरूप्य 'काव्यस्यात्मा ध्वनिः' इति उद्घोषणां कुर्वन् ध्वनिस्वरूपं कथयति-

**काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्वः**
**तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।**
**केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं**
**तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्॥**

- **ध्वनिविरोधिनां त्रीणि मतानि ध्वनेः स्थापना च**

ध्वनिविरोधिनः त्रिविधाः- अभाववादिनः,भाक्तवादिनः, अनिर्वचनीयतावादिनः। ध्वनेः स्थापनायै पूर्वपक्षरूपेण उल्लेखं कृत्वा अग्रे तेषां मतानां समाधानं करोति।

ध्वन्यभाववादिनः ध्वनेः अभावं स्वीकुर्वन्ति। तेषामपि त्रयः ते विकल्पाः सन्ति।

| 1. | 2. | 3. |
|---|---|---|
| **अलङ्कारवादिनः** | **प्रस्थानवादिनः** | **अन्तर्भाववादिनः** |
| (काव्यचारुत्वहेतुषु अलङ्कारेषु गुणेषु अन्येषु तत्त्वेषु ध्वनिः नास्ति इति तेषां मतम्) | (काव्यस्य प्रसिद्धमार्गविशेषः अतः नास्ति ध्वनिः) | (काव्यचारुत्वहेतुषु तत्त्वेषु ध्वनेः अन्तर्भावः अतः नास्ति ध्वनिः) |

2. भाक्तवादिनः भाक्तवादिनां मतानुसारेण ध्वनेः अन्तर्भावः भक्तौ अर्थात् लक्षणायां भवति।
3. अनिर्वचनीयतावादिन : ध्वनिः अवर्णनीयः। वाचा तस्य विवेचनाशक्यमिति अनिर्वचनीयतावादिनां मतम्।

- **ध्वनिविरोधिनां मतानां खण्डनम्**

**ध्वन्यभाववादिनः**

प्रथमं ध्वनिविरोधिनः अभाववादिनः तेषां त्रयाणां विकल्पानां खण्डनम् आनन्दवर्द्धनः क्रमशः कृतवान्।

(1) ये खलु गुणालङ्कारादिचारुत्वहेतुषु तत्त्वेषु ध्वनेः उल्लेखं न स्वीकुर्वन्ति तेषां कथनम् अयोग्यम्। यतः अलङ्कारस्य विषयः भिन्नः, ध्वनेः विषयः भिन्नः। अलङ्कारादयः केवलं शब्दार्थौ अलङ्कुरुतः चमत्कुरुतः किन्तुः ध्वनिस्तु व्यङ्ग्यमुखेन सम्पूर्णं काव्यम् अलङ्करोति। अतः ध्वनेः प्राधान्येन अङ्गीरूपेण काव्ये स्थितिः भवति। यथोक्तं परिकरश्लोके-

**व्यङ्ग्यव्यञ्जकसम्बन्धनिबन्धनतया ध्वनेः।**

**वाच्यवाचकचारुत्वहेत्वन्तःपतिता कुतः॥**

अर्थात् व्यङ्ग्यव्यञ्जकमूलकः ध्वनिः वाच्यवाचकहेतुषु अलङ्कारादिषु कथं सम्भवेत्? एवं अर्थालङ्काराः शब्दालङ्काराः यस्य कृते चारुत्वहेतवः तेभ्यः शब्दार्थेभ्यः ध्वनिः भिन्न एव। सः च महाकवीनां काव्येषु सम्यक् रूपेण प्रदर्शितः।

(2) महाकाव्यकृतीनां सूक्ष्मतया परीक्षणं कुर्मश्चेत् तेषां काव्येषु ध्वनिः मुख्यरूपेण गौणरूपेण च संस्थितः। न केवलं लक्षणकृतामेव नायं प्रसिद्धः मार्गः, अपितु महाकवीनां सहृदयानां हृदयाह्लादकरः अयं मार्गः अतः प्रस्थानवादिनां मतमपि युक्तं नास्ति।

(3) अत्र पूर्वपक्षस्य कथनं वर्तते यत् यत्र व्यङ्ग्यार्थःनास्ति तादृशेषु अलङ्कारेषु ध्वनेरन्तर्भावो भविष्यति एतन्मतमपि अयोग्यमेव यतः अलङ्काराः केवलं वाच्यवाचकाश्रयं नीत्वा काव्ये भवन्ति किन्तु ध्वनेराश्रयः व्यङ्ग्यव्यञ्जकभावः। अलङ्कारा अङ्गरूपाः, ध्वनिः अङ्गीरूपः। अलङ्काराः स्वल्पविषयाः ध्वनिः महाविषयः अतः ध्वनेः अन्तर्भावः अलङ्कारेषु न शक्यते, ध्वनौ अलङ्काराणामन्तर्भावो भवति यत्र प्रतीयमानार्थस्य प्रतीतिः। यथा- समासोक्त्याक्षेपानुक्तनिमित्तविशेषोक्तिदीपकापह्नुतिसङ्कराद्यलङ्काराः।

- **भाक्तवादिनः**

भक्तिशब्देन लक्षणायाः ग्रहणम्। भक्तेः त्रीणि कारणानि भवन्ति। (1) मुख्यार्थबाधः (2) तद्योगः (3) रुढिः अथवा प्रयोजनम्। भक्तिशब्दं ज्ञातुं व्युत्पत्तिं पश्यामः।

- मुख्यार्थस्य भङ्गः भक्तिः - गङ्गायां घोषः (मुख्यार्थबाधः)
- भज्यते सेव्यते पदार्थेन इति सामीप्यादिधर्मः भक्तिः गङ्गातटे घोषः (तद्योगः)
- प्रतिपाद्ये शैत्यपावनत्वादौ श्रद्धाविषयः भक्तिः (प्रयोजनम्) लोचनकारः अभिनवगुप्तः भाक्तवादीनामपि त्रीन् विकल्पान् करोति।

(1) भक्तिः तथा ध्वनिः एकरूपौ स्तः। नास्ति भेदः।

(2) भक्तिः ध्वनेः लक्षणम्।

(3) भक्तिः ध्वनेः उपलक्षणम् - आवश्यकगुणः

एतेषां मतानां खण्डनं कुर्वन् वदति ध्वनिकारः-

**भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः (ध्व. 1.14)**

ध्वनिः लक्षणाभिन्नः नास्ति तयोः एकत्वम्। रूपभेदात् ध्वनिलक्षणे भिन्ने स्तः।

- भक्तिः ध्वनेः लक्षणमपि नास्ति। यतः लक्षणे अतिव्याप्ति - अव्याप्तिदोषौ सम्भवतः -

**अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तथा।**

अतिव्याप्ति - अव्याप्ति - असम्भवदोषरहितं लक्षणं स्वीक्रियते। भक्तिः ध्वनेः लक्षणम् इत्यत्र अतिव्याप्तिदोषः जायते यतः यत्र ध्वनिः न भवति तत्रापि भक्तिः भवति चेत् अतिव्याप्तिः भवति। ध्वनिः भिन्नः भक्तिः भिन्नः एतस्मात् कारणात् एकत्वे मते अतिव्याप्तिदोषोऽपि सम्भवति। कथितं च-

**वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता।**

**व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम्॥**

अभिधामूलध्वनौ (विवक्षितान्यपरवाच्यध्वनौ) तथा ध्वनेः अपरेषु प्रकारेषु भक्तिः अथवा ध्वनिः अव्याप्तत्वेन भवति अतः अव्याप्तिकारणात् भक्तिः ध्वनेः लक्षणं नास्ति। भक्ति ध्वनेः उपलक्षणमिति ये स्वीकुर्वन्ति तेषां खण्डनं कुर्वन्

वदति उपलक्षणत्वेन स्वीकृते लक्षणत्वेनापि स्वीकृतिर्भविष्यति अतः एतदपि अयोग्यमेव। उपलक्षणं तु प्रासङिगकं चिह्नं यथा काकवत्त्वं देवदत्तस्य गृहम्। यदि भक्तिः ध्वनेः उपलक्षणमिति मन्यामहे चेदपि ध्वनिवादिनां स्थितौ न किमपि परिवर्तनं सम्भवति। इत्थं आनन्दवर्द्धनेन भाक्तवादिनां मतं खण्डितम्।

- **अनिर्वचनीयतावादिनः**

केचन सुकुमारबुद्धयः ध्वनिलक्षणं कर्तुम् अशक्ताः। अतः तेषां मतानुसारेण ध्वनितत्त्वं वाचा वर्णयितुं न शक्यते अतः ध्वनिः अनिर्वचनीयः अलक्षणीयः, अनाख्येयश्च। आनन्दवर्धनः समाधानं यच्छन् ब्रूते - लक्षणेऽन्यैः कृते चास्य पक्षसिद्धिरेव नः।

अर्थात् पूर्व यत्रार्थः शब्दो (ध्व. 1.13) इति कृते ध्वनिलक्षणे भवतां मतं स्वयमेव निरस्तम् अस्माकं पक्षश्च संसिद्धः एव।

इत्थमानन्दवर्धनः ध्वनिविरोधिमतखण्डनपुरस्सरं ध्वनेः स्वरूपमुक्त्वा ध्वनेः भेदान् निरूपयति।

**ध्वनिभेदाः**

ध्वनेः मुख्यतया द्वौ भेदौ स्तः - (1) लक्षणामूलो ध्वनिः, अविवक्षितवाच्यध्वनिः वा (2) अभिधामूलो ध्वनिः - विवक्षितान्यपरवाच्यध्वनिः वा। अविवक्षितवाच्यध्वनौ वाच्यार्थस्य विवक्षा प्रयोजनं वा न भवति। व्यङ्ग्यार्थो लक्ष्यार्थम् आश्रित्यावतिष्ठते। अस्यापि द्वौ भेदौ स्तः - (1) अर्थान्तरसङ्क्रमितवाच्यध्वनिः (2) अत्यन्ततिरस्कृतवाच्यध्वनिश्च। उक्तं च -

**अर्थान्तरे सङ्क्रमितमत्यन्तं वा तिरस्कृतम्।**
**अविवक्षितवाच्यस्य ध्वनेर्वाच्यं द्विधा मतम्॥**

अर्थान्तरसंक्रमिते वाच्यार्थः स्वार्थं बोधयन्नि अर्थान्तरं संक्रामति अत्यन्ततिरस्कृते वाच्यध्वनौ वाच्यार्थः सर्वथा तिरस्कृते, लक्षणामूलश्चैष ध्वनिः।

अभिधामूले विवक्षितान्यपरवाच्ये ध्वनौ वा व्याङ्ग्यार्थो वाच्यार्थम् आश्रयते। एषोऽपि द्विविधः (1) असंलक्ष्यक्रम व्यङ्ग्यध्वनिः (2) संलक्ष्यक्रमव्यङ्ग्यध्वनिः।

असंलक्ष्यक्रमव्यङ्ग्यध्वनौ ध्वनेः व्यञ्जनाव्यापारस्य क्रमः न लक्ष्यते। वाच्यार्थस्य प्रतीतेरनन्तरं व्यङ्ग्यार्थस्य प्रतीतिः शतपत्रभेदनन्यायेन शीघ्रं भवति अतः क्रमस्य अलक्षितत्वात् असंलक्ष्यक्रमव्यङ्ग्यध्वनिः। तस्यापि रस-भाव-भावाभास-भावशान्ति-भावसन्धि-भावोदय-भावशबलतादयः नैके भेदाः सम्भवन्ति। उक्तं च-

**रसभासतदाभासतत्प्रशान्त्यादिक्रमः।**
**ध्वनेरात्माङ्गिभावेन भासमानो व्यवस्थितः॥ (ध्व.2.3.)**

संलक्ष्यक्रमव्यङ्ग्यध्वनौ वाच्यार्थात् क्रमः लक्ष्यते। अत्र वाच्यप्रतीत्यनन्तरं व्याङ्ग्यार्थस्य प्रतीतिः अनुरणनपूर्वकं संजायते। अस्य त्रय भेदाः (1) शब्दशक्त्युद्भवध्वनिः (2) अर्थशक्त्युद्भध्वनिः (3) उभयशक्त्युद्भवध्वनिः।

**तत्रापि शब्दशक्त्युद्भवध्वनेः द्वौ भेदो भवतः (1) अलङ्कारध्वनिः (2) वस्तुध्वनिः**

अर्थशक्त्युद्भवध्वनेः मुख्यतः त्रयः भेदाः सन्ति (1) स्वतःसम्भवी (2) कविप्रौढोक्तिसिद्धः (3) कविनिबवद्धकृप्रौढोक्तिसिद्धः। एतेषामपि द्वौ भेदौ भवतः- वस्तुरूपव्यञ्जकार्थः, अलङ्काररूपव्यञ्जकार्थः। इत्थं षट्भेदाः। तथैव पुनः प्रत्येकस्य एतेषामेव द्वौ भेदौ भवतः- वस्तुरूपव्यङ्ग्यार्थः, अलङ्काररूपव्यङ्ग्यार्थश्च। इत्थम् आहत्य अर्थशक्त्युद्भवध्वनेः द्वादशभेदाः सम्भवन्ति।

**वाच्यदृष्ट्या ध्वनेः प्रकाराः**

(1) अविवक्षितवाच्यध्वनिः (2) विवक्षितान्यपरवाच्यध्वनिः

**अभिव्यक्तिदृष्ट्या ध्वनिप्रकाराः**

(1) असंलक्ष्यक्रमव्यङ्ग्यध्वनिः (2) संलक्ष्यक्रमव्यङ्ग्यध्वनिः

**व्यञ्जकदृष्ट्या ध्वनिप्रकाराः**

(1) शब्दशक्तिमूलध्वनिः (2) अर्थशक्तिमूलध्वनिः (3) उभयशक्तिमूलध्वनिः

**व्यङ्ग्यदृष्ट्या ध्वनिप्रकाराः**

(1) वस्तुध्वनिः (2) अलङ्कारध्वनिः (3) रसादिध्वनिः

ध्वनिभेदविषये सुस्पष्टं ज्ञातुं निम्नरेखाचित्रं सहायकं भविष्यति–




इत्थं साहित्यसिद्धान्ते राजानकस्य आनन्दवर्धनस्य ध्वनिसिद्धान्तः अतीव महत्वपूर्णः वर्तते। यत्र शब्दः अर्थो वा सामान्यं वाच्यार्थं गौणं भूत्वा विशिष्टं व्यङ्यार्थं प्रतिपादयत सः ध्वनिः इति आनन्दवर्धनस्य तन्मतानुसारिणां च मतम्।

## स्वाध्यायः

**1. रिक्तस्थानपूर्तिं कुरुत।**

(1) साहित्यशास्त्रस्य ......... सम्प्रदायाः। (पञ्च, षट्, सप्त)

(2) विद्वद्भिः ध्वनिशब्दस्य ......... व्युत्पत्तिः क्रियते। (त्रिधा, चतुर्धा, पञ्चधा)

(3) ध्वनेः मूलं ......... अर्थः भवति। (वाच्यः, प्रतीयमानः, लक्ष्यः)

(4) ......... वाण्यां काव्यरूपेण शोकः श्लोकत्वमागतः। (वाल्मीकेः, भारवेः, व्यासस्य)

(5) भर्तृहरिकृते ......... स्फोटस्वरूपं प्रतिपादितम्। (नीतिशतके, महाभाष्ये, वाक्यपदीये)

(6) प्रथमे हि विद्वांसो ......... । (नैयायिकाः, वैयाकरणाः, दैवज्ञाः)

(7) ध्वनिविरोधिनः ......... सन्ति। (त्रिविधाः, पञ्चविधाः, सप्तविधाः)

(8) लक्षणामूलो ध्वनिः इत्युक्ते ......... ।
(अविवक्षितवाच्यध्वनिः, विवक्षितान्यपरवाच्यध्वनिः, संलक्ष्यक्रमव्यङ्ग्यध्वनिः)

(9) ध्वनेः मुख्यतया ......... भेदौ / भेदाः। (त्रयः, द्वौ, पञ्च)

**2. एकैकवाक्येन उत्तरं लिखत।**

(1) ध्वनिसम्प्रदायस्य प्रस्थापकः कः आचार्यः?

(2) के अनुगामिनः आचार्याः सर्वेषां प्रमुखतत्त्वानां ध्वनौ एवान्तर्भावं कुर्वन्ति?

(3) कीदृशं काव्यं ध्वनिरिति संज्ञया सम्बोध्यते?

(4) आनन्दवर्धनः काव्ये मुख्यरूपेण कौ द्वौ अर्थौ मन्यते?

(5) ध्वनिकारमतेन प्रतीयमानार्थः कतिविधः?

(6) ध्वनिकल्पनायाः मूलप्रेरणा कुतः प्राप्ता?

(7) को नाम स्फोटः?

(8) ध्वतिनत्त्वस्य ज्ञानाय आलङ्कारिकैः आचार्यैः कौ न्यायौ आश्रियेते?

**3. टिप्पणीं लिखत।**

(1) ध्वनिभेदाः।

(2) को नाम ध्वनिः?

(3) ध्वनिविरोधिनां मतानि।

**4. सविस्तरमुत्तरं दत्त।**

(1) आचार्य आनन्दवर्धनः ध्वन्यालोके ध्वनेः कि लक्षणं प्रस्तौति? बोधयत।

(2) ध्वनिस्फोटयोः अन्योन्यसम्बन्धं वर्णयत।

(3) कथं न्यायद्वयेन ध्वनिप्रतिपत्तिः भवति?

(4) ध्वन्यभाववादिनां मतमालोचयत।

(5) भाक्तवादिनः कथं भक्तिशब्देन ध्वनिं प्रतिपादयन्ति तेषां मतमालोचयत।

5. **‘अ’ - विभागं ‘ब’ - विभागेन सह योजयत।**

| ‘अ’ | ‘ब’ |
|---|---|
| (1) लोचनटीका | - मम्मटः |
| (2) साहित्यदर्पणः | - भर्तृहरिः |
| (3) काव्यप्रकाशः | - विश्वनाथः |
| (4) वाक्यप्रदीयम् | - आनन्दवर्धनः |
| (5) ध्वन्यालोकः | - अभिनवगुप्तः |